Shri Raghunath Temple MSS. Library,
JAMMU

No. २८२८ 'महाभारते,

Title भगवद्गीता १८ टीकासहिता
१८शाध्यायः

Author श्री रणवीरसिंह कारिता

Extent ११५ Age ८

Subject वेदान्त शास्त्रं

सप्तदशोऽध्यायः

शांकरभाष्यं
आनंदगिरिकृतटीका
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषानुवाद ॥

अर्जुन उवाच ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्ध
यान्विताः तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः
१

शाङ्करभाष्यटीका १

तस्माच्छास्त्रं प्रमाणन्त इति भगवद्वाक्यात् लब्धप्रश्नबीजोऽर्जुन उवाच
ये शास्त्रेति ये केचित् अविशेषिताः शास्त्रविधिं शास्त्रविधानं श्रुतिस्मृ
तिशास्त्रचोदनामुत्सृज्य परित्यज्य यजन्ते देवादीन् पूजयन्ति श्रद्धयावि
ताः श्रद्धया आस्तिक्यबुद्ध्यान्विता संयुक्ताः सन्तः श्रुतिलक्षणं स्मृतिलक्षणं वा क
ञ्चित् शास्त्रविधिमपश्यन्तो वृद्धव्यवहारदर्शनादेव श्रद्दधानतया देवादी
न् पूजयन्ति ते इह शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विता इत्येवं गृह्य
न्ते ये पुनः कञ्चित् शास्त्रविधिमुपलभमाना एव तमुत्सृज्यायथावि
धि देवादीन् पूजयन्ति ते इह ये शास्त्रविधिमुत्सृज्य यजन्त इति न परिगृ
ह्यन्ते कस्मात् श्रद्धयान्वितत्वविशेषणात् देवादिपूजाविधिपरं कञ्चित्
शास्त्रं पश्यन्त एव तदुत्सृज्याश्रद्दधानतया तद्विहितायां देवादिपूजायां श्र
द्धयान्विताः प्रवर्तन्ते इति न शक्यं परिकल्पयितुं यस्मात्तस्मात् पूर्वोक्ता एव
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः इत्यत्र गृह्यन्ते तेषामेवम्भू
तानां निष्ठा तु अवस्थानं का कृष्ण सत्त्वमाहो रजस्तमः किं सत्त्वं निष्ठावस्था
नमाहोस्वित् रजोऽथवा तम इति १ ॥

आनन्दगिरिकृतटीका

आस्तिकानां नास्तिकानाञ्च शास्त्रैकचक्षुषां गतिरुक्ता संप्रत्यास्तिकाना
मेव शास्त्रानभिज्ञानां गतिं जिज्ञासया पृच्छन्नर्जुन उवाच तस्मादिति यजन्त इ
ति यागग्रहणं दानादेरुपलक्षणं यदि वेदोक्तं विधिमपश्यन्तस्तमुत्सृज
न्ति कथं तर्हि श्रद्दधाना यागादि कुर्वन्ति नहि मानं विना श्रद्धया यागा
दि कर्तुं शक्यमित्याशङ्क्याह श्रुतीति ननु शास्त्रीयं विधिं पश्यन्तोऽपि के
चिन्मुपेक्ष्य स्वैरपेततया यागादि कुर्वन्तो दृश्यन्ते तेषामिह ये शास्त्रविधि
मुत्सृज्येति ग्रहो भविष्यति नेत्याह ये पुनरिति तेषामत्रापरिग्रहे प्रश्नपू
र्वकं हेतुमाह कस्मादिति शास्त्रज्ञानानामपेतावतो ग्रहेऽपि विशेषण
मविरुद्धमित्याशङ्क्याभावात् तान्मैवमित्याह देवादीति अश्रद्दधानतया त

श्री॰ गी॰ टी॰ सो॰

इत्यस्त्वेति सम्बन्धः शास्त्रोक्तं विधिमधिगच्छतामपि तमवधीर्य स्वेच्छया
देवपूजादौ प्रवर्तमानानामासुरेष्वेवान्तर्भावो यस्मादनन्तराध्याये सिद्धस्तस्मा
च्छास्त्रिकाधिकारे तेषां प्रसङ्गो नास्तीत्युपसंहरति यस्मादिति पूर्वोक्ता
शास्त्रानभिज्ञा वृद्धव्यवहारानुसारिण इति यावत् तैः श्रद्धया क्रियमा
णं कर्म कुत्र पर्यवस्यतीति पृच्छति तेषामिति कानिष्ठेत्येतद्विवृणो
ति सत्त्वमिति १

स्वामिकृतटीका

उक्ताधिकारहेतूनां श्रद्धामुख्यानसात्त्विकी तिसप्तदशे गौणश्रद्धाभेदस्त्रि
धोच्यते पूर्वाध्याये यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः न स सिद्धि
मवाप्नोतीत्यनेन शास्त्रोक्तविधिमुत्सृज्य कामकारेण वर्तमानस्य ज्ञाने
धिकारो नास्तीत्युक्तं तत्र शास्त्रविधिमुत्सृज्य कामकारं विना श्रद्धया व
र्तमानानां किमधिकारोऽस्ति नास्ति वेति बुभुत्सयार्जुन उवाच ये इति ये शा
स्त्रविधिमुत्सृज्य यजन्ते तत्र ये शास्त्रार्थं बुद्ध्वा तमुल्लंघ्य वर्तमानास्त्तत्र सं
तेन तेषां श्रद्धया यजनानुपपत्तेरास्तिकबुद्धिर्हि श्रद्धा न वासौ शास्त्रज्ञान
वतां शास्त्रविरुद्धेऽर्थे संभवति ततेन वाधिकृतस्य त्रिविधा भवति श्रद्धा य
जन्ते सात्त्विका देवानित्यादिवक्ष्यमाणं नपपन्नं स्यात्ततो नात्र शास्त्रो[illegible]ल्लंघिनो गृ
ह्यन्ते अपि त्वालस्यादिना शास्त्रार्थज्ञाने प्रयत्नमकृत्वा केवलमा
चारपरंपरावशेन श्रद्धया क्वचिद्देवताराधनादौ प्रवर्तमाना गृह्यन्ते अ
तोऽयमर्थः ये शास्त्रविधिमुत्सृज्य दुःखबुद्ध्यालस्यादिना हत्य केवल
माचारप्रामाण्येन श्रद्धयान्विताः सन्तो [illegible] यजन्ते तेषां तु का निष्ठा का
स्थितिः कश्चाश्रयः तामेव विशेषेण पृच्छति किं सत्त्वमाहो किं वा रजः
अथवा तमः इति तेषां तादृशी देवपूजादिप्रवृत्तिः किं सत्त्वे स्थिता रजःसंस्थि
ता वा तमःसंस्थिता वेत्यर्थः श्रद्धायाः सात्त्विकत्वात् क्लेशबुद्ध्यालस्येन वा
शास्त्रानादरस्य च राजसतामसत्वात्त्रेधा संदेहः यदि सत्त्वमाश्रिताः
तर्हि तेषामपि सात्त्विकत्वात् यथोक्तात्मज्ञानेऽधिकारः स्यादन्यथा नेति भ
वार्थः १

पिशाचभाष्यमटीका

शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसीति भगवद्वचनं श्रुत्वार्जुन उवाच
शास्त्रविधानमनवेक्ष्य ये देवताः पूजयन्ति तेषां निष्ठा स्थितिः सत्त्वमथ

वा रज आहो तमस्तत्रार्जुनस्य प्रश्नः १

रामानुजभाष्यटीका ५

विधिमुत्सृज्य श्रद्धयान्विता ये यजन्ते तेषां निष्ठा का किं सत्त्वमाहो स्विद्रजः अथ तमः निष्ठा स्थितिः स्थीयते स्मिन्निति सत्त्वादिरेव निष्ठेत्युच्यते तेषां किं सत्त्वे स्थितिः किं वा रजसि किं वा तमसीत्यर्थः एवं पृष्टः श्रीभगवान् अशास्त्रविहितश्रद्धायास्तत्पूर्वकस्य च या गादेर्निष्फलत्वं हृदि निधाय शास्त्रीयस्यैव यागादेर्गुणतस्त्रैविध्यं प्रतिपादयितुं शास्त्रीयश्रद्धायास्त्रैविध्यं तावदाह १

अभिनवगुप्तकृतटीका ६

शास्त्रविधिमनालम्ब्य ये व्यवहारमाचरन्ति तेषां का गतिरिति प्रश्नः १

परमार्थप्रपाटीका २

पूर्वाध्यायान्ते यः शास्त्रविधिमुत्सृज्येत्यादिना शास्त्रविधिमुल्लंघ्य प्रवर्तमानस्य सिद्धिर्नास्तीत्युक्तं तदेव प्रश्नव्याजेनाह ये शास्त्रविधिमिति ये शास्त्रविधिं विधिनिषेधात्मकमुल्लंघ्य

ङः एव बुद्ध्या आलस्याद्वा अश्रद्धानादृत्य केवलं लौकिकाचारपरंपरायां श्रद्धान्विता यजन्ते तेषां का निष्ठा व्यवसायः सत्त्वमाहोस्विद्रजस्तमः यजन्ते सात्विका देवानित्या शिष्टलोपपथानैव वेति भावः १॥

वनमालीटीका ४

सत्त्वादिगुणभेदाद्धि श्रद्धादीनां तदात्मनो त्रैविध्यं माधवो ब्रूते कृपया भक्तवत्सलः त्रिविधाः कर्मानुष्ठातारो भवन्ति केचिच्छास्त्रविधिं ज्ञात्वापि अश्रद्धया तमुत्सृज्य कामकारमात्रेण यत्किंचिदनुतिष्ठन्ति ते सर्वपुरुषार्थायोग्यत्वादसुराः केचित्तु शास्त्रविधिं ज्ञात्वा श्रद्धया तदनुसारेणैव निषिद्धं वर्जयन्तो विहितमनुतिष्ठन्ति ते सर्वपुरुषार्थयोग्यत्वाद्देवा इति पूर्वाध्यायान्ते सिद्धं येतु शास्त्रीयं विधिमालस्यादिवशादुपेक्ष्य श्रद्धया वृद्धव्यवहारमात्रेण निषिद्धं वर्जयन्तो विहितमनुतिष्ठन्ति ते शास्त्रीयविध्युपेक्षालक्षणेनासुरसाधर्म्येण श्रद्धापूर्वकानुष्ठानलक्षणेन च देवसाधर्म्येणान्विताः किमसुरेष्वन्तर्भवन्ति किं वा देवेष्विति उभयधर्मदर्शनाद्देवकोटिनिवेशायकादर्शनाच्च संदिहानोऽर्जुनः पृच्छति यइति ये पूर्वाध्याये निर्णीताः ते देवव्यवस्थानुसारि

श्री· गी· टी· सं·

2

णः शास्त्रविधिमुत्सृज्येति विधानमुत्सृज्यालस्यादिवशादनादृत्य नास्त
रवदश्रद्दधानाः किन्तु वृद्धव्यवहारानुसारेण श्रद्धयान्विता यजन्ते देव
पूजादिकं कुर्वन्ति तेषां न शास्त्रविधिपेक्षा श्रद्धाभ्यां पूर्वं निर्दिष्टं देवासु
रविलक्षणानां निष्ठा का कीदृशी तेषां शास्त्रविध्यनपेक्षाश्रद्धापूर्वि
का च सा यजनादिक्रियाव्यवस्थितिः हे कृष्ण भक्ताघकर्षण किं सत्त्व
सात्त्विकी न यासति सात्त्विकत्वात्ते देवाः अहो स्वितिप्रश्नान्तरे किं रजस्तमः
राजसी तामसी चेति तथा सति राजसतामसत्वादसुरास्ते सत्त्वमित्ये
काकोटिः रजस्तम इत्यपराकोटिरिति विभागज्ञापनायाहोशब्दः १

उत्तमवैजयन्तीटीका १

सात्त्विकादिप्रभेदत्वं वक्तुं तान्निरूपेत्य कृष्णप्रश्नानुसारेण कृष्णः श्री
मद्दशेऽवदत् । एवं तावत्षोडशे ये वेदविहितविधिना वेदोक्तं कर्म कु
र्वन्ति ते दैवीं संपदं प्राप्य मोक्षं प्राप्नुवन्ति ये तु वेदविधिना तदु
क्तं कर्म न कुर्वन्ति ते आसुरीं संपदं प्राप्य नरकं यान्तीत्युक्तमिदानीं शा
ने स्त्रविहितं कर्म कुर्वतां लक्षणं तेषां सत्त्वादिगुणभेदात्त्रैविध्यं शास्त्रवि
हितं कर्म कृतमाहात्म्येन निष्फलत्वं चोच्यते तत्र शास्त्रीयाणां कर्म
णां श्रद्धावतां कस्मिन्गुणे स्थितिरस्ति सत्त्वे वा रजसि वा तमसि वेति
जिज्ञासया पार्थेन उवाच ये शास्त्रविधिमिति ये पुरुषाः शास्त्रविधिं पा
हन्तोः ध्येतस्यातिगंभीराशयत्वेन निरतिशयदुष्प्रवेशस्य वेदस्य विधिम
प्येदं कर्तव्यमिति प्रेरणारूपमुत्सृज्य त्यक्त्वापि प्रमादालस्यादिना प
रित्यज्य श्रद्धयान्विता यज्ञदानादौ कर्म देवासुरपुरुषाभ्यां विलक्षण
त्वेन जनानां निष्ठा स्थितिः का भवति सत्त्वं किं सत्त्वगुणसंश्रया स्थितिः
अहोस्विद्रजोगुणसंश्रया किं वा तमोगुणसंश्रया यथा दिनेषां सात्त्विकी श्र
द्धा न हि दैवसंपद्रूपत्वेन भगवज्ज्ञानाधिकारित्वान्मोक्षार्हत्वं यदि तु राज ने
सी तामसी वा तर्हि आसुरसंपद्रूपत्वेन तज्ज्ञानानधिकारित्वात्संसारार्ह
त्वमिति गूढेन प्रश्नाशयः मध्ये निर्दिष्टेनाहोशब्देन दैवासुरकोटिद्व
यावबोधनं द्योतितम् कृष्णेति संबोधनेन सदानंदरूपत्वात्त्वमेवैतन्त
त्त्वं वेत्सि नान्यः कोपीदृशो ज्ञाता तो मां वदेति सूचितम् १

दि

मधुसूदनीटीका ॥ १

नमः परमात्मने ॐ त्रिविधाः कर्मानुष्ठातारो भवंति केचिच्छास्त्रविधिं त्य
क्त्वाप्यश्रद्धयानमुत्सृज्य कामकारमात्रेण यत्किंचिदनुसारेणैव निषि
द्धं वर्जयंतो विहितमनुतिष्ठंति ते सर्वे पुरुषार्थयोग्यत्वाद्देवा इति पू
र्वाध्याये निसिद्धं ये तु शास्त्रीयं विधिमालस्यादिवशादुपेक्ष्य श्रद्धयान्
न्वैव वृद्धव्यवहारमात्रेण निषिद्धं वर्जयंतो विहितमनुतिष्ठंति शास्त्रीय
विध्युपेक्षालक्षणेनासुरसाधर्म्येण श्रद्धापूर्वकर्मानुष्ठानलक्षणेन च
देवसाधर्म्येणान्विताः किमसुरेषु ते भवेत् किं वा देवेषु इत्युभयधर्मद
र्शनादेककोटिनिश्चायकादर्शनाच्च संदिहानः यत्पूर्वाध्यायेन नि
र्णीताः तदेव वर्ण्यमानसारेण किं तु शास्त्रविधिं श्रुतिस्मृतिचो
दनामुत्सृज्य आलस्यादिवशादनादृत्य नाम सर्वत्र श्रद्धयान्विताः किं तु
वृद्धव्यवहारानुसारेणैव यान्विताः यजंते देवांस्तेषां शास्त्रविधिपरित्या
श्रद्धापूर्विका च या यजनादिक्रिया व्यवस्थितिः हे कृष्ण भक्ता च क
र्षणं किं सत्त्वं राजस नाम सत्त्वादस्वरास्ते सत्त्वमित्येककोटिः रज
स्तमसी अन्यपराकोटिरिति विभागज्ञापनाय पाहोशाहः ॥ १

[margin: द्वंति ^]

[margin: श्र^]

[margin: ^ पूजादिकं कुर्वंतीति तेषां शा
स्त्रविध्युपेक्षा श्रद्धाभ्यां
निश्चित देवासुरवि
नां निष्ठा का कीदृशी]

सदानंदीटीका ॥ ११

स्वयंज्योतिर्ब्रह्म श्रुतिशिखरगीतं निरवधि जगज्जन्मादेहे वं प्रकृति
पुरुषांतर्गतमजं महेशाद्याराध्यं ब्रजयुवतिभिः स्वायममलं महः
श्रीकृष्णाख्यं सुखनिधिमहं नौमि सततं १ त्रिविधाः कर्मकर्तारो
भवंति पुरुषा भुवि केचिच्छास्त्रविधिं त्यक्त्वा श्रद्धाहीना विहाय ते
कामकारेण यत्किंचिदनुतिष्ठंति ते स्मराः केचिच्छास्त्रविधिं त्यक्त्वा
श्रद्धयान्विता योत्तमाः ३ निषिद्धं वर्जयंतो ये उजिष्ठंति यथाविधि ते
पुरुषार्थयोग्यत्वाद्देवा अस्य पिवोधितं ४ आलस्यादिवशाद्येनूपे
क्ष्य शास्त्रविधिं स्वयं श्रद्धयान्विता वृद्धव्यवहारैकदर्शनात् ५ नि
षिद्धं वर्जयंतश्च कुर्वंति विहितं सदा शास्त्रीयापेक्षणेन किं प्रश्ना
सुरेषु वा ६ श्रद्धयान्विता किं वा देवेष्विति विनिर्णयन् अर्जुनः
संदिहानः सन् कृष्णं श्रीहरिं प्रति ७ श्रुतिस्मृतिविधिं त्यक्त्वा यः श्र

[margin: ति ^]

श्री·
गी·टी·
सं
3

लस्यादिनाजनाः देवपूजादिकं वृद्धव्यवहारानुसारतः ८ अश्रद्धानत्याति
त्यक्त्वैव त्यानेदसाराः देवासुरविभिन्नानां तेषां निष्ठास्ति कीदृशी ९
किं सात्त्विकी देवनिष्ठा राजसी वाथ तामसी १०१

नीलकंठीटीका २२

तस्माच्छास्त्रं प्रमाणं ते इति प्रश्नबीजमुपलभ्यार्जुन उवाच ये इति ये
पुरुषाः शास्त्रविधिं शास्त्रपदेनात्र श्रुतिसदाचारकुलाचारागमं ते
सर्वेषां तेषां धर्मे प्रमाणत्वात् तत्र यो विधिगतो विधिर्विधेयं तदुत्सृ
ज्य सर्वात्मना परित्यज्य यजंते पूजयंति तान् कूपादीन् मन्विज्ञाकृतो
यं कूपो गंगाशतादप्यधिकोऽत्रैव स्नानपानावगाहनपवित्रतया प्र
दक्षिणप्रक्रमणरूपादेनास्य सेवनाद् इहविशेषफलं अवश्यं प्राप्स्यामीति ५°
तत्र इष्टतरया श्रद्धयान्विताः संतस्तेषां निष्ठा का कीदृशी किं स
त्त्वं सात्त्विकी वा पि श्रेयरूपेश्वराद्याधिकादर्शनात् किं रजः राजसी वा ते
षां निष्ठा शास्त्रातिक्रमेण कामकाररूपत्वात् अहो इति प्रश्ने किं तमः
तामसी वा शास्त्रनिष्ठा रंगे रजनधीरिवाशास्त्रीयायाश्च त्वेमहत्त्वबुद्धे
विपर्यासरूपाया दर्शनात् यद्यपि त भाष्ये वृद्धव्यवहारदर्शना
देव अश्रद्धानतया देवादीन् यजंते तदुक्तं तत्राप्यविगीत एव वृद्धव्य
वहारो ग्राह्यः अविगीते अस्मिंस्तामसत्वादिशंकायानुयोगात् १

आनंदीटीका ३

तस्माच्छास्त्रं प्रमाणमिति पूर्वाध्यायांत्योपदेशार्थसमन्वयपूर्वि
कयाये प्यन्यदेवताभक्ता यजंते श्रद्धयान्विता इत्यविधिपूर्वक
तोपदेशं लक्षणपरीक्षाविषयी कर्तुमर्जुन उवाच ये शास्त्रविधि
मुत्क्रम्य उत्तमात्वस्मात् परामप्रकारमुत्सृज्य अविधिपूर्वकमेव श्रद्ध
याये यजंते तेषां सात्त्विकी वा राजसी वा तामसी वा निष्ठा स्यादि
त्यर्थः ॥ १ ॥

रामकंठीटीका ४

तदनेनोक्तमिदमपर्यालोचितसकलशास्त्रपौर्वापर्येण शा
स्त्रैकदेशमात्रमाश्रित्य यदुत्लक्षणस्वकर्मपरित्यागाय हितो

येयडुपमस्तंत्वयानष्कास्त्राभासत्वादशास्त्रमेवातियथाप्रतिपा
दितशास्त्रनिस्रयावहितत्वेनतव्याभवितव्यमितिसिद्धांतमत्र
संशयानोर्जुनउवाच येकेचित्कर्मणिशास्त्रोक्तविधिंपरित्यज्य
श्रद्धयानिर्विकल्पफलसंभावनयाव्याख्यातलक्षणयान्विताः
संतैवर्तंतेक्रियासुव्यवहरंतितेषांकानिष्ठाकासिद्धिः किंस
त्वंकिंसात्विकीसिद्धिस्तेषामित्यर्थः आहोस्विद्रजोराजसी ।
अथकिंतमस्तामसी [illegible] ॥

त्वासिकी [illegible]टीका १५ ॥

पूर्वस्मिन्नध्यायेदैवःसर्गःसत्वप्रकृतिर्गीतार्थावधारणेधि
कारी आसुरःसर्गोरजस्तमःप्रकृतिरनधिकृतइत्येवंभ
वतासंक्षिप्तोक्तमर्थ । अधुनादैवासुरसर्गस्यविभागेनाधि
कारानधिकारनिश्चयायपिपृच्छिषुरर्जुनउवाच येकेचिच्छा
स्त्रोक्तविधिमिदंकर्तव्यतारूपमुत्सृज्यत्यक्त्वा श्रद्धयास्तिक
बुद्ध्यान्विताःसंतोयजन्ते देवताराधनात्मिकांयागक्रियांका
मकारतोनुतिष्ठंति तेषांकानिष्ठाकास्थितिःकआश्रयः ।
तामेवविशेषेणपृच्छति किंसत्वंकिंवारजःकिंवातमः किं
सत्वसंश्रिताःरजस्तमसीवा [illegible]
[illegible]नुवाच ॥

पंचोलेटीका

ज्ञानाधिकारकारणंतस्याख्यास्त्रविधानोक्तकर्मज्ञानात्मातिको
श्रद्धानकोदेवगतिनिर्गतंविधिश्रद्धाममरणाध्यायेनिरू
पितेतत्रेषोद्भूताध्यायोनेकामकारेणप्रवर्तमानस्यज्ञानेधिका
रोनास्तिपृथ्याशास्त्रंप्रवर्तमानस्याधिकारोस्तीत्युक्तेतत्रपुनः ।
कृतिस्मरणांशास्त्रविधिमुत्सृज्यकामोऽक्रेरविनाश्रद्धयावर्तमा

गी॰
सं॰टी॰

नानां किमप्यधिकारोऽस्ति न वेति संदिहानोऽर्जुनः पृच्छतीति अत्र यशा
स्त्रविधिमुत्सृज्य यजन्त इत्यनेन शास्त्रार्थं बुद्ध्वा तमुल्लंघ्य वर्तमानाः
न गृह्यन्ते वा कश्चिद्धि अज्ञानवशात् शास्त्रमुल्लंघ्य वर्तमानस्यासंभ
वतीत्याह ये शास्त्रेति तस्माच्छास्त्रं प्रमाणं ते इति भगवद्वाक्याल्ल
ब्धबीज अर्जुन उवाच हे कृष्ण ते जनाः श्रुतिस्मृतिलक्षणं शास्त्र
विधिमपास्यैते वृद्धव्यवहारदर्शनात् एव श्रद्धयान्वितया आस्ति
कबुद्ध्या संयुक्ता ये देवादीन् यजन्तीति तेषां एवं भूतानां का निष्ठा
किं सत्त्वमवस्थानं उत रजः उत तमः देवादीनां पूजा किं सात्विकी
राजसी तामसी वेत्यर्थः १

रणवीरसमिद्बोधिनी ॥

श्रीकार्तवीर्यार्जुनाय नमः । रणवीरस्य समितः प्रोल्लासो विजयस्य
सो यदीत्यत्प्रसादतः स्मोपितुः साध्यमपि साधये । एवमर्जुनस्य
युद्धविषये धर्माभासेन जाताधर्मतावगतः स कारुण्यान्निहितावत्ते
तरं स्वयमेव वचेद्यम् धर्मः स्यान्न तत्परमपुरुषोऽयं धर्मसंस्थापनार्थ
मेवाहं तावतारः किमिति निंद्यमपि मत्सारथ्याचरणं स्वीकृत्यास्य
बांधवं परमप्रेमास्पदं च मामस्मिन्समरे नियोजयेत् ततः स्यादेव क
श्चिद्धेतुरत्रेति संजातविचिकित्सावशेन कार्पण्यदोषोपहतस्व
भाव इत्यादिना भगवन्तमेव शरणमापन्न कार्याकार्यव्यवस्थि
तौ प्रमाणतया तद्वाक्यस्यैवैकमात्रमुपक्रम्य भगवताध्यायपंच
दशकेन वैराग्यपूर्वकनिवृत्तिः संपाद्यतामापाद्य यः शा
स्त्रविधिमित्यनेन शास्त्रोल्लंघनेऽपि ऐहिकामुष्मिकापवर्गिकविवि
धफलहानिमुक्त्वा तस्माच्छास्त्रं प्रमाणं ते इत्यनेन शास्त्रस्य का
र्याकार्यव्यवस्थापकत्वं प्रतिपादयत्तदुपसंहारे स्वधर्मानुष्ठा
नमुपसंहृते तत्र तावत्पर्यालोचितसकलशास्त्रपौर्वापर्येण शा
स्त्रैकदेशमात्रमाश्रित्य युद्धादिलक्षणस्वकर्मैव वा परवर्णोचिते
नाफलाभावप्रभावसंभावनाहलक्षणपृहेके रहकमाचरता

किं लक्षणा सिद्धिरिति संप्रायानोऽर्जुन उवाच ये शास्त्रविधिमि
ति प्रशस्तं नाम सदा साक्षात्कृतत्वया स्थितार्थेन स्वस्य परमगु
रोः परस्यामस्याविसंवादिवचनं वेदरूपं श्रुतिमूलत्वात्स्मृतेः
तद्यथोवित्याद्युक्तं वेदलक्षणं ज्ञेयं तस्य शास्त्रस्य विधिं नत्यति
पादितमनुष्ठेयपौर्वापर्यमुत्सृज्य उक्करवज्ञानात्प्रमादालस्या
दिना वानादृत्य श्रद्धयान्वितास्त्रियालं समरोधमस्तेन वाभिमत
सिद्धिरित्येवं वचनमात्रे फलावप्रयं भावनिश्चयलक्षणयान्वि
ताः युक्ताये केचन वीरा वर्तंते स्वधर्मभूते युद्धादिके परधर्मभूते
तपश्चरणादौ वा कर्मणि विषये प्रवृत्तिमंतो भवंति यजंते इति
पाठे तद्देवतां तत्पाणिभजंते यद्वा यजंते प्रसिद्धदेवतामनं साम
स्तुत्य पारादीयन्नापि संयायद्युद्धं यजंते समारभंत इत्यर्थः हे कृ
ष्ण तेषां कानिष्ठा किं लक्षणा सिद्धिः किं सत्त्व माहो रजः उत त
मः सत्त्वादिगुणमध्ये किंगुणानुरूपेत्यर्थः अत्रायं भावः फलसं
भावना पूर्वं स्वधर्मे प्रवर्तनात्सात्विकाः कर्मोक्तं यनेन राजस्या
त्के पाज्ञानेनानस्यादिनाचतामस्यासिद्धाव प्रयं भाव्य मिति
तत्रत्रयाणामेव निमित्तानां संभवात्संदेहस्य चैविषमिति ॥१॥

मध्वभाष्य

उक्तमेवार्थं प्रपंचयत्यनेनाध्यायेन शास्त्रविधिमुत्सृज्य
ज्ञात्वैव वेदं कृत्स्नमपि गंतव्यः सरहस्यो द्विजन्मनेति
विधिमुत्सृज्योक्तेः ये वै वेदं न पठंते न चार्थं वेदो सिता
स्तान् विद्धि शास्त्रहून बुद्धीनिति च माधुच्छंदसश्रुतिः अन्य
था तामसा इत्येवोच्येत न तु विभज्य यदि सात्विकास्तर्हि
नोत्सृष्टशास्त्राः न हि वेदविरुद्धो धर्मः वेदोऽखिलो धर्ममूलं
स्मृतिशीले च तद्विदामिति हि श्रुतिः वेदप्रणिहितो धर्मो
ह्यधर्मस्तद्विपर्यय इति भागवते अतो विभज्याह ॥१॥

भाषाअनुवादटीका

तत्वज्ञान के अधिकारी होने मे जो सात्वकी श्रद्धा है सोई मुख्य कारण है यह पूर्व कहा है इससे अब सत्रहें अध्याय मे भगवान श्रद्धा के तीनि भेद कहैंगे और जो सोरहें अध्यायमे यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः इस तेईसयें श्लोक से कहा कि वेद शास्त्रकी विधि छोडि अपनी इच्छाके अनुसार कर्म्म करने वाले को तत्वज्ञान नहीं होता है तो विधित्याग करि श्रद्धा से कर्म्म मे वर्तमान जनो को तत्वज्ञानका अधिकार है कि नहीं यही ज्ञान होनेकी इच्छा से अर्ज्जुन कहते हैं कि जो मनुष्य वेदशास्त्रकी विधिको दुख समझकर अथवा आलस्य से त्याग करिके केवल लोकाचार के अनुसार श्रद्धायुक्त होय यज्ञ दान आदि कर्म्म करते हैं उनकी निष्ठा कहे स्थिति कैसी होती है इसीको पूछते है कि हे कृष्ण उनकी जो देव पूजा अथवा यज्ञ आदि है सो सात्विकी राजसी किम्वा तामसी है यह तीन प्रकार की शंका होती है जो ये पूर्वोक्त कर्म्मकारी लोग सतो गुणी होय तो सात्विक है तसे तत्वज्ञान मे उनका अधिकार होसके है और जो सतोगुण युक्त न हों य तो नहीं होशकता है यह पूछने का तात्पर्य है १

दोहा

जोशास्त्र विधिको त्यागके यज्ञकरें श्रद्धाहीन तिनकी क्या गति कृ
ष्ण दे सतरज [illegible] तम कहो तीन १॥

श्रीभगवानुवाच त्रिविधा भवति श्रद्धा देहिनां सा
स्वभावजा सात्त्विकी राजसी चैव तामसी चेति तां शृ
णु २

शाङ्करभाष्यटीका १

एतदुक्तं भवति या तेषां देवादिविषया पूजा सा किं सात्विकी आहोस्वि
द्राजसी उत तामसीति सामान्यविषयोऽयं प्रश्नो नाप्रविभज्य प्रतिवच
नमर्हतीति त्रिविधेति श्रीभगवानुवाच त्रिविधा त्रिःप्रकारा भ
वति श्रद्धा यस्यां निर्णयं त्वं पृच्छसि देहिनां सा स्वभावजा जन्मा
न्तरकृतो धर्मादिसंस्कारो मरणकालेऽभिव्यक्तः स्वभाव उच्यते
ततो जाता स्वभावजा सात्विकी सत्वनिर्वृत्ता देवपूजादिविषया
राजसी रजोनिर्वृत्ता यक्षरक्षःपूजादिविषया तामसी तमोनिर्वृ
त्ता प्रेतपिशाचादिपूजाविषयैवं त्रिविधां तामुच्यमानां श्रद्धां
शृणु सैवं त्रिविधा भवति २

आनंदगिरिकृतटीका २

कार्याणां कारणैर्व्यपदेशमाश्रित्य तात्पर्यमाह एतदिति विशेषनिष्ठ
मुत्तरं सामान्येन वक्तुं न शक्यमित्याशयेन परिहरति सामान्येति कि
मिति श्रद्धात्रैविध्यं प्रश्नानुपयुक्तमुच्यते तत्राह यस्यामिति श्रद्धापू
र्विकायां क्रियायामिति यावत् श्रद्धात्रैविध्ये हेतुमाह सा स्वभाव
जेति स्वभावशब्दार्थं प्रकृतोपयोगितया कथयति जन्मान्तरेति
कथं त्रिविधेत्यपेक्षायामाह सात्विकीत्यादिना कथमुक्ता श्रद्धा स्व
भावजेति तत्राह तामिति २

स्वामिकृतटीका ३

प्रश्नोत्तरं श्रीभगवानुवाच त्रिविधेति अयमर्थः शास्त्रानपेक्षतया केवलं लोकाचारमात्रेण तु प्रवर्तमानानां
प्रवर्तमानानां परमेश्वरपूजाविषया सात्विकी एकविधैव श्रद्धा
लोकाचारमात्रेण तु प्रवर्तमानानां देहिनां या श्रद्धा सा तु सात्विकी

श्री०
गी० टी०
से

राजसी तामसी चेति त्रिविधा भवति तत्र हेतुः स्वभावजा स्वभावः पूर्व
जन्मकृतधर्माधर्मसंस्कारः मरणकाले अभिव्यक्तः प्रादुर्भूतः सन् स्वभा
व उच्यते तस्माज्जाता स्वभावजा स्वभावमन्यथा कर्तुं हि समर्थं शास्त्रा
र्थविवेकज्ञानं [illegible] तेषां नास्ति अतः केवलं पूर्वस्वभावेन भवन्ती श्रद्धा
त्रिविधा भवति तामिमां त्रिविधां श्रद्धां शृणु अनेन इत्थं व्यवसायात्मिका
बुद्धिरेकेह कुरुनन्दनेत्यादिना २

पिशाचभाष्यम्टीका ४

तस्य प्रतिवचनं श्री० श्रद्धा या आस्तिक्यबुद्धिः स्वभावजा जन्मान्तरानु
ष्ठितपुण्यपापसंस्कारो मरणकाले अभिव्यक्तः स्वभाव उच्यते सा च
सत्त्वे भवा सात्त्विकी २

रामानुजभाष्यम्टीका ५

त्रिविधेति सर्वेषां देहिनां श्रद्धा त्रिविधा भवति सा च स्वभावजा
स्वभावः स्वासाधारणो भावः प्राचीनवासनानिमित्तस्तत्तद्रुचि
विशेषः यत्र रुचिस्तत्र श्रद्धा जायते श्रद्धा हि स्वाभिमतं साधयतीति
ति विश्वासपूर्विका साधने त्वरा वासनारुचिश्च श्रद्धा
चात्मधर्मा गुणसंसर्गजाः तेषामात्मधर्माणां वासनादीनां जन
का देहेन्द्रियान्तःकरणविषयगता धर्माः कार्यैकनिरूपणीयाः
सत्त्वादयो गुणाः सत्त्वादियुक्तदेहाद्यनुभवजस्वभावः ततः श्रद्धा सा
त्त्विकी राजसी तामसी चेति त्रिविधा तामिमां श्रद्धां शृणु सा श्रद्धा य
स्वभावानुगतं स्वभावं शृणु इत्यर्थः २

अभिनवगुप्तकृतटीका ९

तद्देशो नरं श्रद्धानुसारेण दीयते तत्र चायमाशयः शास्त्रं नाम कि
लपट्टपातारूषितबुद्धिपूर्वकत्वविहीनेन तथा परामर्शदार्ढ्य
पर्वबोधस्थाने याद्देवहृदयरामस्थं न तथा फलादिस्वभावं श्रद्धावि
मर्षतिः चान्दवाक्तत्वपरमार्थपरमब्रह्मस्वभावं स्वतन्त्रप्रस

भगवान् अश्रुणस्त्वविहि
श्रद्धायास्तत्पूर्वकस्य च
नादेर्निष्फलत्वं हृदि नि
शास्त्राद्यधिसत्त्वयोगादे
तस्यैव विधिप्रतिपादयि
यश्रद्धात्रैविध्यता
ह॥

ऽनयोनताद्दोयस्वभावाद्बहिः प्रसरपर्यंतं सत्त्वस्त्रगुणवादिरूपाद्यवहा
रप्रसिद्धप्रवादपरम्परापर्यंतं यदाह तद्धितं वस्तु निशीले इति नत्रस्व
नपवहिताहितोपदेशाय कार्याकार्यविवेचके यत्र स्वभावत एव सत्वा
तिरेकस्तत्कुमाररूढ़ं यस्तेनाचरितं शास्त्रितमेव अप्यत्र राजस्तमः क
लुषीकृतः शास्त्रोक्तमप्याचरन्नाचरति शास्त्रार्थस्य कार्त्स्न्येनानुष्ठानात्
शास्त्रं हि सत्त्ववतामेव फलवदिति शास्त्रमेवाह यस्य हस्तौ च पादौ च मन
श्चैव सुसंयतम् विद्या तपश्च शीलं च स तीर्थफलमश्नुते नान्यो संयत
त्वात् तस्माच्छास्त्रतः परित्यक्तकामक्रोधमोहेष्वेव सफल इति नान्यथैम
ध्यायस्यान्ते दैवेतरत्वेनाख्यातेस्य ष्टार्थत्वान्न विविच्यते केवलं पापाद्विप्र
तिपत्तिनिवारणायैव लिख्यते २

परमार्थप्रपाटीका १

न तु शास्त्रविधेरुल्लंघ्य नैव शास्त्रार्थमबुद्ध्वा वा नायं यजनासंभवात् नापरः
श्रद्धानुत्पत्तेः आस्तिकबुद्धिर्हि श्रद्धा न चासौ शास्त्रज्ञानवतां शास्त्रविरुद्ध
संभवतीति पर्यालोच्य भगवानाह त्रिविधेति देहिनां मनुष्याणां स्वभा
वजा श्रद्धा त्रिविधा भवति प्राचीनसंस्कारः स्वभावस्तस्माज्जाता स्व
भावजा स्वभावमन्यथाकर्तुं समर्थं शास्त्रोत्थज्ञानं न तु तेषां
नास्ति अतः केवलं सत्त्वरजस्तमः प्रधानप्राचीनसंस्कारेण
श्रद्धा त्रिविधां शृणु २ ॥

वनमालीटीका २

ये शास्त्रविधिमुत्सृज्य श्रद्धया यजंते ते न श्रद्धामेलाद्भियुते नत्र ये सात्त्विका
श्रद्धयान्वितास्ते देवाः शास्त्रोक्तसाधने प्रिक्रियं ते तेन तत्फलेन च युज्यंते
ये तु राजसतामसास्ते श्रद्धयान्विता अपि तेन शास्त्रीयसाधने प्रि क्रि
यं ते न चा न तत्फलेन युज्यंत इति विवेकेनात्त्युं नस्य संदेहमपाकर्तुमा
ह त्रिविधेति यया श्रद्धयान्विताः शास्त्रविधिमुत्सृज्य यजंते सा देहिनां
स्वभावजा जन्मांतरकृतैर्धर्मादिशुभाशुभसंस्कारैरिदानीं तनज धर्मी
न्मारंभकस्वभावः स त्रिविधः सात्त्विको राजसस्तामसश्चेति तेन जनि
ता श्रद्धा त्रिविधा भवति सात्त्विकी राजसी तामसी च कारणानुरूपत्वा
त्कार्यस्य तत्र श्रेजन्मनि शास्त्रसंस्कारमात्रजा विद्यमाना कारणैकरू

श्री· गी·टी· स·

पत्वादेकरूपा सात्विकी राजसी तामसी चेति प्रथमचकारार्थः शास्त्रनि रपेक्षा प्राणिमात्रसाधारणी स्वभावजा सैव स्वभाववैचित्र्यात् त्रिविधे त्येवकारार्थः उक्तविधात्रयसमुच्चयार्थश्चरमश्चकारः यतः प्राग्भवी यवासनाख्यस्वभावाभिभावकशास्त्रीयविवेकविज्ञानं देहिनां ना स्ति अतस्तेषां स्वभाववशात् त्रिधा भवंतीनां श्रद्धां शृणु उक्तत्वाच्च देवासु रस्वभावं स्वयमेवावधारयेति भावः २

ऊसमवैजयंतीटीका १

एवमर्जुनेन पृष्टो भगवान् शास्त्रीश्रद्धायास्तत्पूर्वकयागादेः कर्मण श्च निष्फलत्वं मनसि निधाय सत्वादिगुणतः शास्त्रीयकर्मणस्त्रैवि ध्यं प्रतिपादयितुमादौ शास्त्रीयश्रद्धायास्त्रिविधत्वमेवाह त्रिविधेति ये देहिनः प्रदालस्यक्लेशादिभ्यः शास्त्रविधिमुत्सृज्य यथाश्रद्धं यादे वादीन् यजंते तेषां देहिनां मनआदित्रिगुणात्मिका प्रकृतिसंसृष्टानां देहवतां प्राणिनां सा श्रद्धा सात्विकी राजसी तामसी चेत्येवंरूपेण त्रि विधा त्रिप्रकारिका भवति ननु श्रद्धायास्तत्वगुणाहृतित्वादेकविधत्वं प्रसिद्धं कथमस्यास्त्रैविध्यं त्वं वदसीति चेत्तत्राह स्वभावजा स्वस्यात्म नो भावः प्राचीनशुभाशुभकर्मनिमित्तकसंस्कारस्तस्माज्जातोऽस्यत्रा यद्यपि सत्वगुणाहृतिरेकविधैव श्रद्धा तथाप्यंतःकरणस्य धर्मिण स्तद्धर्मस्य स्वभावस्य च सत्वादिगुणतस्त्रैविध्याज्जातायास्तस्या अपि त्रै विध्यं न संगतमित्याशयः तां च समग्रामिमां श्रद्धां शृणु सावधाने न त्वं श्रवणं कुरु ननु स्वभावजायाः गुणतस्त्रैविध्यत्वेपि कर्मानेकवि धत्वेन तस्या अप्यनेकविधत्वापत्तेर्नात एवकारो योग्यश्च व्यवच्छेदार्थ कः शंखः पारणेकपदेति चेन्नैवं स्वभावमनपेक्ष्याकर्तितमाशास्त्रजन्य विवेकज्ञानविषयिणी शास्त्रोक्तानुष्ठानकारयित्री ज्ञानभक्तिजनक त्वेन परंपरया मुक्तिप्रदा श्रद्धा स्वभावजायास्त्रिविधाया भिन्ना भ वतीति सूचितम् २

मधुसूदनीटीका १

ये शास्त्रविधिमुत्सृज्य श्रद्धया यजंते तेषु श्रद्धाभेदा दर्श्यंते तत्र ये सा त्विकाः श्रद्धयान्विताः ते देवाः शास्त्रोक्तसाधनैः अधिक्रियंते तत्फले

नच युज्यंते येन राजसास्तामसा वा श्रद्धयान्वितास्ते असुराः न शास्त्रीय
साधने ऽधिक्रियंते न वा तत्फलेन युज्यंते इति विवेकेनार्जुनस्य संदेह
मपनिनीषुः श्रद्धाभेदं यया श्रद्धयान्विताः शास्त्रविधिमुत्सृज्य यजं
ते सा श्रद्धा देहिनां स्वभावजा जन्मांतरकृतो धर्माधर्मादिशुभाशुभ
संस्कार इदानींतनजन्मारंभकः स्वभावः स त्रिविधः सात्त्विको राजस
स्तामसश्चेति तेन जनिता श्रद्धापि त्रिविधा भवति सात्त्विकी राजसी ता
मसी च कारणानुरूपत्वात्कार्यस्य यास्त्वारब्धे जन्मनि शास्त्रसंस्का
रमात्रजा विदुषां सा कारणैकरूपत्वादेकरूपा सात्त्विक्येव न राजसी
तामसी चेति प्रथमचकारार्थः शास्त्रनिरपेक्षाणां प्राणिमात्रसाधा
रणी स्वभावजा सैव स्वभावस्याभिभावके शास्त्रीये विवेकविज्ञानम
नादृतशास्त्राणां देहिनां नास्ति अतस्तेषां स्वभाववशात्त्रिविधा भ
वंतीं तां श्रद्धां शृणु उक्त्वा च देवासुरभावे स्वयमेवावधारयेत्यर्थः २

सदानंदीटीका ॥

सात्त्विका श्रद्धया युक्ता देवाः शास्त्रोक्तसाधने अधिक्रियंते युज्यंते
तत्फलेन च साधकाः १ राजसा ये तु तामसा श्रद्धया संयुताश्च ते
नाधिक्रियंते शास्त्रीये युज्यंते न तत्फलेन न २ इत्येवं हि विवेकेनास्व
भक्तस्यार्जुनस्य च संदेहोच्छित्त्यै श्रद्धाभेदं श्रीश उवाच ह ३ शास्त्रो
क्तविधिमुत्सृज्य यजंते श्रद्धया यया जन्मांतरीयधर्मादिसंस्कारा
पोभुनातने ४ जन्मारंभकः सोयं स्वभावस्त्रिविधो गुणैः
सात्त्विको राजसश्चैव तामसश्चेति तेन सा ५ त्रिविधोत्पादिता
श्रद्धा सात्त्विकादिभिर्वती श्रद्धानां त्वं शृणु उक्त्वा स्वयमेवाव
धारय ६ देवासुरस्वभावेन सा यथा भवति त्रिधा १ २

नीलकंठीटीका ॥

एवं सामान्यतः पृष्टे सामान्येनैवोत्तरं श्रीभगवानुवाच त्रिविधेति स्वभावः
प्राग्भवीयो धर्माधर्मादिस्तज्जाता स्वभावजा यदि प्राग्भवे सात्त्विको देव
तापूजादिधर्मोऽनेनानुष्ठितस्तर्हि तस्य श्रद्धा सात्त्विक्येव श्रद्धा भवति य
दि राजसो यक्षादिपूजारूपस्तर्हि राजस्येव यदि तामसो भूतप्रेतादिपूजारू
पस्तर्हि तामसी श्रद्धा भवति एवं त्रिविधा श्रद्धा देहिनां देहाभिमानवतां

श्री० गी० टी० सं

९

भवतिनामयाव्याख्यास्यमानांशृणु २

अत्रोत्तरंभगवानुवाच

आनंदीटीका १३

त्रिविधाहिमतीश्रद्धादेहिनांस्वस्वभावसदृशीभवति सात्विकानांसात्विकी राजसिकानांराजसी तामसिकानांतामसी तालक्ष्यमाणाः शृणु २ ॥

रामकंठीटीका १४

अत्रोत्तरंभगवानुवाच — यथाश्रद्धयैवकेवलयाविनानोसिद्धत्वसंपन्नमितनः सात्रिविधाभवति तद्यथा सात्विकीराजसीतामसीचेति यतोदेहिनांसायोजाविततनानादेहाहंप्रत्ययनिर्वंधनभेदानांजीवानांस्वभावजासौ तेहिदेवासुरसर्गभेदेनप्रतिपादितस्वरूपाः तत्रदैवसर्गभाजांसात्विकसत्वादागतः सत्वगुणहेतुकः स्वभावः स्वरूपंयेषांतेषांश्रद्धातादृश्येव तथासुरसर्गभाजांराजस्तमोगुणप्राधान्यात्तद्धेतुकोद्विप्रकारः स्वभावोराजसस्तामसश्चश्रद्धापितेषांतादृश्येव तेनेदमुक्तंभवति सात्विकस्वभावानांसात्विकीश्रद्धासाशास्त्रविध्युपपन्नैवभवति यातुराजसस्वभावानांसाराजसीशास्त्रविध्याभासयुक्ताभवतितत्सम्यग्विधानोपपन्ना तामसीतुशास्त्रविधिहीनैवेतिविभागस्यवक्ष्यमाणत्वादतोयाशास्त्रविधिहीनासासात्विकीनभवति यातुशास्त्रविधियुक्तासानराजसीनापितामसीत्येवंत्रिविधस्वरूपास्ताः श्रद्धामयाविभज्योच्यमानास्त्वमवधारय [illegible] २॥

लासिकी [illegible]टीका १५ ॥

अत्रोत्तरंश्रद्धानुसारेणश्रीभगवानुवाच — देहिनांदेहाहंभावेननित्यसम्बद्धानांजीवानांसाश्रद्धासत्वगुणकार्यभूता यदुक्तंश्रीभगवतैवशमोदमस्तितिक्षाध्यानपःसत्यंदयास्मृतिःतुष्टिस्त्यागोस्पृहाश्रद्धाह्रीर्दयानिर्हृतिर्धृतिर्मेततः सत्वस्यप्रकृतयइति स्वभावजास्वभावात्स्वरूपविस्मरणरूपाजीवत्ववीजभूतात्मकृताख्याज्ञाता साचत्रिविधाभवति सत्वोद्रेकात्सात्विकी रजसउद्रेकाद्राजसी तमसउद्रेकात्तामसी

तितामेवश्रद्धामास्तिकाबुद्धिंत्रिविधांमनःस्पृण [illegible]
गुणकार्यभूतायाःश्रद्धायाःकथंराजसतामसत्वा
भ्यांनिर्देशइत्यतआह २॥

पंचोलिटीका

श्रद्धात्रैविध्यंवदन्श्रीभगवांस्तत्रोत्तरमाह त्रिविधेति यस्याःश्र
द्धायांनिष्ठाभवत्यनेनएवक्षसिसाश्रद्धादेहिनांत्रिविधाभवा
तिस्वभावजाजन्मांतरकृतधर्मादिसंस्कारोमरणकालेअभि
व्यक्तःप्रादुर्भूतःस्वभावइत्युच्यते तस्माज्जातास्वभावजासात्वि
कीदेवादिपूजाविषयाराजसीयक्षरक्षःपूजाविषयातामसी
प्रेतपिशाचादीनांपूजाविषयाएवंत्रिविधांश्रद्धामुच्यमानांशृणु २

रसगावीरससिद्धोयिनी॥

अथोत्तरंभगवानुवाच त्रिविधेति स्पष्टार्थोयंश्लोकः किंतत्स्वभा
वजेतिस्वाभावोजन्मांतरीयसंस्कारस्तस्माद्धेतोरुत्पन्नेत्यर्थः
तत्रदैवस्वभावानांसात्विकीश्रद्धा साचशास्त्रविधियुक्तैवभव
ति आसुरस्वभावानांतुराजसी तामसीचक्रमेणशास्त्रविध्या
भासयुक्तासर्वथाशास्त्रविधिहीनैवचभवति किंयुक्तंभवति
ययाश्रद्धयायुक्तानास्तिकोसंपादितोसि तस्याप्येवंत्रैविध्येनस्थि
तेरपिताटस्थ्यमितिनिमित्तांतरंतत्रनास्तीति २॥

मध्वभाष्य

त्रिविधेत्यादिना सत्वादिरूपावित्तानुरूपा योयच्छ्र [illegible]
मपवसः सात्विकश्रद्धःसात्विकइत्यादिकःसात्विक
श्रद्धइत्यादिविभज्याह २॥

भाषाअनुवादटीका

इसका उत्तर भगवान श्रीकृष्ण कहते है कि यह जो वेदशास्त्र के क्रमसे भगवद्दर्शन करने वालों की सात्विकी श्रद्धा एकही प्रकार की है पर हां लोकाचार अनुसार कर्म्म अनुष्ठान करने वालों की जो श्रद्धा सोई सात्विकी राजसी तामसी तीन प्रकार की होती है जिसका कारण यह है कि स्वभाव काहे पूर्वकर्म्म के संस्कार वशते उत्पन्न जो श्रद्धा उसको स्वभावजा कहते हैं इससे स्वभाव को अन्यथा करने मे निश्चित समर्थ जो शास्त्रोक्त विवेक ज्ञान सो लोकाचार कर्म्म करने वालों को नहीं है इससे शुद्ध पूर्व स्वभाव के क्रमसे उत्पन्न जो श्रद्धा सो तीन प्रकार होती है सो तीन भेद हमसे सुनो परन्तु भगवन अर्चन विषयक सात्विकी श्रद्धा जो एकही प्रकार है सोभी व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन इस दूसरे अध्यायके एकतालीशयें श्लोक में कही गई है यह जानो २

दोहा

श्रद्धा त्रिविधा होतहै, जनके स्वभावकर सात्विकी राजसी तामसी ताको सुनतूं फेर २ ॥

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत श्रद्धाम
योऽयं पुरुषो यो यच्छ्रद्धः स एव सः ३ ॥

शांकरभाष्यटीका १

सत्त्वेति सत्त्वानुरूपा विशिष्टसंस्कारोपेतान्तःकरणानुरूपा सर्व
स्य प्राणिजातस्य श्रद्धा भवति भारत यद्येवं ततः किं स्यादित्युच्यते
श्रद्धामयः श्रद्धाप्रायः अयं पुरुषः संसारी जीवः कथं यो यच्छ्रद्धो या
श्रद्धा यस्य जीवस्य स यच्छ्रद्धः स एव तच्छ्रद्धानुरूपः स एव स जीवः ३

आनंदगिरिकृतटीका २

प्राचीनकर्मोद्बोधिता त्रिविधा वासना स्वभावशब्दिता त्रिविधायाः
श्रद्धाया निमित्तमित्युक्तमिदानीमुपादानं तस्या दर्शयति सत्त्वमिति
विशिष्टचित्तोपादाना श्रद्धा ततस्त्रैविध्ये त्रिविधेति पूर्वार्द्धस्यार्थः
कथं निष्ठायां सात्त्विकादिप्रश्नद्वारा श्रद्धायास्त्रैविध्यनिरूपणमु
पयुक्तमिति मन्वानः शङ्कते यद्येवमिति श्रद्धेयं विषयमभिध्याय
स्थिता तत्रैव वर्तत इति मन्वानः परिहरति उच्यत इति श्रद्धामयत्वं
प्रश्नपूर्वकं कथयति कथमिति श्रद्धा खल्वधिकृते पुरुषे प्राचु
र्येण प्रवृत्तेति तस्य श्रद्धामयत्वसिद्धिरित्यर्थः ३

स्वामिकृतटीका ३

ननु च श्रद्धा सात्त्विक्येव सत्त्वकार्यत्वेन तत्त्वविद्भिः श्रीभगवतोद्धवं प्रति नि
र्दिष्टत्वात् यथोक्तं शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः तु
ष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिरित्येताः सत्त्वस्य वृत्तय
इत्यतः कथं तस्यास्त्रैविध्यमुच्यते सत्यं तथापि रजस्तमोयुक्तपुरुषा
श्रितत्वेन सत्त्वस्य त्रैविध्यात् श्रद्धाया अपि त्रैविध्यं घटत इत्याह सत्त्वा
नुरूपेति सत्त्वानुरूपा सत्त्वतारतम्यानुसारिणी सर्वस्य विवेकिनोऽविवेकिनो
वा लोकस्य श्रद्धा भवति तस्मादयं पुरुषो लौकिकः श्रद्धामयः श्रद्धा
विकारस्त्रिविधया श्रद्धया विक्रियत इत्यर्थः तदेवाह यो यच्छ्रद्धः
यादृशी श्रद्धा यस्य स एव सः तादृश्या श्रद्धया युक्त एव सः यः पूर्वं सत्त्वो

त्कर्षेण सात्त्विकश्रद्धया युक्तं पुरुषः स पुनस्तादृश एव स्वसंस्कारेण सा
त्त्विकश्रद्धायुक्त एव भवति यस्तु रजस उत्कर्षेण राजसश्रद्धायुक्तः
स पुनस्तादृश एव भवति यस्तु तमस उत्कर्षेण तामसश्रद्धायुक्तः
स पुनस्तादृश एव भवतीति लोकाचारमात्रेण प्रवर्तमानेषु एवं सा
त्त्विकराजसतामसश्रद्धाव्यवस्था शास्त्रजनितविवेकज्ञानशून्या
नां तु स्वभावविजयेन सात्त्विक्येव श्रद्धेति प्रकरणार्थः ३

पैशाचभाष्यमटीका ४

सत्त्वानुरूपा स्वभावानुरूपा श्रद्धा प्राचुर्येण यस्मिन्पुरुषे या सा श्र
द्धा यथा धर्मादावस्तीति बुद्धिः श्रद्धया यस्य सा सात्त्विकी राजसी ताम
सी वा स यच्छ्रद्धः स एव पुरुषः सैव श्रद्धानुरूपकर्मफलभा
क्त्वेवं तयार्थे से निवर्तकत्वे कथं स एव सशक्तिनायं दोषः स
र्वेनाम्नाभिधेय[illegible]त्वात् ३

रामानुजभाष्यमटीका ५

सत्त्वेति सत्त्वमन्तःकरणं सर्वस्य पुरुषस्यान्तःकरणानुरूपा श्रद्धा
भवति अन्तःकरणं यादृशगुणयुक्तं तद्विषया श्रद्धा जायत इत्यर्थः
सत्त्वशब्दः पूर्वोक्तानां देहेन्द्रियादीनां प्रदर्शनार्थः श्रद्धामयोयं पुरुषः
श्रद्धामयः श्रद्धापरिणामः यो यच्छ्रद्धः पुरुषो यादृश्या श्रद्धया यु
क्तः स एव सः स तादृशश्रद्धापरिणामरूपकर्मविशेषः श्रद्धा
युक्तश्चेत्पुण्यकर्मफलसंयुक्तो भवतीति श्रद्धाप्रधानः फलसंयोगः
इत्युक्तं भवतीति योगं तदेव विवृणोति ३

अभिनवगुप्तकृतटीका ६ ॥ सत्त्वानुयेत्यत्र सत्त्वशब्दः स्वभाव
[illegible]हार्थे ३ ॥ पर्यायः अयं पुरुषो ह्यात्मा श्रद्धया यत्नाप्रापारोपपरिवर्तिन्या वशं संबद्धः
स च तन्मय एव बोद्धव्यः + ॥

परमार्थप्रपाटीका ७

= तामेवाह सत्त्वानुरूपेति सर्वस्य प्राणिनः सत्त्वानुरूपविशिष्ट
संस्कारोपलक्षितान्तःकरणानुरूपा आस्तिक्या यत आस्तिक्यबुद्धिः
सत्त्वमन्तरेण नोत्पद्यते तथा सति गुणप्राधान्यवशात्त्रिविधा भ
वति एवमयं [illegible]षः संसारी श्रद्धामय पुरुषस्त्रिविधया विविक्त
इति तदाह यो यच्छ्रद्धा यादृशी श्रद्धा यस्य सो यच्छ्रद्धस्तादृशश्र
द्धया युक्त एव सः ३ ॥

वनमालीटीका ३

प्रागभवीयांतःकरणगतवासनारूपनिमित्तकारणवैविध्याच्छ्र
द्धावैचित्र्यमुक्त्वांतरुपादानांतःकरणवैविध्यादपि तद्वैचित्र्यमाह
सत्वेति सत्वं प्रकाशशीलत्वात्सत्वप्रधानं त्रिगुणपंचीकृतपंचम
हाभूतारब्धमंतःकरणं तत्र क्वचित् [illegible] क्वचित्सत्वमेव यथा दे
वानां क्वचिद्रजसाभिभूतसत्वं यथा यक्षादीनां क्वचित्तमसाभिभूत
सत्वं यथा प्रेतभूतादीनां मनुष्याणां तु प्रायेणाभिश्रमिव तत्र शा
स्त्रीयविवेकज्ञानेनोद्भूतसत्वं रजस्तमसी अभिभूय क्रियते शास्त्रीय
विवेकविज्ञानशून्यस्य तु सर्वस्य प्राणिजातस्य सत्वानुरूपा श्रद्धा स
त्ववैचित्र्याद्धि चित्रा भवति सत्वप्रधानेंतःकरणे सात्विकी रजःप्र
धाने तस्मिन् राजसी तमःप्रधाने तस्मिंस्तामसीति हे भारत यत
यत्पृष्टं तेषां निष्ठा केति तत्रोत्तरं शृणु अयं शास्त्रीयज्ञानशून्यः कर्मा
धिकृतः पुरुषः त्रिगुणोंतःकरणप्रयुक्तः श्रद्धामयः प्राचुर्येणास्मि
न् श्रद्धा प्रस्तुतेति तत्त्वस्तत्त्ववचने मयट् श्रद्धामयो यतश्शतिवत अतो
यो यच्छ्रद्धः या सात्विकी राजसी तामसी वा श्रद्धा यस्य स एव सद्रूपस्तद्रू
प एव सः सात्विको राजसस्तामसो वा अश्रद्ध्यैव निष्ठा व्याख्यातेत्यभि
प्रायः ३

कुसुमवैजयन्तीटीका ३

स्वभावजायांश्चेतःकरणानुसारेणत्रिविधतामाह सत्वानुरूपेति
हे भारत सर्वस्य ब्रह्मादिपिपीलिकान्तस्य पुरुषस्य श्रद्धा सत्वानु
रूपा सत्वं गुणत्रयात्मकमंतःकरणं तस्यानुरूपा समा नाम भवति सत्व
प्रधानांतःकरणस्य सात्विकी रजःप्रधानांतःकरणस्य राजसी तमः
प्रधानांतःकरणस्य तामसी श्रद्धा भवतीत्यर्थः सत्वशब्दो देहेंद्रिया
दीनामुपलक्षणार्थः देहेंद्रियादीनामपि यथायथं [illegible] तया
सत्वादयो गुणा भवंति तथा तथा श्रद्धापि भवतीत्यर्थः [illegible] लौकि
कः पुरुषः पूज्यप्रजादिभावयुक्तो जनः श्रद्धामयः त्रिविधश्रद्धाप्रचु
रो यः पुरुषो यच्छ्रद्धो यया देवादिविषयया पूज्यादिविषयया तामसा
दिविषयया वत्तरतः मेनादिविषयया वा युक्तो भवति स एव सः स

देवादिपूज्यश्रद्धावान्पूजकोपि स एव पूज्यदेवादिगुणरूप एव नत्वम
पुण्यकर्मश्रद्धायुक्तस्य पुण्यफलेसुखं पापकर्मश्रद्धावतः पापफ
लेऽदुःखं च भवतीत्याशयः भारतेत्यनेन पुण्यवतः श्रद्धैतत्करणस्य वं
शोज्ञानस्य न त्वापि सात्विकी श्रद्धा भवतीति सूचितम् ३

मधुसूदनीटीका १०

प्राग्भवीयांतःकरणगतवासनारूपनिमित्तकारणवैचित्र्येण श्र
द्धावैचित्र्यमुक्त्वानुपादानांतःकरणवैचित्र्येणापि तद्वैचित्र्यमाह स
त्वेति प्रकाशशीलत्वात्सत्वप्रधानत्रिगुणपंचीकृतपंचमहाभूतारब्ध
मंतःकरणं तच्च कस्यचिद्रजस्तमसी सत्वमेव यथा देवानां कस्यचिद्रजसा
भिभूतसत्वं यथा यक्षादीनां कस्यचित्तमसाभिभूतसत्वं यथा प्रेतभू
तादीनां मनुष्याणां तु प्रायेणाभिश्रमेव तच्च शास्त्रीयविवेकज्ञा
नेनोद्भूतसत्वं रजस्तमसी अभिभूय क्रियते शास्त्रीयविवेकज्ञानशू
न्यस्य तु सर्वस्य प्राणिजातस्य सत्वानुरूपा श्रद्धा सत्ववैचित्र्याद्धि विचित्रा
भवति सत्वप्रधानेंतःकरणे सात्विकी रजःप्रधाने तस्मिन् राजसी
तमःप्रधाने तु तस्मिन् तामसीति हे भारत महाकुलप्रसूतत्वात्त्वमति
शयेनेतिवा शुद्धसात्विकत्वेनैव यति यत्नवान् एतेनैषां निष्ठा केति
तत्रोत्तरं सूचितं शास्त्रीयज्ञानशून्यः कर्माधिकृतः पुरुषस्त्रिगुणां
तःकरणसंपादितः श्रद्धामयः प्राचुर्येणास्मिन्श्रद्धामयत्वेनेतिन

द्धृत स्य वचनेनमयट् अन्नमयो यज्ञ इतिवत् अतो यो यच्छ्रद्धः यासात्वि
कीराजसीतामसीवा श्रद्धा यस्य स एव श्रद्धानुरूप एव सः सात्वि
कोराजसस्तामसोवा श्रद्धयैव निष्ठा व्याख्यातेत्यभिप्रायः ३

सदानंदीटीका ११

प्राग्भवीयमनोनिष्ठवासनानां वैचित्र्यं निमित्तमात्रं श्रद्धायाः वैचि
त्र्येत्युदीरितं १ इदानीं तदुपादानमनो वैचित्र्येणापि च श्रद्धावैचि
त्र्यमाह हे शोमहामायानियामकः २ सत्वप्रकाशशीलत्वादंतःकर
णमुच्यते कस्यचिद्रजसा सत्वं तमसाभिभूतं दैवीकसां ३ कस्यचिद्रजसाभि
भूतं तत् यक्षादीनां मनो यथा कस्यचित्तमसाभिभूतं तत्तु यथा प्रेतादिदेहिनां ४

मनुष्याणां तत्तत्सत्वं व्याप्तिं श्रायशो भवेत् नतु शास्त्रीयबोधेनोद्भू
तसत्वं रजस्तमः ५ क्रियते वाभिभूयैव नतु समस्तं तत्वाग सर्वस्य
प्राणिजातस्य श्रद्धा सत्वानुसारिणी ६ सत्वप्रधानेजनेतस्मिन्सात्विकी
पूर्वपुण्यजा रजःप्रधानेतस्मिन्साराजसीपूर्वकर्मजा ७ तमःप्रधा
नेतस्मिन्सातामसीतित्रिधास्मृता कानिष्ठेतित्वयापृष्टं यत्तत्रोत्तरमु
च्यते ८ शास्त्रीयत्वानभूयोयकर्मण्यधिकृतःपुमान् श्रद्धामयोस्य
निष्ठापियाद्यानाश्रद्धयैवहि ९ यायस्यसात्विकीश्रद्धाराजसी
वाथतामसी श्रद्धानुरूपएवास्तिसपुमानितिनिर्णयः १० ३

नीलकंठटीका १२

ननुश्रद्धाविनाभूतत्वात्सत्वस्यैवात्मानंपश्येदितिश्रद्धायाश्चात्मदर्शने
साधनेष्वंतरंगत्वमुच्यतेकथंतस्याराजसत्वंतामसत्वंवोच्यतइत्य
तआह सत्वेति प्राक्तनकर्मसंस्कारोपेतंयादृशंबुद्धिसत्वंसात्विकं
राजसंवातदनुरूपैवसात्विक्यादिरूपादेवतादिपूजासफलाव
श्यंभावनिश्चयात्मिकाश्रद्धापिभवति तथायंपुरुषोपिश्रद्धाम
यः श्रद्धाप्रधानोयोयच्छ्रद्धोयोययाश्रद्धयोपेतःसएवसइति
सात्विक्याश्रद्धयाउपेतःसात्विकएवराजस्याराजसस्तामस्यातामस
सइति एवंसतियदिशास्त्रानकूपभक्तः पूर्वपुण्यवशात्सात्तंदेववन्म
स्यतेनतर्हितंसात्विकंपरलोकमितिवेदवाश्चनरहंतिनित्यकर्म
त्यागनिमित्तमपिदोषमस्यापनुदंति यदित्वेनंमंत्रादिनासिद्धं
पूर्ववासनावशाद्यतादिरूपमभ्यनेनतदातंराजसंराजस्यपद्याप
वानुगृह्णंति नास्यकामकारवतोनित्यकर्मत्यागजंदोषमपने
तुमर्हंति नहिदेवतापराधीयदैश्यातेशक्नोति यदित्वयंनेनःपि
तामन्दुष्टंवेमाबाधिष्टेतिसर्वधर्मत्यक्तापतमस्याभियेक्तूपंपूज
यामीतिमन्यतेसदातंपितरिपेतत्वबुद्धियोगाद्धिपर्यस्ततामसं
प्रेताएवानुगृह्णंतितद्भोरौदैवाश्चनरकेपातयंति ३

आनंदटीका १२

एतदेवाह पूर्वजन्मवासनावासितंचित्तंसत्वमित्युच्यते प्रसि

+ इत्युपक्रम्य स्वभावश्रद्धयोरन्योन्यकारणत्वं तावदाह ॥

श्री॰ गी॰ टी॰ सं

दृष्टं हि लोके महासत्त्वा इत्यल्पसत्त्वा इति च ॥ ३ ॥

रामकंठीटीका १४

+ इह सर्वस्य देहिनः समस्तस्य जीववर्गस्य सत्त्वानुरूपा स्वभावा
नुसारिणी श्रद्धा भवति एवं रजोगुणप्रधानचित्तस्य राजसी
तमोगुणप्रधानचित्तस्य तामसीत्यानन्त्येपि जीवानामपि चैत्रविध्ये
न संक्षिप्योक्ता वस्तुतः सत्त्वादीनां गुणानामंशांशिकतयाना
नन्त्याद्यथा जीवचित्तानामानन्त्यं तथा श्रद्धायामपि तत्सर्व
कत्वेन चानुष्ठितानां कर्मणां फलस्याप्यानन्त्यमित्यर्थः श्रद्धायाः
सत्त्वादिरूपत्वमाख्यातमिदानीं सत्त्वस्वभावस्य श्रद्धानुरूपत्व
माचष्टे अयं पुरुषो नानाकार्यकारणसंघातमात्रनिबद्धात्म
स्वभावः श्रद्धामयः श्रद्धाप्रकृतिकस्तन्मयः पुरुषो यच्छ्रद्धः
या सात्त्विकादिका यस्य स तादृशः स एव भवति यस्य सात्त्विकी
श्रद्धा स सात्त्विको यस्य राजसी श्रद्धा स राजसो यस्य तामसी श्रद्धा
स तामस इति किमनेनोक्तं भवति एवं सत्त्वानुरूपा श्रद्धा स
र्वस्य भवतीत्युक्तम् इदानीं तु श्रद्धानुरूपं सर्वस्य सत्त्वं भव
तीति प्रतिपादितम् अतः श्रद्धासत्त्वयोः पुरुषगतयोः सात्त्वि
कादावन्योन्यकारणत्वमनादिप्रवंधप्रवृत्तमवस्थितमित्यत्र
तात्पर्यं [illegible] ॥ ३ ॥

सत्त्वगुणकार्यभूतायाः श्रद्धायाः कार्यं राजसतामसत ाभ्यां निर्देश इत्यत आह ॥

लासिकी [illegible] टीका १५

+ सर्वस्य त्रिविधगुणविशिष्टस्य भूतग्रामस्य श्रद्धा सत्त्वाकार्य
भूता सत्त्वानुगा सत्त्वतारतम्यानुसारिणी भवति सत्त्वोद्रेके सा
त्त्विकी रजस्तमोभ्यां सत्त्वस्याभिभूतत्वे राजसी तामसी च तद्भू
यस्त्वाद्व्यपदेशा भवन्तीत्युक्तम् यथा हि अधार्मिकैर्विपक्षैरभि
भूतस्य धार्मिके विपक्षैरभिभूतस्य धार्मिकस्य राज्ञः परिवारस्था
स्थितैर्विपक्षमतानुसारैव भवत्येवं श्रद्धापि नन्वेवं सत्यपि ततः
किमित्यत आह ॥ श्रद्धामयोयमिति अयं पुरुषो जीवः श्रद्धा

मयः श्रद्धयैव प्राचुर्येण सात्विकादिस्वभाव उपलक्ष्यते यतोयः
पुरुषो यच्छ्रद्धः याहृशा सत्वादिरूपया श्रद्धया युक्तः स एव
पुनस्ताहृशः सात्विको राजसस्तामसो वा भवति [illegible]
[illegible] ॥ ३ ॥

पेचोलेटीका

श्रद्धायाः सत्वप्रकृतित्वेपि अंतःकरणस्य रजस्तमोमिश्रत्वेन त्रै
विध्यात् नश्रद्धायाः अपि त्रैविध्यमाह सत्वानुरूपेति हे भार
त सर्वप्राणिजातस्य सत्वानुरूपा विशिष्टसंस्कारोपेतांतःकर
णानुरूपा श्रद्धा आस्तिक्यबुद्धिर्भवति अयं संसारी पुरुषः जीवः
श्रद्धामयो श्रद्धाबहुलो यादृशया श्रद्धया युक्तः स एव सः सश्र
द्धानुरूप एव भवति ३ ॥

रणवीरसमिद्धोधिनी।

अथ स्वभावश्रद्धयोरन्योन्यकारणत्वं दर्शयति सर्वस्य जन
स्य श्रद्धा सत्वानुरूपा स्वभावतारतम्यानुसारिणी भवति ते
न यस्यांतःकरणं सत्वगुणप्रधानं भवति तस्य सात्विकी श्र
द्धा यस्य रजोगुणप्रधानं तस्य राजसी यस्य तमोगुणप्रधानं
तस्य तामसीति श्रद्धायाः स्वभावानुरूपत्वमुक्तम् इदानीं स्वभा
वस्य श्रद्धानुरूपत्वं प्रदर्शयति श्रद्धामय इति अयं पुरुषः श्रद्धा
मयः श्रद्धाप्रकृतिको भवति ततश्च यः पुरुषो यच्छ्रद्धो यया
सात्विकादिकया श्रद्धया युक्तो भवति सः स एव भवति तादृशः
सात्विकादिक एव भवतीत्यर्थः ३ ॥

मधुभाष्य

३ ॥

इवंपत्न कहते हैं कि हां श्रद्धा सात्विकी है क्यों कि श्रीभगवानने
एकादश स्कन्धके पचीशवें अध्याके द्वितीय श्लोक से सत्व का
र्य रूप ही भगवान उद्धव के प्रति निर्देश किया है कि शम दम
तितिक्षा ज्ञान तप सत्य दया स्मृति तुष्टि त्याग अनिच्छा श्रद्धा ल
ज्जा औ आत्म निर्वृति कहे आत्मरति ये सब हती सतोगुण
ही की हैं इस से श्रद्धा तीन प्रकार कैसे कहते हैं जो ऐसा क
हो तो सुनो कि हां सत्य कहते हो पर तथापि रजोगुण औ त
मोगुण के संयोगसे सत्वगुणकी तीन प्रकारता है तक सात्विक
श्रद्धा भी जो तीन प्रकार होती है सोई कहते हैं कि जो पूर्व सा
त्विक स्वभाव था सो उसके संस्कारसे फेरभी सात्विकश्रद्धायुक्त
होता है औरजो रजोगुण प्रकाशाथा सो रजोगुण स्वभाव होता
और तमोगुण वालोंकी तमोगुणी श्रद्धा होती अर्थात् तामसयुक्त
होता है इस कारण लोकाचार कर्म्मकारी ऐसे सात्विक राजस
तामस स्वरूप तीन प्रकार श्रद्धाका निर्देश मात्र कहे देखाया
है परन्तु जो लोग शास्त्रज्ञान से प्रगट विवेक ज्ञान से युक्त हैं
तिनका स्वभाव सर्वोत्तम होनेके वास्ते एकही प्रकार श्रद्धा हो
ती है इतनाही इस प्रकरणका तात्पर्यार्थ है १

दोहा

स्वभाव सदृश सभजीवकी भारत श्रद्धा होय श्रद्धामयजोपु
रुष है यतश्रद्धकहिये सोय १॥

यजंते सात्विका देवान्यक्षरक्षांसि राजसाः प्रे
तान्भूतगणांश्चान्ये यजंते तामसा जनाः ४

शंकरभाष्यंटीका १

ततश्च कार्येण लिंगेन देवादिपूजया सत्वादिनिष्ठा नमेयेत्याह
यजंत इति यजंते पूजयंति सात्विकाः सत्वनिष्ठा देवान् यक्षरक्षां
सि राजसाः प्रेतान् भूतगणांश्च सप्तमातृकादींश्चान्ये यजंते
तामसा जनाः ४

आनंदगिरिकृतटीका २

तथापि कथं सत्वादिनिष्ठा यथोक्तस्य पुरुषस्य ज्ञातुं शक्येत्याशंक्या
ह ततश्चेति अधिकृतस्य पुरुषस्य श्रद्धाप्रधानत्वादिति यावत् दे
वा वस्वादयो यक्षाः कुवेरादयो रक्षांसि नैरृतादयः स्वधर्माच्च
प्रच्युता विप्रादयो देहं त्यक्त्वा वायुदेहमापन्नाः प्रेताः पश्चाच्च यथाय
थमाराध्य देवादयः सात्विकराजसतामसान् प्रकामान् प्रयच्छ
न्तीति सामर्थ्यादवगन्तव्यं ४

स्वामिकृतटीका ३

सात्विकादिभेदमेव कार्यभेदेन प्रपंचयति यजंत इति सात्विका
जनाः सत्वप्रकृतीन्देवानेव यजंते पूजयंति राजसास्तु रजःप्रकृ
तीन्यक्षान्राक्षसांश्च यजंते एतेभ्योन्ये त्वविलक्षणास्तामसा जना
स्तामसानेव प्रेतान्भूतगणांश्च यजंते सत्वादिप्रकृतीनां तत्तद्दे
वतानां तत्पूजाकृतिविभिन्नत्वं पूजकानां सात्विकत्वादि ज्ञातव्यमित्य
र्थः ४

पिशाचभाष्यमटीका ४

लिंगवचनाभावान्न देवदर्शयति पूजयंति सात्विकाः श्रद्धोपेताः ४

रामानुजभाष्यमटीका ५

सत्वगुणप्रचुराः सात्विकाः श्रद्धायुक्ता देवान्यजंते दुःखासंभिन्नोत्कृ
ष्टसुखहेतुभूतं तद्देवयागविषया श्रद्धा सात्विकीत्युक्तं भवति
राजसा जनाः यक्षरक्षांसि यजंते अन्ये तु प्रेतान्भूतगणांश्च यजंते दुः

श्री· गी· टी· स

17

स्वं संभिन्नात्मस्वजननी राजसी श्रद्धा दुःखप्रायात्तस्य स्वजननीता
मसीत्यर्थः एवं शास्त्रीयेष्वेव यागादिषु श्रद्धा एकैव गुणतः फलवि
शेषं अशास्त्रीयेषु तु योगप्रभृतिषु मदनुशासनविपरीतत्वे
न न कस्यचिदपि सत्वलवः अपितु न यपवेति हृदि निहितं व्यज
व्याह ४ अभिनवगुप्तकृतटीका ९
सप्रश्नार्थं ४ ॥ परमार्थप्रपाटीका ॥ स्पष्टोर्थः ४॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ४२

यजन्ते सात्विका देवानिति स्पष्टार्थः ८

वनमालीटीका ८

अज्ञातानाममतीनिष्ठां ज्ञापयिष्यति केनोपायेन सा ज्ञायतामित्यपे
क्षिते देवपूजादिकार्यलिंगेनानुमेयेत्याह यजन्त इति जनाः शा
स्त्रीयविवेकहीनाः येस्वाभाविक्या श्रद्धया देवानिन्द्रादीन् सात्वि
कान् यजन्ते ते सात्विकास्तेयाः येच यक्षान् कुवेरादीन् रक्षांसि च
राक्षसान् निर्ऋतिप्रभृतीन् राजसान् यजन्ते ते राजसास्तेयाः ये
च प्रेतान् विप्रादयः स्वधर्मान्मृतान् देहपातानन्तरं वायवीयदेह
माप्ताउल्कामुखकटपूतनादिसंज्ञाः प्रेता भवन्तीति मन्त्र
कान् पिशाचविशेषान् भूतगणांश्च सप्तमातृकादींश्च ताम
सान् येयजन्ते ते तामसास्तेयाः अन्य इति पदं त्विषापि वैलक्षण्यबो
धनाय संबध्यते ४ कुसुमवैजयन्तीटीका ९

ननु सर्वेषामपि सत्वरजस्तमोगुणवत्त्वात् कथं तेषां भेदः स्यादित्यपे
क्षायां भावगुणभेदेन सात्विकादिभेदमाह यजन्त इति ये सात्विका
सात्विकश्रद्धावन्तः सत्वगुणप्रचुराः शास्त्रीयविवेकज्ञानविहीनाः
केवलया स्वभावजया श्रद्धयैव देवान् सत्वगुणप्रकाशान् इन्द्रवरुणाद

सुरुद्रादीन्यजंते दुःखोमिश्रसुखनिमित्तदेवयजनविषयाःसा
त्विकाःश्रद्धावंतोऽप्यत्रैषाशास्त्रीयविवेकज्ञानश्रद्धातोभिन्नाभवंति
येराजसाःयक्षरक्षांसिकुबेरकर्बुरादीनिराजसानियजंते तेदुःख
मिश्राल्पसुखहेतुश्रद्धावंतोऽप्यन्येशास्त्रीयविवेकसंविच्छ्रद्धातोभि
न्नाभवंति येतामसाजनाःप्रेतभूतगणान्वायवीयदेहानुल्काश्र
खोन्पिशाचपूतनादिसंज्ञान्भूतगणान् वेतालकूष्मांडभैरवा
दिसंज्ञान्चशब्दात्सप्तमातृकादीस्तामसान्यजंते तेदुःखब
हुलाल्पसुखहेतुश्रद्धावंतोऽन्येशास्त्रीयज्ञानहेतुश्रद्धातो
भिन्नाभवंति एतेसर्वेप्रमादालस्यक्लेशाधिभ्यस्त्यक्तवेदविध
योपिकदाचित्बलवद्दैवसंपत्तयालब्धवैदिकसत्संगाःसंतः
स्वस्वभावात्यक्त्वावेदाधिकारिणोभूत्वावेदविवेकजन्यज्ञान
पितश्रद्धायुक्ताभवंतिभावः ४ ॥

यजंते सात्विका
इतिस्मृत्यार्थ

मधुसूदनी टीका

श्रद्धाज्ञातासतीतांनिष्ठांज्ञापयिष्यति केनोपायेनसाज्ञायता
मित्यपेक्षितेदेवपूजादिकार्यलिंगेनानुमेयेत्याह जनाःशा
स्त्रीयविवेकहीनायेस्वाभाविक्याश्रद्धयादेवान्वसुरुद्रादीन्सा
त्विकान्यजंते तेन्येसात्विकाज्ञेयाः येचयक्षान् कुबेरादीन्रक्षां
सिचराक्षसान् निर्ऋतिप्रभृतीन्राक्षसान्यजंते तेन्येराजसाज्ञे
याः येचप्रेतान्विप्रादयःस्वधर्मान्प्रच्युतादेहपातादूर्ध्वंवायवी
यंदेहमापन्नाःउल्कामुखकटपूतनादिसंज्ञाःप्रेताभवंतीति
मनूक्तान्पिशाचविशेषान्भूतगणांश्चसप्तमातृकादींश्चता
मसानयेयजंते तेन्येतामसाज्ञेयाः अन्ये इतिपदंत्रिष्वपिवैलक्ष
ण्यद्योतनायसंबध्यते ४ ॥

सदानंदी टीका

श्रद्धाज्ञातासतीनिष्ठांज्ञापयिष्यतिसापित्व ज्ञायतांकथमित्यके
नुमेयाकार्यलिंगतः १ शास्त्रीयज्ञानहीनायेस्वाभाविक्यातया
युताःश्रद्धयासात्विकादेवान्यजंतेहरशुभ्रखेकान् २ तेजनाःसा
त्विकाज्ञेयायेतुयक्षांश्चराक्षसान् यजंतेराजसास्तेन्येज्ञातव्या

[illegible]जनाः तु प्रेतान् पिशाचभेदान्ये मातृकादींश्च तामसा
[illegible]ते भूतसंज्ञास्ते ज्ञातव्यास्तामसाजनाः ४ ॥ ४ ॥

नीलकंठी टीका

ऊतएतदेवं कल्प्यते यस्मात्सात्विकादयो देवादीनेव यजंते
इत्याह यजंतइति यजंति पूजयंति ४ ॥

आनंदीटीका १२ ॥

एतदभिव्यंजकंक्रियाविशेषमाह सात्विकाजनादेवान्ब्रह्मादी
न्यजंते भक्त्युक्तविधानेनार्चयंतीत्य राजसायक्षादीन्
विनाशास्त्रान्तरैरर्चयंति तामसाः फलकामनयाभूतानि वि
द्याभिः क्षुद्रविद्याभिर्यजन्ते ॥ ४ ॥

रामकंठीटीका १४

तदेवंत्रिप्रकारायाः श्रद्धायाश्रभिव्यंजकंक्रियाविशेषमाह —

सात्विकाः सत्वगुणमयचित्ताः सत्वगुणमयान्देवाञ्छ्रेंद्राग्निप्र
जापतिप्रभृतीन्यजन्ते शास्त्रोक्तविधिपूर्वकंपूजन्ते एवंराजसा
यक्षादीन्शास्त्राभासविधिपूर्वकंयजंते तामसाश्चप्रेतादीनशा
स्त्रविहितेनैवविधानेनयजंते [illegible]

[illegible] ॥

त्वासिकी [illegible]टीका १५

श्रद्धयाश्रभिव्यंजकंकार्यविशेषमाह

सात्विकाजनाः सत्वप्रकृतीनिंद्रादिदेवान्यजन्ते पूर्वयंति राज
साजनारजः प्रकृतीन्यक्षान्रक्षांसिचयजन्ते यतेभ्योन्येविलक्ष
णास्तामसाजनास्तामसानेवभूतान्प्रेतांश्चयजन्ते यजनात्म
केनकार्येणसत्वादिप्रकृतयोज्ञेयाः प्रेतानितिविप्रादयः स्व
धर्मप्रच्युतादेहपातादूर्ध्वंवायवीयंदेहमापन्नाउल्कामुखक
कटपूतनादिसंज्ञाः प्रेताभवन्तिइति [illegible]

[illegible] ॥ ४ ॥

पंचोले टीका

देवपूजादिकार्यलिंगेनसत्वादिनिष्ठानुमेयेत्याह यजंतेति ।
सात्विकाः देवान्यजंते पूजयंति राजसाः यक्षरक्षांसिपूजयं
ति अन्येतामसाः जनाः प्रेतान्भूतगणांश्चसप्तमातृकादीन्
पूजयंति ४ ॥

19

सात्विकादिभेदव्यंजकंकर्मविशेषमाह यजंतइति स्पष्टार्थो
यंश्लोकः प्रकृतेतत्रमनसादेवादीन्यावा माराडीयठषिसन्द
यतेइत्यर्थः ४ ॥

मधुभाष्य

यजंतइत्यादिना भगवत्कर्पानंनामात्यनुदाहिरेव योभे
मदांतंपुरुषपुमांसंनैवदृष्टाकर्मीकः सोतिपापीतिस
त्तमिश्चानश्रुतिः श्रात्रदोनिश्चयोयेषांतेश्रात्रदयतिश्रुयः
देवास्तसात्विकाप्रोक्तादैत्याराजसनामसा इतिसात्विवे
पश्रुतिः प्रीतिरानंनतीरिका हृयवेदर्शने स्थिरानस्वत
देवपकाभवंति तथासाङ्यादयः सौम्यत्वमक्रोधं श्रद्ध
ःसोम्यउच्यतइत्यभिधानं मोतंमननप्रीलत्व वास्व
वपाडित्यंचानिर्वियाधमुनिरितिदिश्रुतिः यतेनदीदे
सर्वमतं यदनेनदीदंसर्वमतंतस्मात्सुनिवत्ततइति
मालवेयश्रुतिः कथंवान्यथामानसंतपःस्यात् पुन
स्सुकर्मादीतिकर्तव्यताविधानार्थमर्थवादमाह ४

भाषा अनवादटीका

सात्विक आदि जो गुण भेद उसी को कार्य भेदसे विस्तार कर कहते हैंकि सात्विक स्वभाव जन सत्व प्रकृति देवतों को पूज ते हैं ऐसे ही राजस स्वभाव रजः प्रकृति देवता यक्ष राक्षसो कों को पूजते औ तामसी तमोगुणी भूतप्रेतों को पूजते हैं ४

दोहा

यजैं देव हिं सातकी राजसी यक्ष रक्षकोय प्रेतभूतगण औ
र जो यजैं तामसी सोय ४ ॥

90

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः। दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ५

शांकरभाष्यटीका १

एवं कार्यतो निर्णीताः सत्त्वादिनिष्ठाः शास्त्रविध्युत्सर्गे तत्र कश्चिदेव सहस्रेषु पूजादितत्परः सत्त्वनिष्ठो भवति बाहुल्येन तु रजोनिष्ठाः तमोनिष्ठाश्चैव प्राणिनो भवन्ति कथं अशास्त्रेति अशास्त्रविहितं न शास्त्रविहितं घोरं पीडाकरं प्राणिनामात्मनश्च तपस्तप्यन्ते निर्वर्तयन्ति ये जनास्ते दम्भाहङ्कारसंयुक्ताः दम्भश्चाहङ्कारश्च दम्भाहङ्कारौ ताभ्यां संयुक्ता दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः कामश्च रागश्च कामरागौ तत्कृतं बलं कामरागबलं तेनान्विताः कामरागबलान्विताः ५

(margin: अशास्त्रविहितं)

आनंदगिरिकृतटीका २

ननु सत्त्वादिनिष्ठाः शास्त्रज्ञानात् शक्यन्ते कुतः कार्यलिङ्गकानुमानेनेति तत्राह एवमिति सत्त्वादिनिष्ठानां जन्तूनामवान्तरविशेषं प्रचुरत्वाप्रचुरत्वरूपं दर्शयति तत्रेत्यादिना राजसानां तामसानां च प्राचुर्यं प्रश्नद्वारा विवृणोति कथमित्यादिना कामस्य काम्यमानविषयो रागस्य तु विषयभोगाभिलाषः तत्कृतं तन्निमित्तमिति यावत् ५

स्वामिकृतटीका ३

राजसतामसेषु पुनर्विशेषान्तरमाह अशास्त्रेति द्वाभ्यां शास्त्रविधिमजानानाः अपि केचित्प्राचीनसंस्कारेण सात्विका एव भवन्ति केचित्तु मध्यमा राजसा भवन्ति अधमास्तु तामसाः भवन्ति ये पुनरत्यन्तं मन्दभाग्याः पाषण्डसंसर्गेण तद्व्यवहारवर्तिनः सन्तोऽशास्त्रविहितं घोरं भूतभयंकरं तपस्तप्यन्ते कुर्वन्ति तत्र हेतवः दम्भाहङ्काराभ्यां संयुक्ताः तथा कामोऽभिलाषः रागः आसक्तिः बलमाग्रहः एतैरन्विताः सन्तः तानासुरनिश्चयान्विद्धीत्युत्तरेणान्वयः ५

(margin: पुण्य; उत्तमाः)

पिशाचभाष्यमटीका ५

स्पष्टार्थं ५ ॥

रामानुजभाष्यमटीका ५

अशास्त्रेति [illegible] अशास्त्रविहितमतिघोरमपि तपो ये जना
स्तप्यंते प्रदर्शनार्थमिदं अशास्त्रविहितं बह्वायासं यागादिकं ये
कुर्वते दंभाहंकारसंयुक्ताः कामरागबलान्विताः ५

अभिनवगुप्तकृतटीका ५

स्पष्टार्थं ५ ॥ ॥

परमार्थप्रपाटीका ५

यं ते सात्विकादेवा निश्चित्य अशास्त्रविहितं कर्म दर्शयति अशा
स्त्रविहितमिति द्वाभ्यां शास्त्रेणाविहितमननुज्ञातं घोरं भयावहं
स्मशानेन शवेनानुष्ठीयमानं वीरसाधनादि ये जनास्तपस्तप्य
न्ते अनुतिष्ठंति दंभो धर्मध्वजित्वं अहंकारो गर्वस्ताभ्यां संयुक्ताः
कामोभिलाषः रागआसक्तिः बलमाग्रहस्तैरन्वितास्तानाम्
रविश्वपान्विहोस्फनरेणान्वयः ५

वनमालीटीका ५

एवं मताहतशास्त्राणां सत्वादिनिष्ठकार्यनो निर्णीतानत्र के
विद्राजसतामसा अपि प्राग्भवीयपुण्यपरिपाकात्सात्विका भू
त्वा शास्त्रीयसाधने प्रविशन्ति ये तु दुराग्रहेणादृष्टैवपरिपाकश्च
मनुजेन संगादिदोषेण प्रबलस्वस्वभाववशेन च राजसतामसु
चेतितेशास्त्रीयमार्गं दृष्ट्वा असन्मार्गानुसरणेनेहलोके परत्र
च दुःखभागिनः स्युरित्याह अशास्त्रविहितं शास्त्रेण वेदेन न वि
हितं अशास्त्रेण बुद्ध्यागमेन बोधितं वा घोरं परस्यात्मनः पी
डाकरं तपः पंचाग्निधूम्रपानादिना तप्यंते ये जनास्ताहशतपस
नधिकारिणः शूद्रादयो वर्णाश्रमादिधर्महीना भगवद्धर्महीना
नाम्न केवलं कायक्लेशमात्रतत्पराः दंभो धार्मिकत्वख्यापनं
अहंकारो हमेव श्रेष्ठ इति दुरभिमानः ताभ्यां संयुक्ताः कामेका

म्ये काम्यमानविषये यो रागस्तन्निमित्तं बलमस्य यद्दुःखसहन
सामर्थ्यं तेनान्विताः कामो विषयेभिलाषः रागः सद्धानदाभि
निविष्टतद्रूपोभिषंगः बलमवश्यमिदं साधयिष्यामीत्याग्र
हः तैरन्विता इति ५ ऊहमवैजयन्तीटीका १

ननु ये नास्तिका वेदविधिमजानन्तः केवलयास्वभावजयेवश्र
द्धया युक्ताः संतो देवादीन् यजन्ते ते कदाचिदिहाधिकारिणो
भूत्वानरंतिनात्रममसंदेहः किंतु ये नास्तिकास्तेषां का गतिरि
ति शंकायामाह द्वाभ्याम् अशास्त्रविहितमिति ये नास्तिका
जना अशास्त्रविहितं अशास्त्रेण श्रुतिविरुद्धेन केवलस्वल्प
वितण्डादिनर्कयुक्तिदृष्टान्तमात्ररूपेण स्वकपोलकल्पितास
च्छास्त्रेण विहितं कथितम् एवं घोरं परपीडाजनकं तपो देहेंद्रि
यादिक्लेशमात्ररूपकं प्रदर्शनार्थमिदमतिपरिश्रमसाध्यया
की गव्रतहोमादिकं न यत्ते कुर्वन्ति दृशौद्दंकारमकादंभोयम माहं
ध्वजित्वमहंकारो गर्वस्ताभ्यां संयुक्तास्तथा कामरागबला नि
न्विताः कामो विषयाभिलाषो रागो विषयासक्तिर्बलं मयै
वैतन्न सिद्धं कर्त्तव्यं नान्येनेत्येवं दुराग्रहः एतैरन्विता युक्ता
स्तन्नमानासहरनिश्चया [illegible] न्विद्धीसुनरेणान्वयः ५

मधुसूदनी टी १

= एवमनादृतशास्त्राणां सत्वादिनिष्ठाकार्यतो निर्णीता तत्र केचि
द्राजसा तामसाश्चापि प्राग्भावीयपुण्यपाकात्सात्विका भूत्वा शा
स्त्रीयमार्गेऽधिक्रियन्ते ये त्वत्युग्रदुरदृष्टपरिपाकशास्त्रा
दुर्जनसंगादिदोषेण च राजसा तामसाश्च नसुत्वतिते शा
स्त्रीयमार्गाद्बहिष्कृताश्च सन्मार्गानुसरणेनेहलोके परत्र च दुः
खभागिन एवेत्याह द्वाभ्याम् अशास्त्रविहितं शास्त्रेणावेदनप्र
त्यक्षेणानुमितेन वा न विहितं अशास्त्रेण बौद्धागमेन बो
धितं वा घोरं परस्यात्मनः पीडाकरं तपः तप्तशिलारोहणादि
तप्यन्ते कुर्वन्ति ये जनाः दंभो धार्मिकत्वख्यापनं अहंकारश्च

हमेव श्रेष्ठ इति दुरभिमानः ताभ्यां सम्प्रयुक्ताः योगस्य सम्य
क्मनायासेन वियोगजननासामर्थ्यं कामो काम्यमानवि
षये यो रागस्तन्निमित्तं बलमत्युग्रं दुःखसहनसामर्थ्यं तैः
नान्विताः कामरागबलान्विताः यद्वा कामो विषयेऽभि
लाषः रागः सदा तदभिनिविष्टत्वरूपोऽभिषंगः बलमव
श्यमिदं साधयिष्यामीत्याग्रहः तैरन्वित इति वा ५ ॥
॥ ५ ॥

सदानंदीटीका ११

दम्भेनाहं शास्त्राणां निषिद्धानां विविधानामेषणां केचित्तु एव शास्त्रे
ति सात्विकाः शास्त्रानुसाराः १ दुराग्रहेणायेत्वत्र दैवपरित्या
कतः दुष्टसंगादिदोषेणानभिमतं वा शास्त्रीमति २ ते शास्त्रीयाध
नो भ्रष्टाश्च सन्मार्गानुसारतः ३ हास्तु त्ववज्ञः स्वैकमानपवेति
कथ्यते ३ यत्र क्रत्यानवास्त्यस्याविहितं तपश्चास्त्रं यद्वा शा
स्त्रेण बुद्ध्यादि प्रणीतेनैव बोधितं ४ घोरं स्वस्य परस्यापि कुर्वेत्य
संतदः खदं आत्मनो धार्मिकत्वस्य ख्यापनं दंभः इरितः ५ श्रेष्ठो
हमेवास्मीत्येवमहंकारो दुराग्रहः तामस्येन संयुक्तायो रागः का
म्यगोचरे ६ तन्निमित्तं बलं दुःखसोढुं सामर्थ्यमित्यपि विष
याभिलाषः कामो रागोऽभिषंगः उच्यते साधयिष्याम्यवश्यमेव
स्याग्रहो बलमुच्यते तैः युक्ता बलवद्भिः खदर्पेनैप्यनिवर्तिनः
८५ ५

नीलकंठीटीका १२

सात्विकानां दौर्लभ्यमभिप्रेत्याह अशास्त्रं वेदादिनाविरोधिना
कौलिकाद्यागमेन विहितं घोरं स्वमांसहोमेन ब्राह्मणलोहि
तादिना वा देवतासंतर्पणात्मकं ये जनास्तपस्तप्य
न्ते तानासुरनिश्चयान्विद्धीति द्वयोः संबंधः दंभो धर्मध्वजित्व
महंकारः स्वस्मिन्पूज्यताबुद्धिः ताभ्यां संयुक्ताः कामरागो
विषयाभिलाषः बलं साहसं नापि विषयसाधने उत्साहस्ता
भ्यामन्विताः ५

आनंदीटीका १३

एतन्निष्ठामाह ५ ॥ ॥

एतेच राजसतामसाश्चासुरा इति तेषांचे ष्टितमाह — रामकंटीटीका १४

तानेवंविधान्कर्मभूमिजन्मनः पुरुषानासुरनिश्चयान्विद्धि ।
आसुरो रजस्तमः प्रधानत्वादसुरसंबंधीनत्वहृदो निश्चयो
निष्ठा येषां तांस्तथाविधान्जानीहि कोसौ ये जना घोरं दुःसहं
चित्तशरीरक्लेशकारणत्वाद्दारुणं तपस्तप्यंते विशिष्टफला
भिसंध्यानेन नियमविशेषमाचरंति ॐ तादारुणमिति हेतुग
र्भविशेषणमाह अशास्त्रविहितमिति शास्त्रेण सर्वदा सर्व
विशिष्टजनगीतानुष्ठानेन वेदादिना विहितमनुष्ठितं शास्त्रावि
हितं एवं हि शास्त्रीयो विधिः यथा शरीरं न ग्लायेत्तथा तन्मम
ग्रसं यथा तथा तपस्विवर्जितं तन्मूत्कव्रतमाचरेदित्येवंविधहे
तुनियमनैरपेक्ष्येण फलप्राप्तिरस्मात् तथाहंकारेण हं शास्त्रा
कं सम्यग्ज्ञात्वा तिष्ठामीत्यात्मसंभावनात्मकेनाभिमानेन सं
युक्ताः तथा कामरागबलान्विताः ५ ॥

+राजसतामसेष्वपुनर्विशेषांतर माहद्वाभ्याम् ॥ — लासिकीवदत्तमीटीका १५ ॥

+ये जनाः पाषाण्डिसंगेन गतानुगत्या वा अशास्त्रविहितं शास्त्रेण
अप्रदत्तं नानुमतं वा न चोदितम् घोरं दुःसहं मस्त्रिलारोह
णादि तपो नियमविशेषाभ्यासं तप्यंते चरंति तत्र हेतवः द
म्भेन धार्मिकत्वख्यापनेनाहंकारेणाभिमानेन संयुक्ताः ॥ब — तथा कामोभिलाषः रागश्चासक्तिः ॥
लं दुराग्रह एतैरन्विताः शास्त्रीयो विधिरीदृश एव तथा हि
यथा शरीरं न ग्लायेत्तथा यान्मम वपुर्यथा ॥ ५ ॥ — तथा तपस्विवर्जितं नमूत्कव्रतमाचरेत् इति ॥

पंचोलेटीका

राजसमो निष्ठानां बाळ्लेव दनतेषां विशेषमाह अशास्त्रेति

गी. ये जनाः दंभाहंकारसंयुक्ताः कामरागबलान्विताः कामराग
से टी. जनितबलेनान्विताः अशास्त्रविहितं घोरं प्राणिनो आत्मन
23 अपीडाकरं तपस्तप्यंते ५ ॥

रणवीरसमिद्धोयिनी ॥

इयं सात्विकादीनां स्वभावव्यंजकं देवताविशेषयजनरूपं क्रि
याविशेषमुक्त्वाधुना तद्व्यंजकमन्यमपि वेहितविशेषमभि
धत्ते तत्र च देवानां सात्विकानां मत एवं बहुशास्त्र च तत्र निरूपि
त इत्यतः शास्त्रकरणं तानजस्तामसानामेव तदाह अशास्त्रेत्या
दिद्युगलेन शास्त्रमविगीताचारप्रतिपादकं शिष्टवाक्यं त
चारवाद्वियोवितो यजुर्वेदः परमामेन परमेश्वरेणानुशिष्टो
बहुधाः प्राक्प्रतिपादितलक्षणः तेन न विहितं अतएव प्राण
स्यापीडनादेव घोरं सर्वभूतभयंकरं उः सदुश्चर शरीरशोषणा
दिरूपं च तपः कर्मविशेषविसरूपं ये जनास्तप्यंते नुतिष्ठंति
कीदृशाः संतो दंभाहंकारसंयुक्ताः दंभेना मानित्वमदंभित्व
मित्यत्रश्लोकलक्षणेन तथाहंकारेण अहमेव बलाधिकः
कर्पतेमस्तुरत इत्येवंरूपेण च संयुक्ताः यद्वा दंभेन व्याजेन दे
वतायो अहंकारसंयुक्ताः तथा कामरागबलान्विताः काम्यंत
इति कामाः पुत्रमित्रादयः स्वर्गादिभोगा वा अस्येति योगः रागः ते
भोगाभिलाषो वा तस्य बलेनोत्कर्षेण समदिताः ५ ॥

मप्भाष

भाषाअनुवादटीका

ओर राजस तामस के मध्यमे भी जो विशेष है सो फेर दो श्लोक से कहते हैं कि शास्त्र विन जाने भी पूर्व संस्कार वल से कोइ कोइ उत्तम पुरुष सात्विक स्वभाव होते हैं कोइ मध्यम जन राजस स्वभाव होते ओर कोइ अधम लोग तामस स्वभाव होते हैं औ र जो अत्यन्त मन्दभाग्य लोग अन्धपरम्परा मेपाखण्डियों के संङ्ग से पायेहुए आचारके अनुवर्ती होके शास्त्र विधान से भि न्न लोक भयङ्कर रूप तपस्या करते हैं तिनके विषयमे हेतु स्वरूप दम्भ औ अहङ्कार से संयुक्त तथा काम कहे अभिला ष औ राग कहे अभिलषित वस्तु मे चित्तरञ्जनके अनुरूप जो अधिक आशक्ति ओर वल कहे विषयोंका आग्रह इस स वसे युक्त होके इस श्लोकका अर्थ दूसरे श्लोक के साथ पूरा हो य है ५

दोहा

अशास्त्रकथित घोरतप तपहिंजो जन कोय अहंकारके यु क्त हि कामराग बलसोय ५॥

कर्षयंतः शरीरस्थं भूतग्राममचेतसः मां चैवां
तः शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ६

शांकरभाष्यटीका १

कर्षयन्त इति कर्षयन्तः कृशीकुर्वन्तः शरीरस्थं भूतग्राममङ्करणसमुदायमचेतसोऽविवेकिनो मां चैव तत्कर्मबुद्धिसाक्षिभूतमन्तः शरीरस्थं कर्षयन्तः मदनुशासनाकरणमेव मत्कर्षणं तान्विध्यासुरनिश्चयान् आसुरो निश्चयो येषां ते आसुरनिश्चयास्तान् परिहरणार्थं विद्धि इत्युपदेशः ६

आनंदगिरिकृतटीका २

रजोनिष्ठान् प्राधान्येन प्रदर्श्य तमोनिष्ठान् प्राधान्येन दर्शयति कर्षयन्त इति कथं शरीरादिसाक्षिणमीश्वरं प्रति कृशीकरणं प्राणिनां प्रकल्प्यते तत्राह मदनुशासनेनेति तेषां विपर्यासनिश्चयवतां परित्यागे कोऽपयुज्यते तत्राह परिहरणार्थमिति ६

स्वामिकृतटीका ३

किंच शरीरस्थमारंभकत्वेन देहे स्थितं भूतानां पृथिव्यादीनां ग्रामं समूहं कर्षयंतः वृथैवोपवासादिभिः कृशं कुर्वंतः अचेतसोऽविवेकिनो मां चांतर्यामिनमंतः शरीरस्थं देहमध्ये स्थितं मदाज्ञालंघनेनैव कर्षयंतः संतप्त्वा तपस्यंति ये तानासुरनिश्चयानासुरो निश्चयो येषां तान्विद्धि ६

पिशाचभाष्यमटीका ४

कर्षयंतः अनुकुर्वंतः भूतग्रामं पृथिव्यादिसंघातशरीरांतरस्थं मां कर्षयंत इति आसुरो निश्चयो येषां ते आसुरनिश्चयाः तामसा इत्यर्थः ६

रामानुजभाष्यमटीका ५

शरीरस्थं पृथिव्यादिभूतशरीरं कर्षयंतो मदंशभूतं जीवं चांतः

शरीरस्थं कर्षयंतो ये तप्यंते यागादिकं च कुर्वते तानासुरनिश्चयान्
विद्धि असुराणां निश्चय इव निश्चयो येषां ते आसुरनिश्चयाः असुरा हि मदाज्ञाविपरी
तकारिणः मदाज्ञाविपरीतकारित्वात्तेषां हा बलवत्संबंधो न वि
द्यते अपि त्वनर्थप्रपाताः पतंतीति नरक इति पूर्वमेवोक्तं पतंति नरके
ऽशुचौ इति अथ प्रकृतमेव शास्त्रीयेषु यागादिषु गुणतो विशेषं
प्रपंचयति तत्रापि आहारमूलत्वाद्देहादेराहारस्य त्रैविध्यं प्रथम
मुच्यते अन्नमयं हि सोम्य मन आहारशुद्धौ सत्त्वशुद्धिरिति श्रुतेः ६

अभिनवगुप्तकृतटीका ६

[illegible] ः अ
चेतनमविवेकित्वात् मां च कर्षयंतः शास्त्रार्थानुष्ठानात्
अतएव ते स्वबुद्धिविचारिणो तपस्यां कुर्वाणाः [illegible]
[illegible]

परमार्थप्रपाटीका ७

तदुदाहरति कर्षयंत इति शरीरस्थं शरीरांतर्गतं भूम्यादिभू
तग्रामं प्राणाचारोपवासादिभिः कर्षयंतः कृशं कुर्वंतः च प
रमात्मानं तयांमित्वेन संस्थितं दुःखसात्मानं कुर्वंतः अतएवाचेत
सः देवप्राप्यमित्यजानंतस्तानासुरनिश्चयान् आसुरो निकृष्टो
निश्चयो येषां तेन तथाविधान्विद्धि ६

वनमालीटीका ८

अतएव बलदर्पः स्वदर्शनेष्वनिवर्तमानाः कर्षयंतः कृशीकुर्वं
ति हठयोगोपवासादिना शरीरस्थं भूतग्रामं देहेंद्रियसंघातात्मका
रणपरिणतं पृथिव्यादिभूतसमुदायं अचेतसो विवेकशून्याः
मां चांतर्यामित्वेन शरीरांतःस्थं साक्षिभूतमीश्वरमात्मानं च ते

नकर्षयंत इत्यर्थः तानैहिकसर्वभोगविमुखानन्यत्र चाधोगति
भागिनः सर्वपुरुषार्थभ्रष्टानासुरनिश्चयान् आसुरो विपर्यास
रूपो वेदार्थविरोधी निश्चयो येषां तान् मनुष्यत्वेन प्रतीयमाना
नप्यसुरकार्यकारित्वादसुरान्विद्धि असुरत्वजातिरहितानां
मनुष्याणां कर्मणैवासुरत्वान्नानसुरान् विद्धीति साताङ्के
द्विजातीनां तपस्विनां दंभादियोगादसुरत्वे शूद्रादीनां ता
दृशं तपोनधिकारिणां दंभाद्यभावेपि तादृशतपोयोगादसुर
त्वमिति भावः ६ ॥

ऊहमवैजयंती टीका

पुनः कीदृशास्त इत्यपेक्षायामाह कर्षयंत इति शरीरस्थं शरी
रारंभकतया शरीरे स्थितं भूतग्रामं भूतानां पृथिव्यप्तेजोवाय्वाका
शानां ग्रामं समूहं कर्षयंतो हठयोपवासादिना कृशं कुर्वन्तः
अंतःशरीरस्थं अंतरात्मतया शरीरमध्यगतं मां परमेश्वरमंत
र्यामिणं च शास्त्रात्मदात्मकं मदंशभूतं जीवात्मानं कर्षयंतः अ
हं स्वबुद्धिबलपराक्रमेणैव सर्वं करोमीश्वरेण किं भूतसंघात
एव चेतनीभावं प्राप्तो देह एवाहमात्मा सर्वं करोमि देहव्यति
रिक्तेन चेतनेन किमित्यवज्ञां कुर्वन्तः एवंकारेण व्यवहार
दशायामेव शास्त्राचार्यजीवेश्वरादयस्सन्ति परमार्थदशायां
तु सर्वं ज्ञानकल्पितत्वेन मिथ्या भवतीत्येवं वदतः परिच्छिन्नबा
ह्याअपि संहृष्यंते एवं कुतो यतोऽचेतसः शास्त्रजन्यविवेकज्ञा
नशून्याः एतादृशांस्तान्वेदेश्वरविद्वेषकानासुरनिश्चयान्
निश्चयेनासुरान् यद्वा आसुरो असुरस्य भावो हिंसामात्सर्या
दिरूपा निरूरस्वभावो निश्चयो येषां ते तथा तान् विद्धि त्वं जा
नीहि एतेषां पतंति नरकेऽशुचावित्यादि पूर्वोक्ता दुर्गतिर
वर्जनीयैवेत्यभिप्रायः ६ ॥

मधुसूदनी टीका

अत एव बलवद्दुःखदर्शनेप्यनिवर्तमानाः कर्षयंतः उपो
पवासादिना शरीरस्थं भूतग्रामं देहेंद्रियसंघाताकारेण परिण

तेपृथिव्यादिभूतसमुदायं अचेतसोविवेकशून्याः मांचैवांतः
शरीरस्थंभोक्तृतद्रूपेणास्थितंभोग्यस्यशरीरस्यकृशीकरणेन
कृशीकुर्वंतएवमामंतर्यामित्वेनशरीरेनास्थितंबुद्धितद्वृत्ति
साक्षिभूतमीश्वरमाज्ञालंघनेनकर्षयंतइतिवा तानैहिकस
र्वभोगविमुखत्वात् परत्रचाधमगतिभागिनः सर्वपुरुषार्था
भ्रष्टान् असुरनिश्चयान् शास्त्रेविपर्यासरूपोवेदार्थविरो
धीनिश्चयोयेषांतान् मनुष्यत्वेनप्रतीयमानानप्यसुरका
र्यकारित्वादसुरान्विद्धिजानीहि परिहरणायनिश्चयस्या
सुरत्वानन्सर्वविकानां सर्वासामंतः करणवृत्तीनामासुरत्वं
असुरत्वजातिरहितानांचमनुष्याणांकर्मणैवासुरत्वाता
नसुरान्विद्धीतितेषांतात्पर्यमितिद्रष्टव्यम् ६ ॥

सदानंदी टीका

पृथिव्यादिभूतसंचयंदेहस्थमविवेकिनः कृषीकुर्वंतमा
त्मानंमांचैवांतःशरीरगं १ अंतर्यामितयाभोक्तृभावेन
साक्षिभावतः मदाज्ञालंघनेनैतेमांद्विषंतोनराधमाः २
तानसुरमर्थात्प १

विभ्रष्टानिहामुत्रापभागिनः आसुरोतिविपर्यासोविरुद्धत्वे
नवश्रुतेः १ निश्चयोऽदृढियांयेषांनात्मनुयात्वरूपतः प्रती
यमानानास्यांकानाविश्वासरागशवान ४ सर्वथाहेयप
वासोऽहृष्टश्रासुरनिश्चयः श्रेयोर्थिभिर्विपश्चिद्भिर्हेरेरितिव
माशयः ६ नीलकंठीटीका १२

कर्शयंतः कृशांकुर्वंतः भूतग्रामंकरणसमूहं अचेतसोमू
ढाः मांचांतःशरीरस्थंभोक्तृरूपेणशरीरांतःस्थंमांपरमे
श्वरंवाभोग्यस्यशरीरस्यकृशीकरणेनमदाज्ञालंघनेनवाकृ
शीकुर्वंतः तान्विद्ध्यासुरनिश्चयान ६

आनंदीटीका १३

अंतःशरीरस्थंमांजीवात्मानं आसुरोनिश्चयःअदृष्टायेषाम् ६
[illegible]
[illegible] ॥६॥

रामकंठीटीका १४

कामेषुविषयभोगेषुरागोभिलाषस्तस्यवलमशास्त्रविहित
क्रियाप्रवर्तनेसामर्थ्यं[illegible]कर्षयन्तस्तात्विकस्वरूपानव
बोधेन[illegible]नेषांतथाविधा तेनान्वितायुक्तास्तेन
घोरेणतपसाकिंकुर्वाणाअचेतनंप्राकृतंजडंभूतग्रामंपृथि
व्यादिसंघातंशरीरेदेहेस्थितंनतदधिष्ठातृभावेनवर्तमानं
मामात्मानंकर्षयंतस्तात्विकरूपानवबोधेनतपयंतइ
वतेषांतथाविधानांदारुणतपसोदेहचित्तव्यथान
मात्रमेवफलमित्यर्थः [illegible]
[illegible]
[illegible]
[illegible] ॥६॥

श्री० गी० टी० सं०

27

तथाशरीरस्थंशरीरत्वेनपरिणतंभूतग्रामंपृथिव्यादिभूत
संघातंकर्शयंतः वृथोपवासादिभिः कृशंकुर्वन्तः य
तोचेतसोविवेकशून्याः मांचैवात्मानमंतः शरीरस्थंश
रीराधिष्ठातृत्वेनस्थितंकर्शयंतः तत्त्वावधारणेनतिर
स्कुर्वंतः एतानासुरनिश्चयान् आसुरःक्रूरोनिश्चयोये
षांतांस्तथाविधांविद्धिजानीहि ६ एवंप्रायाश्रयेनश्रद्धयेवसा
त्विकादिस्वभावोगीतार्थनिश्चयाधिकारप्रतीत्यर्थमनुमी
यते अधुनाऽऽहारादिनापितमनुमापयितुंदशभिःश्लोकै
राह ॥ ६ ॥

पंचोली टीका ६

अचेतसः अविवेकिनः शरीरस्थंभूतग्राममिंद्रियसमुदायं
चअन्यत्मांततकर्मबुद्धिसाक्षिभूतमंतः शरीरस्थंकर्षयंतः
वशीकुर्वंतः येवर्ततेतानासुरनिश्चयान्विद्धिजानीहि ६

रणवीरसमिद्धोधिनी

तथाशरीरस्थंभूतग्रामंपृथिव्यादिभूतसमूहंकर्षयंतःक्षी
णंकुर्वंतः तथामांचपरमात्मानमंतःशरीरस्थंदेहमध्येधि
ष्ठातृभावेनस्थितंकर्षयंतोवमन्यमानाः तानासुरनिश्चया
न्विद्धिजानीहि राजसास्तामसाश्चतेत्वयाविज्ञेयाइतिभावः य
द्वायेकेचनजनाःकर्मयोगिनः क्षत्रियाःघोरंशरीरशोषणमा
त्रफलत्वेनदुष्करंदंडःसहंचतपोवर्णितरीतिविततन्यंतेतिष्ठं
तिकीदृशास्ततत् अशास्त्रविहितं यथाधनुर्धारणादिकंक्षत्रिय
तथाकृषिवाणिज्यादिकंचवैश्यतथाश्रुतिस्मृत्युभयरूपेण
शास्त्रेणराजन्यानधिकृत्यानुशिष्टं नतथाभिक्षाचर्यादिकं
कृच्छ्रचांद्रायणादिकंपंचाग्निधारणादिकंब्राह्मणस्त्रैणविहि
तं किंतुसर्वथैवनिषिद्धंकीदृशाःसंतःदंभाहंकारसंयुक्ताः दं

मनेदंभः भावेक्तिच दमाददमेनोपशमेनभांतीतिदंभाः दमित्य
व्ययंक्रोधोक्तो दमितिकरणंहंकारःक्रोधोद्दीपनंनदहंकारोये
षांतेदहंकारास्तैरनुद्दीपितक्रोधाः ततःकर्मधारयःक्रोधंपरित्यज्य
शांतिपथमाश्रिताइत्यर्थः तथा कामरागबलान्विताः काम
नं विषयाभिलाषेणरागेणतुच्छादिविषयेणासक्तेदेनबलेनैंद्रि
यादिपाटवेनसहिताः यद्वाकामेषुस्त्र्यमिष्ठादिषुविषयेषुयो
रागआसक्तिस्तस्यबलेनोत्कर्षेणान्विताः एतेनचसकामास्ते
इतिप्रतिपादितं तथाशरीरस्थंपृथिव्यादिभूतसमूहंकृशीकु
र्वंतः तथाऽचेतनाः चेतनयानिश्चयात्मिकयाबुद्ध्यारहिताः त
था मांचैवअंतःशरीरस्थंदेहमध्येहृदयदेशेवर्तमानंप्रेरयि
तारंकृशयंतःतान् आसुरनिश्चयान् असुरव्रतानीत्यसुराःप्रा
णरक्षणतत्परास्तेषामयंनिश्चयोयेषांतानासुरान्विद्धि
यद्वा येन नाःसमरमध्यादंतर्धायोच्चाटनयंत्रशालायांगत्वा
शास्त्रनिषिद्धंघोरंरक्तरंवसामांसाद्याहवनेनबीभत्संवातपउ
च्चाटनादिकर्मकुर्वंति तानासुरस्वभावांजानीहि असुराअपित
पैवकुर्वंतीतिपुराणेषुप्रसिद्धं कीदृशाः दंभेनकपटेनाहंकारे
णाभिमानेनसहिताः तथाकामरागबलेनस्त्र्यादिविषयाभिला
षोत्कर्षेणचसहिताः तथाशरीरस्थं शरीरिणोवा यथाशरीरईश्वरं
तिप्रेरयंतियेनशरीरेणयत्नुर्वंससैन्याधीशस्तत्रस्थितंतत्स्थित्यधीन
स्थितिकंभूतग्रामंप्राणिसमूहंकृशीकुर्वंतः कोर्थः सेनापतिव
शेसैन्यंस्वाच्छंदेनकिंचिदपिकर्त्तुंनशक्नोति अतस्तदाज्ञावि
नानिर्व्यापारंसततंपीडयंतः यद्वा तत्परोक्तंसैन्यंबाधयंतः अथ
वस्वशरीरस्थंभूतग्रामंरक्तवसामांसादिकंहोमार्थेप्रदेशार्थंक
र्षयंतोनिष्कुषंतः तथा मांचांतःशरीरस्थंसर्वांतर्यामिणंपरमे
श्वरमचेतनाअजानंतइत्यर्थः अचेतसइति पाठेमदिरादिपाने
नपरिमुषितविवेकाइत्यर्थः मांचसर्वांतर्यामिणमवगणय
तइतिशेषः ६॥

मधुभाष्य

६॥

भाषाअनुवादटीका

शरीरस्थ कहे शरीर के कारण रूप देह मे वर्तमान जो पृथिवी
अप तेज वायु आकाश पंच भूत तिनको वृथा उपास करने
से दुर्बल करके औ अन्तर्यामी रूप देहके बीच टिके हुये
मेरे को भी लङ्घन कर दुखदाइ होय जो अविवेकी लोग तप
स्या करते हैं तिनको आसुर निश्चय कहे अति क्रूरबुद्धि जेनो
तात्पर्य यह कि मेरी आज्ञा लङ्घन करना ही मुझे दुख देना
हैं ६

दोहा

भूतग्रामकोकर्षहि देहस्थको तनभूप औरमोहिको दे
हमे तिनलष असुरहि रूप ॥६

आहारस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः यज्ञ
स्तपस्तथादानंतेषांभेदमिमंशृणु ७

शांकरभाष्यटीका १

आहाराणांच रसस्निग्धादिवर्गत्रयरूपेण भिन्नानां यथाक्रमं सा
त्विकराजसतामसपुरुषप्रियत्वदर्शनमिह क्रियते रसोरस्यस्नि
ग्धादिष्वाहारविशेषेष्वात्मनः प्रीत्यतिरेकेण लिङ्गेन सात्विकत्वं
राजसत्वन्तामसत्वञ्च बुद्धा रजस्तमोलिङ्गानामाहाराणां परिवर्ज
नार्थं सत्वलिङ्गानाञ्चोपादानार्थं तथा यज्ञादीनामपि सत्वादिगु
णभेदेन त्रिविधत्वप्रतिपादनमिह राजसतामसान् बुद्धा कथं
नुनाम परित्यजेत सात्विकानेवानुतिष्ठेदित्येवमर्थमाह आहा
रस्त्विति आहारस्त्वपि सर्वस्य भोक्तुस्त्रिविधो भवति प्रियइष्टस्तथा
यज्ञस्तपस्तथादानं तेषामाहारादीनां भेदमिमं वक्ष्यमाणं शृणु ७

आनन्दगिरिकृतटीका २

उत्तरश्लोकस्य तात्पर्यमाह आहाराणामिति रस्यादिवर्गस्य
सात्विकपुरुषप्रियत्वं कट्वादिवर्गस्य राजसप्रियत्वं यातयामा
दिवर्गस्य ~~तामसप्रियत्वं यातयामादिवर्गस्य~~ तामसप्रियत्वमिति
दर्शनेन कुतोपयुज्यते तत्राह रस्येति श्लोकान्तरार्द्धतात्पर्यमाह त
थेति आहारत्रैविध्यवदिति यावत् कथमेतेषां प्रत्येकं त्रैविध्यन्त
त्राह तेषामिति ७

स्वामिकृतटीका ३

आहारादिभेदादपि सात्विकादिभेदं दर्शयितमाह आहारस्त्वि
त्यादित्रयोदशभिः सर्वस्यापि जनस्य य आहारोन्नादिः सत्वयथा
यथं त्रिविधः प्रियो भवति तथा यज्ञतपोदानानि च त्रिविधानि
भवन्ति तेषां वक्ष्यमाणमिमं भेदं शृणु एतत्राजसतामस
साहारयज्ञादिपरित्यागेन सात्विकाहारयज्ञादिसेवया सत्
त्ववृद्धौ यत्नः कर्तव्य इत्येतावदर्थं कथ्यते ७

श्री·
गी·टी·
सं·

+स त्रिविधः

पिशाचभाष्यम्टीका ४

इदानीं सात्विकराजसतामसानां प्राणिनामाहारं दर्शयन्नमाह
आहारेति यतः स्याहारमप्यवहार्यं सात्विकराजसतामसस्य प्राणि
नः त्रिप्रकारस्सात्विको राजसस्तामसश्चेति भवति जायते प्रियः
अभिमतः तथा तद्वत् त्रिविधस्य प्राणिनः त्रिविधः सात्विकरा
जसस्तामसः यज्ञः प्रियो भवति तथा तपस्तथा दानं तेषामा
हारयज्ञतपोदानानां भेदमिमं सात्विकराजसतामसलक्ष
णं शृणु आकर्णय १७

रामानुजभाष्यम्टीका ५

पिशाचभाष्यम्टीका ४

आहरेति आहारोपि सर्वस्य प्राणिजातस्य सत्वादिगुणान्वयेन
त्रिविधः प्रियो भवति तथैव यज्ञोपि त्रिविधः तथा तपो दानं च
तेषां भेदमिमं शृणु तेषामाहारयज्ञतपोदानानां सत्वादिभे
देनेदमुच्यमानं भेदं शृणु १

आहारोपि सत्वादिभेदा
त्रिधा श्रद्धावत्तथा यज्ञतपोदानानि तदुच्यते ॥

अभिनवगुप्तकृतटीका ९

रामानुजभाष्यम्टीका ५

+स्पष्टार्थं १ ॥ परमार्थप्रपाटीका ७ ॥ ॥

अभिनवगुप्तकृतटीका ९

अथ सात्विकादीनामाहारादिभेदमाह आहार इत्यादि तत्त्रयोद
शभिः सर्वस्यापि जनस्य य आहारैन्नादिः स तु यथा पथ्यं त्रिवि
धः प्रियो भवति तथा यज्ञतपोदानानि च त्रिविधानि भवति ते
षां वक्ष्यमाणमिदं भेदं त्रिविधं शृणु तत्र राजसतामसाहारप
रित्यागेन सात्विकाहारयज्ञादिसेवया सत्ववृद्धौ पत्नः कर्तव्य इ
त्येतदर्थं निरूप्यते [illegible] १७

वनमालीटीका ८

सात्विकानामादानाय राजसतामसानां हानाय चाहारयज्ञ
तपोदानानां त्रैविध्यमाह आहारस्त्विति न केवलं श्रद्धैव त्रिवि
धा आहारोपि सर्वस्य त्रिविध एव प्रियो भवति सर्वस्य त्रिगु
णात्मकत्वेन चतुर्थविधायासंभवात् इष्टाप्याहारवद्

दृष्टार्थयज्ञतपोदानान्यपि त्रिविधानि तत्र देवतोद्देशेन द्रव्यत्या-
गो यागः यजतिनाजुहोतिना च चोदितत्वेन यागहोमयोरिति द्वि-
विधः उत्तिष्ठद्धोमा वषट्कारप्रयोगान्ता याज्यापुरोनुवाक्यावन्ते
तो यजतयः उपविश्यहोमाः स्वाहाकारप्रयोगान्ता याज्यानुवा-
क्यारहिता जुहोतयः इति कल्पकारैर्व्याख्यातो यज्ञशब्देनोक्तः
तपः कृच्छ्रादि दानं परस्वत्वापत्तिफलकः स्वत्वत्यागः तेषां
यज्ञादीनां राजसतामसभेदं मयोच्यमानमिमं शृणु ७

हनुमद्वैजयन्तीटीका ॥

एवमास्तिकानां शास्त्रीयेषु यागादिषु स्वभावजाया श्रद्धायाः
सत्वादिगुणभेदात्त्रैविध्यमुपपन्नमथेदानीमनास्तिकानाम-
शास्त्रीयतपःप्रभृतिकर्माचरणत्वेन दुर्गतित्वं निरूप्येदानी-
माहारयज्ञतपोदानानां गुणभेदात्त्रिविधभेदमाह आहा-
रस्त्वपीत्याद्यदेशकाल इत्यैतैः षोडशभिः आहार इति न शक्यत-
पार्थकः पृथार्थ्य सर्वस्य स्वाभावना श्रद्धा भवति तथापि नि-
श्चयेन सर्वस्य ब्रह्मादिपिपीलिकान्तस्य जनस्याहारोऽन्नादिः
प्रियस्य स्वाभावजरुच्यनुसारेणाभीष्टस्त्रिविधस्त्रिप्रकारो भ-
वति तथा यज्ञोऽपि त्रिविधो भवति तथा तपोऽपि त्रिविधम्भव-
ति तथा दानमपि त्रिविधं भवति तेषामाहारयज्ञतपोदानानां
चतुर्णामिमं मयोच्यमानं सत्वादिगुणभेदेन भेदं शृणु त्वमव-
हितमनाः सच्छ्रवणं कुरु ७

मधुसूदनीटीका ॥

+ न केवलं श्रद्धैव त्रिविधा आहारोऽपि सर्वस्य प्रियस्त्रिविध एवम्भ-
वति सर्वस्य त्रिगुणात्मकत्वेन चतुर्विधाया असंभवात् यथा
दृष्टार्थ आहारस्त्रिविधस्तथा यज्ञतपोदानान्यदृष्टार्थान्यपि
त्रिविधानि तत्र यजते आख्यामो द्रव्यं देवताया इति कल्प-
कारैः देवतोद्देशेन द्रव्यत्यागो यज्ञ इति निरुक्तः सोऽयं यजतिना

+ ये सात्त्विकास्ते देवाये तु राजसास्ता-
मसाश्च ते विपर्ययस्तं दर्शयितुमिति
तेषां त्रिकानामादानाय राजसा ताम-
सानां हानाय आहारयज्ञतपोदा-
नानां त्रैविध्यमाह ॥

श्री· गी· टी· सं· गी· सं·

31

30

जुहोतिनाच चोदितस्वेन यागो होमश्चेति द्विविधः तत्र उत्तिष्ठहोमा
वषट्कारप्रयोगांता याज्यापुरोनुवाक्यावंतो यजतयः उपविष्ट
होमाः स्वाहाकारप्रयोगांता याज्यापुरोनुवाक्यरहिताः जुहोत
यइति कल्पकारैर्व्याख्यातो यज्ञशब्देनोक्तः तपः कायेंद्रियशो
षणं कृच्छ्रचांद्रायणादि दानं परस्वत्वापत्तिफलकः स्वस्व
त्वत्यागः तेषामाहारयज्ञतपोदानानां सात्विकराजसतामस
भेदं मया व्याख्यायमानमिमं शृणु [illegible]
[illegible]

सदानंदीटीका ॥

+स ये सात्विकास्ते देवाः स्युराजसास्तामसास्तु ये तेऽसुराः सर्वथाहे
यथायथा देवास्तु सात्विकाः १ आहारस्तथा यज्ञदानं त्रैविध्यमु
च्यते त्रिविधो क्रियया श्रद्धा तथाहारस्त्रिधा स्तुति १ सर्वस्य
प्राणिनो भोक्तुः प्रियो यज्ञस्तपस्तथा २ देवतोद्देशतो द्रव्यत्या
गो याग उदाहृतः तपः कृच्छ्रायणायुक्तं शारीरेंद्रियशोषणं ३
दानं स्वस्वत्वत्यागोऽपरस्वत्वापादनमीरितं तेषां च त्रैगुण्यभे
देनं प्रोच्यमानं मया शृणु ४

आहारोपिस[illegible] त्रिधाश्रद्धा[illegible]

नीलकंठीटीका ॥

अत्र सात्विकानां श्रद्धादानाहारयज्ञतपोदानानां परिग्रहार्थं
राजसतामसानां वर्जनार्थं च तेषां प्रत्येकं त्रैविध्यं वि
धीयते तत्रापि श्रद्धात्रैविध्यं आराध्यत्रैविध्यं च प्रागेवोक्तं आ
हारादीनां त्रैविध्यं प्रतिज्ञापूर्वकमाह आहारस्त्विति आह्रि
यत इत्याहारोऽन्नं अतः परं प्रायेण पदार्थः स्पष्टः तथापि क
चित्क्वचित्किंचिद्व्याख्यायते २

+न केवलं पूर्वोक्तप्रकारेणाभ्यंतरेणैव सात्विकादिज्ञानं किं तु दृश्यमानेनापीत्याह ॥

आनंदीटीका ॥

+त्रिविधः सात्विकादिभेदेन प्रियः ॥ ७ ॥

रामकंठीटीका ४

न केवलमेवंविधचेष्टितेनासुराणामेव स्वभावोऽनुमीयते यावद्देवस्यासुरस्य च
सर्वस्य कस्यचिज्जंतोराहारादिभिरपि क्रियादिभेदैः दृष्टादृष्टफलविशेषैः स्वभावो
ऽनुमीयते इत्याह ॥

+ एवं प्राधान्येन श्रद्धयैव सात्विकादिस्वभावो गीतार्थनिश्चयाधिकारप्रतीत्यर्थमनुमीयते
अधुनाहारादिनापि तमनुमापयितुं दशभिः श्लोकैराह ॥

आहारादीनां त्रिविधं तत्त्वं सात्विकादि त्रिविध पुरुषप्रिय
त्वात् शिष्टं व्याख्यातप्रायं [illegible] ७

लासिकी [illegible]टीका १५

+ सर्वस्यापि जनस्य आहारः अन्नादिः सत्वयथायथं त्रिवि
धः प्रियो भवति तेषां च वक्ष्यमाणमिमं भेदं शृणु [illegible]
[illegible] ७ ॥

पंचोलेटीका

आहारादिभेदादपि सात्विकादिभेदं दर्शयितुं सात्विकं उपादा
नमाहारादित्रैविध्यमाह आहारस्त्वपीत्यादि त्रयोदशभिः तत्र
नः सर्वस्य भोक्तुः आहारोऽपि प्रियः इष्टस्त्रिविधो भवति यथा यज्ञः
तथा तपः तथा दानं एतत् त्रयमपि त्रिविधो भवति तेषामाहारा
दीनां भेदमिमं शृणु वक्ष्यमाणाम् ७

रणवीरसमिद्धोधिनी

आहारादिभिरपि सात्विकादिभावोऽनुमीयते इत्याह आहार
स्त्विति स्पष्टोऽर्थो यं श्लोकः ७॥

मधुभाष्य

७॥

भाषाअनुवादटीका

और अहारादि भेद से भी सात्विकादि गुण भेद देखावने के मनोरथ से इस श्लोक से लेकर त्रयोदश श्लोक पर्यन्त कहते हैं कि सकल मनुष्यों का अहार जो अन्न आदि भी यथा योग तीन प्रकार से प्रिय लगता है और यज्ञ तपस्या तथा दान आदिभी तीन प्रकारके होते हैं सो सब भेद सुनो कि राजस तामस अहार औ यज्ञ दानादि परित्याग करके सतोगुण की वृद्धिके निमित्त सात्विक आहार औ यज्ञ आदि के विषय मे जो यत्न करना कर्तव्य है यह भगवान कहते हैं ७

दोहा

त्रिविध आहारहि होतहै सभ जनको प्रियसोय तैसें यज्ञ तपदानहि तिनकेभेद सुणजोय ७॥

आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः र
स्याः स्निग्धाः स्थिराहृद्या आहाराः सात्विकप्रि
याः ८

शांकरभाष्यटीका १

आयुरिति आयुश्च सत्वञ्च बलञ्च आरोग्यञ्च सुखञ्च प्रीतिश्च ता
सां विवर्द्धनाः आयुःसत्वबलारोग्यसुखप्रीतिविवर्द्धनाः रस्याः
स्निग्धाः नेव रस्या रसोपेताः स्निग्धाः स्नेहवन्तः स्थिराश्चिरकाल
स्थायिनो देहे हृद्या हृदयप्रिया आहाराः सात्विकस्येष्टाः ८

आनंदगिरिकृतटीका २

सात्विकप्रीतिविषयमाहारविशेषमुदाहरति आयुरिति आयु
र्जीवनं सत्वञ्चित्तस्थैर्यं वीर्यं वा बलं कार्यकारणसामर्थ्यं आ
रोग्यन्नीरोगता सुखम्मनसाह्लादः प्रीतिः परेषामपि सम्पन्ना
नां दर्शनानन्तरमोहर्षस्तासां विवर्द्धनाः विवर्द्धयन्तीति बुध्यनेर
सोपेता रसयितव्याः सरसाः देहे चिरकालस्थायित्वं चिरशरी
रोपकारहेतुत्वं ८

स्वामिकृतटीका ३

तत्राहारत्रैविध्यमाह आयुरिति त्रिभिः आयुर्जीवितं सत्वमुत्सा
हः बलं शक्तिः आरोग्यं रोगराहित्यं सुखं चित्तप्रसादः प्रीतिरभि
रुचिः आयुरादीनां एषां विवर्धना विवृद्धिकराः ते च रस्या रस
वंतः स्निग्धाः स्नेहयुक्ताः स्थिरा देहे रसांशेन [illegible]कालावस्था
यिनः हृद्या हृष्टमात्रा एव हृदयंगमाः एवंभूता आहारा भ
क्ष्यभोज्यादयः सात्विकप्रियाः ८

पिशाचभाष्यटीका ४

आयुर्जीवनकालः सत्वं प्रकृतिः पूर्वसंस्कारः बलं प्राणोत्कर्षः सु
स्थैर्यं सुखमानन्दं संतोषाः प्रीतिर्येषां विवर्द्धनाः रस्याः मधुराः
स्निग्धाः स्नेहवंतः स्थिराः दीर्घकालपरिणामिनः हृद्या द
र्शनमात्रेण प्रीतिहेतवः एवंभूताः आहाराः स्वयं सात्विकाः सा

श्री॰
गी॰ टी॰
सं॰

३५

त्विकस्यप्रियाभवंति ८

रामानुजभाष्यटीका ५

आयुरिति सत्वगुणोपेतस्य सत्वमया आहाराः प्रिया भवंति सत्वम
याश्चाहारा आयुर्विवर्द्धनाः पुनरपि सत्वस्य विवर्द्धनाः सत्वं मनः
करणं अंतःकरणकार्यं ज्ञानमिह सत्वशब्देनोच्यते सत्वात्संजायते ज्ञानमि
ति सत्वस्य ज्ञानविवृद्धिहेतुः आहारोपि सत्वमयो ज्ञानविवृद्धिहे
तुः तथा बलारोग्ययोरपि विवर्द्धनाः सुखप्रीत्योरपि विवर्द्धनाः
परिणामकाले स्वयमेव सुखस्य वर्द्धनाः तथा प्रीतिहेतुभूतक
र्मारंभहारेण प्रीतिवर्द्धनाः रस्या मधुररसोपेताः स्निग्धाः स्नेहयु
क्ताः स्थिराः स्थिरपरिणामाः हृद्या रमणीयवेषाः एवंविधाः सत्वम
या आहाराः सात्विकस्य पुरुषस्य प्रियाः ८

अभिनवगुप्तकृतटीका ९

स्पष्टार्थं ८ ॥ ॥

परमार्थप्रपाटीका २

आहारत्रैविध्यमाह आयुरिति त्रिभिः॥ +

आयुर्जीवितं सत्वमनस्साहः बलं शक्तिः आरोग्यं रोगराहित्यं सुखं
चित्तप्रसादः प्रीतिरभिरुचिः आयुरादीनां विवर्द्धनाः विवृद्धि
करास्ते च रस्याः सरसाः स्निग्धाः स्नेहयुक्ता नरूक्षाः स्थिराः देहे
रसांशेन चिरकालावस्थायिनः हृद्या दृष्टमात्रा एव हृदयंगमाः
एवंभूता आहारा भक्तभोज्यादयः सात्विकस्य प्रियाः ८

वनमालीटीका ८

तत्राहारभेदमाह आयुरिति आयुश्चिरजीवनं सत्वं चित्तधैर्यं
बलवातिङ्ः स्वेविपत्तिनिर्विकारत्वापादकं बलं देहसामर्थ्यं स्वावि
तेकार्ये श्रमाभावप्रयोजकं आरोग्यं व्याध्यभावः सुखं भोजना
नंतरमाह्लादलब्धिः प्रीतिर्भोजनकालेनभिरुचिविराहित्यं तेषां वि
वर्द्धनाः वृद्धिहेतवः रस्याः आस्वाद्याः मधुररसप्रधानाः स्निग्धाः
सहजेनागंतुकेन वा स्नेहेन युक्ताः स्थिरा बहुकाले विपाके विनादे

हेतुत्वात्तावद्गुणाग्रहः हृद्याहृदयंगमाः दुर्गंधाशुचित्वादिहेयांशहृष्टदो
षशून्याः आहारा भक्ष्यभोज्याद्याः सात्त्विकानां प्रियाः एतैर्लिंगैः सात्त्वि
कास्तेषां सात्त्विकत्वमभिलषद्भिश्चैते सेव्या इत्यर्थः ८

अथमवैजयन्तीटीका ९

प्रथमं तावच्चतुर्षु मध्ये आहारस्य सत्त्वादिगुणवृद्धिहेतुत्वात्तस्य गु
णानसैविध्यं वक्तुमादौ सात्त्विकाहारमाह आयुरिति आयुश्चिरका
लजीवनं सत्त्वे कार्यकारणयोरभेदात्सत्त्वगुणकार्यं ज्ञानमंतःक
रणशुद्धिद्वारा सत्त्वगुणाद्धि ज्ञानमुत्पद्यते सत्त्वात्संजायते ज्ञानमि
त्युक्तेर्वोक्तत्वात् यद्वा सत्त्वमंतःकरणकार्यमुत्साहः यद्वा सत्त्वं विवि
क्षेष्वप्यधैर्यं बलं सामर्थ्यं आरोग्यं रोगराहित्यं सुखं मनःप्रसादः प्री
तिरभिरुचिः एतेषामायुरादीनां विवर्द्धना विवृद्धिकराः रस्याः द
धिदुग्धशर्करादिरसयुक्ता नवनीतसाग्निणकादयः स्निग्धाः स्नेहादि
स्नेहयुक्ता ननुदुग्धगुडधानादयः स्थिरपरिणामाः शालिगोधूमाद
यः नत्वास्थितद्रव्यफेनादयः हृद्या हृदयप्रिया मोदकादिरहितकारा म
णीयवेषावान्त्वहृद्याः कोष्णवश्यमाकादयः एवंविधाः पवित्राः
सत्त्वमया आहाराः सशर्करागव्यशालिगोधूमादयः सात्त्विकप्रि
याः सत्त्वगुणयुक्तस्य पुरुषस्य रुचिकरा भवंति ९

+आहारयज्ञतपोदानानां भेदः पंचदशभिर्व्याख्या
यते तत्राहारभेदस्त्रिभिः श्लोकैः ॥

अथ मधुसूदनीटीका ९

+आयुः चिरजीवनं सत्त्वं चित्तधैर्यं बलवदतिदुःखेऽपि निर्विकारत्वा
पादकं बलं शरीरसामर्थ्यं स्वोचिते कार्ये आमाभावप्रयोजकं आरो
ग्यं व्याध्यभावः सुखं भोजनानंतरमंतराह्लादः प्रीतिर्भोज
नकाले नभिरुचिराहित्यमिच्छैकतस्तेषां विवर्द्धनाः विशेषेण वृ
द्धिहेतवः रस्या आस्वाद्याः मधुररसप्रधानाः स्निग्धाः सहजेनागंतुके
न वा स्नेहेन युक्ताः स्थिरा रसांशेन शरीरे चिरकालस्थायिनः
हृद्या हृदयंगमाः दुर्गंधाशुचित्वादिहेयांशहृष्टदोषशून्याः आहाराः
चर्व्यचोष्यलेह्यपेयाः सात्त्विकानां प्रियाः एतैर्लिंगैः सात्त्विकास्ते
षां सात्त्विकत्वमभिलषद्भिश्चैते आदेया इत्यर्थः ८

35

सदानंदीटीका ११

तत्राहारमिसमाह त्रिभिः श्लोकैः जगत्पतिः चिरजीवनमायुः स्यात्स
त्वं धैर्यं धियः स्मृतं १ बलं शरीरसामर्थ्यं श्रमाभावप्रयोजकः आ
रोग्यं व्याध्यभावः स्यादाह्लादो भोजनात्सुखं २ भोजनावसरे स्वेना
भिरुचिः प्रीतिरुच्यते तेषां सम्यग्विशेषेण वृद्धिहेतवश्चादरात् ३
आस्वाद्याः स्नेहसंपन्नाः शरीरस्थायिनश्चिरं हृद्याः पुष्पश्रुविल्वादि
स्वरूपाश्च हृदयंगमाः आहारा लेह्यचोष्याद्याः सात्विकानां प्रियाः स
दा एतैर्लिंगैर्हि विज्ञेयाः सात्विकाः सत्वमीप्सुभिः ८

नीलकंठीटीका १२

आयुर्जीवनं सत्वमुत्साहः बलं शक्तिः आरोग्यं रोगराहित्यं सुखं चि
त्तप्रसादः प्रीतिः अभिरुचिः एतेषां विवर्धनाः वृद्धिकराः ते आ
युः सत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः रसोपेताः स्निग्धाः
स्नेहवंतः स्थिराः देहे रसांशेन चिरकालस्थायिनः हृद्याः हृष्टमा
त्रापवत्हृदयप्रियाः आहाराः हृततीरसिनादयः सात्विकप्रियाः ८

आनंदीटीका १३

सत्वमुत्साहः बलं सामर्थ्यं आरोग्यं रोगहरम् प्रीतिस्तृप्तिः
रस्याः सरसाः स्थिरा देहस्थैर्यकराः हृद्याः रुच्याः ग्लानिहराः ८

रामकंठीटीका १४

[illegible]षां भेदकथनार्थमाह —

सात्विकानां सत्वगुणोद्रिक्तशुद्धानां प्रियाः अभिमताः एवं वि
धा आहाराः कीदृशाः आयुषो जीवितस्य सत्वस्य बुद्धेर्बलस्य
सामर्थ्यस्यारोग्यस्य आधिरहितत्वस्य सुखस्य निर्वृतेः प्रीते
रभिरुचेः कारणभूततया विवर्धनाः परिपोषकाः रस्या आ
स्वादनीयाः स्निग्धाः स्नेहरणाः स्थिराः साराः हृद्याः हृदयानु
कूला [illegible] ॥ ८ ॥

लासिकी [illegible]टीका १५ ॥

तत्राहारस्य त्रैविध्यमाह —

आयुषो जीवितस्य सत्वस्य बुद्धेर्बलस्य सामर्थ्यस्यारोग्यस्य रोग
राहित्यस्य सुखस्य चित्तप्रसादरूपाया निर्वृतेः प्रीतेरभिरुचेर्वि

वर्धमानाः परिपोषकाः तेच रस्या रसवंतः स्निग्धाः स्नेहयु
क्ताः स्थिरा रसांशेन चिरकालावस्थायिनः हृद्या हृष्टमात्रा
एव हृदयंगमाः एवंविधा आहारा भक्ष्यभोज्यादयः सात्वि
कानामुद्रिक्तसत्वगुणानां प्रिया इष्टा भवंति [illegible] ८ ॥

पैचोले टीका

तत्र सात्विकमाहारमाह आयुरिति ये आहारा उपभुक्ताः आयुस्स
त्वबलारोग्यसुखप्रीतीनां प्रकर्षाणां विवर्द्धनाः रस्याः रसोपेताः
स्निग्धाः स्नेहवंतः स्थिराः देहे चिरकालस्थायिनः हृद्याः हृदिप्रि
याः सात्विकस्य एते प्रियाः ८

गणवीरसमिद्धोधिनी॥

अथैषां भेदं कथयंस्तावत्सात्विकाहारं कथयति आयुरिति स
त्वं बुद्धिरुत्साहो वा प्रीतिरभिरुचिस्तदभिवर्द्धना रस्या रसवत्वेनास्वा
दनीयाः स्थिराः सारांशेन चिरकालावस्थायिनः हृद्या हृदयंग
माः आहारा भक्ष्यभोज्यादयः ८ ॥

मधुभाष्य

८ ॥

भाषाअनुवादटीका

अब पूर्वोक्त सात्विकादि आहारके तीन प्रकार भेद तीन श्लोक
से कहते हैं कि आयु कहे जीवन सत्व कहे उत्साह बल कहे
शक्ति औ अरोग्य औ सुख कहे चित्त की प्रसन्नता प्रीति कहे
अभिरुचि इस से यह आया कि आयु सत्व आदिके बढ़ावने
वाले और रस्य कहे रसयुक्त और स्निग्ध कहे चिकने घृतयु
क्त औ स्थिर कहे रसांशके द्वारा चिरकाल देह मे रहने वा
ले और हृद्य कहे देखते मात्र भोजन की इच्छा होय ऐसे स
न्दर स्वरूप आहार भक्ष्य भोज्य आदि सात्विक रूप सात्विक
स्वभाव पुरुषको प्रिय होते हैं ८

दोहा

आयुष सत्व निरोग बल सुखप्रीति वर्धन जोय रस्य स्निग्ध
स्थिर हृद्य दे भक्त सात्विकी प्रियहोय ८ ॥

37

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आ
हारा राजसस्येष्टा दुःखशोकामयप्रदाः ९

शांकरभाष्यंटीका १

कट्विति कटुअम्ललवणअत्युष्णाः अतिशब्दः कट्वादिषु सर्व्व
त्र योज्यः अतिकटु अतितीक्ष्ण इत्येवं कट्वम्ललवणात्युष्णतीक्ष्ण
रूक्षविदाहिनः एवंविधा आहारा राजसस्येष्टा दुःखशोका
मयप्रदा दुःखञ्च शोकञ्च आमयञ्च प्रयच्छन्तीति दुःखशो
कामयप्रदाः ९ आनंदगिरिकृतटीका २

राजसप्रीतिविषयमाहारविशेषं दर्शयति कट्विति कटुक
त्तिक्तः कटुकस्य तीक्ष्णशब्देनोक्तत्वात् रूक्षोविस्नेहः विदा
ही सन्तापकः अतिशब्दस्य सर्व्वत्र योजनामेवाभिनयति अ
ति कटुरिति दुःखंतात्कालिकी पीडा इष्टवियोगजं दुःखं
शोकः आमयोरोगः ९ स्वामिकृतटीका ३

किंच तथा कट्विति अतिशब्दः कट्वादिषु सप्तस्वपि संबध्यते अ
तिकटु निंबादि अत्यम्लो अतिलवणो अत्युष्णश्च प्रसिद्धः अतितीक्ष्णा
मरिचादिः अतिरूक्षः कंगुकोद्रवादिः अतिविदाही राजसर्षपा
दिः अतिकट्वादय आहारा राजसस्येष्टाः प्रियाः दुःखं तात्कालि
कं हृदयसंतापादि शोकः पश्चाद्भावि दौर्मनस्यं आमयोरोगः प
नानि प्रयच्छन्ति ९ पिशाचभाष्यमतटीका ४

कट्वम्ललवणाः रसविशेषाः अतिशब्दः उष्णादिभिः प्रत्येकमभि
संबध्यते एते कट्वादयः आहाराः दुःखशोकामयप्रदाः राजसस्य
पुरुषस्य इष्टाः अभिमताः स्वयमपि राजसाः ९

रामानुजभाष्यमतटीका ५

कट्विति कटुरसाअम्लरसालवणोत्कटाअत्युष्णाः अतितीक्ष्णाः

नेत

न्त्ररर

रूक्षा विदाहिनश्चेति अति तैल्ण्यादिनातु उपयोगात्तीक्ष्णा दोषकराः
रूक्षास्तापकरा विदाहिनः दाहकराः एवंविधा आहारा राजसस्ये
ष्टाः तेच रजोमयत्वात् दुःखशोकामयवर्द्धनाश्च ९

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ९ ॥ ॥ ॥

परमार्थप्रपाटीका ७

कट्वम्लेति तत्रातिशब्दः कट्वादिषु सप्तस्वपि संबध्यते अतिकटुनिं
बादि अत्याम्लमाम्लवेतसादि अतिलवणं स्फट प्रसिद्धं अति
तीक्ष्णं मरीच्यादिः अतिरूक्षं कंगुकोद्रवादि अतिविदाही स
र्षपादि एवमेते आहारा राजसप्रियाः ९

वनमालीटीका ८

अतिशब्दः कट्वादिषु सप्तस्वपि योज्यः कटुस्तिक्तः कटुरसस्तीक्ष्ण
शब्देनोक्तत्वात् अतिकटु निंबादिः अत्यम्लोतिलवणमतुच्छः प्र
सिद्धः अतितीक्ष्णं मरिचादिः अतिरूक्षः स्नेहशून्यः कंगुकोद्रवा
दिः अतिविदाही संतापको राजिकादिः दुःखेन तात्कालिकीपीडा
शोके पश्चाज्जाविदौर्मनस्यम आमयो रोगश्च एतान् वैषम्यहारा प्रदद
तीतितथाविधा आहारा राजसस्येष्टाः एतैर्लिंगैराजसास्तेयाः ९

कुसुमवैजयन्तीटीका ९

राजसमाहारमाह कट्वम्लेति अतिशब्दः सप्तस्वपि कट्वादिषु यो
ज्यः अतिकटु इति तिक्तो निंबगुडूच्यादिः नतु मरिच्यादिस्तस्य ती
क्ष्णशब्देनोक्तत्वात् अत्यम्लश्चिंचिनीजंभीरादिः अतिलवणउत्क
टलवणोसमाधिकोस्तीति तीक्ष्णो मरिचादिः अतिरूक्षः कंगुको
द्रवादिः अतिविदाही सर्षपाजमोदादिः एवंविधा एते आहाराः
राजसस्य रजोगुणोपेतस्य पुरुषस्येष्टाः प्रिया भवंतीति नतु सात्वि
कस्य कीदृशाः दुःखशोकामयप्रदाः दुःखं स्पर्शमात्रात्कराद्येर स्पा॰

सनादितापजन्यं शोको दौर्मनस्यरूपपश्चात्तापः आमयो मलक्ष
यितादिविकारजन्यज्वरविस्फोटकादिरोगः एतानि प्रकर्षेण ददति
प्रयच्छंतीतितथा तेसर्वे एते कट्वादय आहाराः सर्वाणि दुःखादीनि
प्रयच्छंतिनतत्क्रमेणेत्यर्थः ९

मधुसूदनीटीका ९

अतिशब्दः कट्वादिषुसप्तस्वपियोजनीयः कटुस्तिक्तः कटुरस
स्यतीक्ष्णशब्देनोक्तत्वात् अतिकटुर्निंबादि अत्यम्लातिलवणा
त्युष्णाः प्रसिद्धा अतितीक्ष्णोमरिचादिः अतिरूक्षः स्नेहशून्यः कं
गुकोद्रवादिः अतिविदाही संतापकरो राजिकादिः दुःखंतात्का
लिकी पीडा शोकं पश्चाद्भावि दौर्मनस्यं आमयं रोगं च धातुवैष
म्याहारा प्रददतीतितथाविधा आहारा राजसस्येष्टाः एतैर्लिंगैः
राजसास्तेयाः सात्विकैस्त्वेते हेयत्वेनोपादेया इत्यर्थः ९

सदानंदीटीका ९

सूर्दपर्कविरसनोभावनमायपदये अर्थौथवायासे ॥
कट्वादयस्तत्वत्वारः प्रसिद्धानिंबकादयः योजनीयोतिशब्दस्तक
ट्वादिष्वपिसप्तसु १ मरिचायतितीक्ष्णानिरूक्षाः स्नेहविवर्जिताः
तापकोतिविदाहोस्यास्तेनेदुःखादिदायिनः २ दुःखंतात्कालिकी
पीडाशोकः पश्चाद्भाविवदौर्मनस्यं तथारोगं धातुवैषम्यहेतु
कं ३ ददतीतितथाहाराराजसस्यप्रियाः सदा सात्विकैराजसा
पनेद्येस्मात्सर्वथायतः ९

नीलकंठीटीका ९

कट्वित्यतिशब्दः सर्वत्रसंबध्यते अतिकटुर्निंबादि अत्यम्ला
८४ तिलवणात्युष्णाः प्रसिद्धाः अतितीक्ष्णोमरीचादिः अतिरूक्षः स्नेह
शून्यः कंगुकोद्रवादिः अतिविदाहीराजिकादिः दुःखंतात्का
लिकीपीडा शोकः पश्चाद्भाविदौर्मनस्यं आमयोधातुवैषम्यापा
दनेनरोगास्तत्प्रदाः ९

श्री॰
गी॰ टी॰
सं

39

आनंदीटीका १३

दुःखंहृत्पीडाशोकःशरीरक्लेशता ॥ ९ ॥

रामकंठीटीका १४

अथराजसप्रियानाह — राजसस्यरजःप्रधानस्येष्टाअभिमताएवंविधाआहाराः कीदृशाः कट्वम्लिरसानिम्बादयः तिक्तेहिकटुशब्दव्यवहारोदृष्टोमुनिना यथानिम्बंपरमुनायथैनंमधुसर्पिषा यथैनंगंधमालाभ्यांसर्वस्यकटुरेवस इति अम्लाम्लिका लवणाःक्षारा अत्युष्णाउत्कटोष्णा तीक्ष्णाऊषणमरिचादयो रूक्षाःस्नेहशून्या विदाहिन उग्रवीर्या अतएवमनःशरीरक्लेशहेतत्वाद्दुःखशोकयोर्यथानुशोचनयोरामयानांव्याधीनांदातारः [illegible] १४ ॥

लासिकी [illegible]टीका १५

तथा अतिशब्दःकट्वादिषुसर्वत्रापिसम्बध्यते अतिकटुर्निम्बादिः अत्यम्लअम्लिकादिः अतिलवणोम्लक्षारसिद्धः अतितीक्ष्णोमरिचादिः अतिरूक्षःकोद्रवादिः अतिविदाहीसर्षपादिः एतेआहाराराजसस्यप्रियाभवंति एवंविधैराहारैराजसाज्ञेयाः तथादुःखंतात्कालिकंहृदयसंतापादि शोकंपश्चात्तापविदोर्मनस्य आमयोरोगएतानिप्रयच्छन्ति [illegible]
[illegible] ॥

पंचोलीटीका

कट्वम्ललवणाः अत्युष्णाः तीक्ष्णाः रूक्षाःविदाहिनः अतिकटुः अत्यम्लः अतिशब्दःप्रत्येकंसंबध्यते इत्येवंविधाआहारारा जसस्यइष्टाःप्रियाः एतेउपभुक्ताः संतः दुःखशोकामयप्रदच्छंति ९

रणवीरसमिद्धोयिनी

राजसाहारानाद कटुस्नेति कटवस्तिक रसानिस्वादयः अ
म्लानुकाषाः लवणाःक्षाराः अत्युष्णाउत्कटोस्याः तीक्ष्णमरि
चादयः रूक्षाःस्विदस्न्याःअंउकोद्रवादयः विदाहिनउसवीर्याः
सर्षपादयः अतएवमनःप्रीवत्केपाहे नवा दुःखस्यव्यथायाः
शोकस्यपश्चाद्रूविदोमेनस्यरूपान्तर्धाविनस्यामयानांव्याधीनां
चदायकाआहाराराजसस्यजनःस्वभावस्यप्रियाभवंति ९ ॥

मधुभाष्य

९ ॥

भाषाअनुवादटीका

और अति कटु नींब आदि औ अति अम्ल और अति लवण
औ अति उष्ण कहे गरम औ अतितीक्ष्ण मरिचादि औ अति
रूक्ष औ अति उग्र सरसों आदि ये सब राजस स्वभाव मनु
ष्य को प्रिय होते हैं परन्तु ये सब वस्तु दुःख कहे भोजन
समय मे हृदय को सन्ताप आदि और शोक कहे भोजन
के अनन्तर अप्रसन्नता और आमय कहे रोग ये सब खाने
वाले को देते हैं क्योंकि येसब दुःख शोक मयहै ९

दोहा

कटु अम्ल लवणहि उष्ण तीक्ष्ण रूक्ष विदाहि भोजन रा
जसी इष्ट है रोग शोक दुख दाहि ९॥

यातयामं गतरसं पूतिपर्युषितं च यत् उच्छिष्ट
मपि चामेध्यं भोजनं तामसप्रियं १०

शांकरभाष्यटीका १

यातयाममिति यातयामं मन्दपक्वं निर्वीर्यस्य गतरसेनोक्तत्वा
न् गतरसं रसवियुक्तं पूति दुर्गन्धि पर्युषितञ्च पक्वं सत् रा
त्र्यन्तरितञ्च यत् उच्छिष्टमपि च भुक्तशिष्टमप्यमेध्यमयज्ञा
र्हं भोजनमीदृशं तामसप्रियं १०

आनंदगिरिकृतटीका २

तामसप्रियमाहारमुदाहरति यातयाममिति ननु निर्वीर्यं
यातयाममयुक्तं न पुनः स्वामिपक्वमिति नेत्याह निर्वीर्य
स्येति १०

स्वामिकृतटीका ३

तथा यातयाममिति यातो यामः प्रहरो यस्य पक्वस्यौदनादेस्त
द्यातयामं शैत्यावस्थां प्राप्तमित्यर्थः गतरसं निष्पीडितसारं पू
ति दुर्गंधं पर्युषितं दिनान्तरपक्वमुच्छिष्टमन्यभुक्तावशिष्टं अ
मेध्यमभक्ष्यं कलंजादि एवंभूतं भोजनं भोज्यं तामसप्रियं १०

पिशाचभाष्यमटीका ४

यातयामं गतरसं गतवीर्यं पूति क्लिन्नं विरसं पर्युषितं पक्वमुषः
रीतितं लक्तान्तमुच्छिष्टं भुक्तावशिष्टमपि चेति चेतसमुच्चये अ
मेध्यमयज्ञार्हं तामसानां प्रियं तामसप्रियं स्वयमपि तामसं
१०

रामानुजभाष्यमटीका ५

यातेति यातयामं चिरकालावस्थितं गतरसं त्यक्तस्वाभाविक
रसं पूति दुर्गंधोपेतं पर्युषितं कालातिपत्त्या रसान्तरापन्नं उ
च्छिष्टं गुर्वादिभ्योऽन्येषां भुक्तावशिष्टं अमेध्यमयज्ञार्हं अयज्ञ
शिष्टमित्यर्थः एवंविधं तामसमयं भोजनं तामसप्रियं भवति मु

श्री·
गी·टी·
८·

ज्वतरस्याहारएवभोजनेपुनस्सतमसोवर्द्धनेअतोहितैषिभिःसत्ववृ
द्धयेसात्विकाहारःसेव्यः ९ अभिनवगुप्तकृतटीका ८ + यातःयामोयस्य ॥
सत्वार्थे ९ ॥ ॥

परमार्थप्रपाटीका ७

यातयाममितियातःयामःप्रहरोयस्यःपक्कोदनादिर्शैत्यावस्थांप्रा
प्तंगतरसंनिष्पीडितरसंपूतिदुर्गंधिपर्युषितंशवैकःपक्कंउच्छि
ष्टमन्यभुक्तावशेषंअमेध्यममद्यंकलंकादिएवंभूतंभोजनंता
मसस्यप्रियं ९

वनमालीटीका ८

यातयामंपक्कंसत्प्रहरादिव्यवहितमोदनादिकंशैत्यंप्राप्तंहत
पक्कादिभिन्नंमनरसंविरसंतांप्राप्तंउद्धृतसारंवामथितदुग्धा
दिकंपूतिदुर्गंधंस्वतःपरिणामतोवापर्युषितंगतदिनेपक्कंहुत
पक्कादिभिन्नंवर्षाहेनतत्कालोन्मादकारंधत्तूरादिकंसमुच्चीयते
उच्छिष्टमविहितंभुक्तावशिष्टंअविहितेनविशेषणेनविशुद्धि
हृतंसोमादेःश्रीजगन्नाथमहाप्रसादादेरन्यभुक्तस्यापिगुर्वादिभु
क्तावशेषस्यनतामसत्वंअमेध्यमयज्ञार्हंमत्स्यविमांसादिअपिचे
तिशाहेनवैष्णवकशास्त्राक्रमपंचशस्मृतीयतेएताहृशंभोजनंभो
ज्यंतामसप्रियंएतेर्लिंगैस्तामसोज्ञेयःसात्विकैरिदंभोजनंत्याज्य
मित्यर्थःअन्नरसादिवर्गःसात्विकःकट्वादिवर्गोराजसःयातयामा
दिस्तामसःतत्रसात्विकवर्गविरोधित्वमितरवर्गद्वयेस्पष्टंयत
याद्यतिकट्वादिकंरस्यत्वस्यविरोधितादृशस्यानास्वाद्यत्वात्रूक्ष
त्वस्निग्धत्वविरोधिनीदाहत्वविदाहित्वेधातुपोषणविरोधित्वात्
स्थिरत्वस्निग्धत्वविरोधिनीअम्लसलवणादिकेहृद्यत्वविरोधि^आम नी^
यप्रदत्वमायुःसत्वबलारोग्यविरोधिदुःखशोकप्रदत्वंसुखप्री
तिविरोधिएवंसात्विकवर्गविरोधित्वंएवंचसात्विकवर्गविरोधि
त्वंतामसेपिगतरसत्वयातयामत्वपर्युषितत्वानियथासंभवंरस

त्वशिराय त्वस्थिरत्वविरोधीति प्रतिनोद्दिष्टत्वामेध्यत्वानिष्टत्व
विरोधीति आयुःसत्त्वादिविरोधित्वेन सुखमेव राजसवर्गे दुःख
विरोधिमात्रं तामसवर्गे तु दृष्टादृष्टविरोध इत्यभिप्रायः ९

ऊलमवैजयन्तीटीका ९

तामससमाहारमाह यातयाममिति यातयामं यातोऽतिक्रान्तो
यामः प्रहरो यस्य पक्वस्यौदनादेस्तत् गतरसं त्यक्तस्वाभाविक
रसं दुर्गन्धप्राप्तमादि पूतिर्यन्नीनिहितविपत्तमासादित्वेन दुर्गन्धयु
क्तं पर्युषितं दिनान्तरितं यामत्वेन रसोनतापन्नं पूर्व
दिनपक्वं चशब्दाद्धि नरदेवार्पितं उच्छिष्टं हरिगुरुवैसवेभ्यो
ऽन्येषां भुक्तावशिष्टं अपिशब्दात्पत्तानवशिष्टं चशब्दाद्धीकृत्ता
नर्पितं अमेध्यम् अपवित्रं स्वस्त्रादिस्पर्शदूषितं कलञ्जादिकं चैव
वंविधं यत् भोजनं भुज्यत इति विग्रहः तामसभोज्यलेह्यचोष्याम
कवलविधं आहार्यमेव भोजनं न तु भोज्यमात्रं तत्तामसप्रियं त
मोगुणोपेतस्य पुरुषस्य रुचिकरं तमोगुणवर्द्धनं सात्त्विकैरिति
दूरतो हेयमित्यर्थः ९

मधुसूदनीटीका ९

यातयाममर्धपक्वं निर्वीर्यस्य गतरसपदेनोक्तत्वादिति भाष्योक्त
गतरसं विरसतां प्राप्तं शुष्कं यातयामपक्वं सत्प्रहरादिव्यवहित
मोदनादि शैत्यं प्राप्तं गतरसं रसमुक्तं सारं माथितदुग्धादीनां
स्येयं पूति दुर्गन्धं पर्युषितं पक्वं सद्रात्र्यन्तरितं चेतनतत्कालोन्माद
करं धत्तूरादि समुच्चीयते यदति प्रसिद्धं दुष्टत्वेन उच्छिष्टं भुक्ता
वशिष्टं अमेध्यमयज्ञार्हं मसूरविमांसादि अपिचेति वैद्यकशा
स्त्रोक्तमपथ्यं समुच्चीयते एतादृशं यद्भोजनं भोज्यं तत्तामसप्रियं
सात्त्विकैरतिदूरादुपेक्षणीयमित्यर्थः एतादृशभोजनस्य दुःख
शोकामयप्रदत्वमेवेति केचनोक्तं अत्र च क्रमेण रसादिवर्गः
सात्त्विकः कट्वादिवर्गो राजसः यातयामवर्गस्तामसः इत्युक्तम

श्री· गी· टी· सं·

हारवर्गत्रयं तत्र सात्विकवर्गविरोधित्वमितरवर्गद्वयेऽप्यस्ति तथा
हि अतिकट्वम्लादिकं रस्यत्वविरोधिना हृद्यस्यानास्वाद्यत्वात् रू
क्षत्वं स्निग्धत्वविरोधि तीक्ष्णत्वविदाहित्वे धातुपोषणविरोधि
त्वात् स्थिरत्वविरोधिनी अल्पकालावस्थायित्वं अम्लत्वादिकं
हृद्यत्वविरोधि आमयप्रदत्वमायुः सत्वबलारोग्यविरोधि दुः
खशोकप्रदत्वं सुखप्रीतिविरोधि एवं सात्विकवर्गविरोधित्वं रा
जसवर्गस्योक्तं तथा तामसवर्गेऽपि गतरसत्वयातयामत्वपर्युषि
तत्वानि यथासंभवं रस्यत्वस्निग्धत्वस्थिरत्वविरोधीनि पूतित्वो
च्छिष्टत्वामेध्यत्वानि हृद्यत्वविरोधीति आयुसत्वादिविरोधित्वं
तु स्पष्टमेव राजसवर्गे दृष्टविरोधमात्रं तामसवर्गे तु दृष्टादृष्ट
विरोधश्चात्यतिशयः १०

सारार्थदीटीका ११

अर्द्धपक्वं विरसतां याममायपदं ये अर्थोऽघवायत्यक्तं सत्वहा यां
नगालनः १ शैत्यं प्राप्तं यातयाममुहूर्तसारमीरितं प्रतिदुर्गं
धमिसृक्तं पर्युषितं २ भुक्त्वावशिष्टमुच्छिष्टममेध्यमकृतं वि
तं भोज्यमेतादृशं यत्तमसस्य प्रियं सदा ३ उपेक्षं सात्विकैर्हेरा
दुःखशोकामयप्रदं सात्विकान्नविरोधित्वमुभयत्रसमन्वय
तः ४ राजसे दृष्टदोषोऽस्ति दृष्टादृष्टस्तु तामसे १०

नीलकंठीटीका १२

यातयामं प्रहरात्प्राक्पक्वं शीतलतां गतमित्यर्थः यातयामम
र्धपक्वं निर्वीर्यस्य गतरसेनैवोक्तत्वात् इति भाष्यं गतरसं रस
विमुक्तं पूतिदुर्गंधि पर्युषितं पक्वं सद्रात्र्यन्तरितं उच्छिष्टं भुक्ता
वशिष्टं अमेध्यं यज्ञानर्हं भोजनं अन्नं तामसप्रियं १०

आनंदीटीका १३

तामसमाह यातयामं विगतोष्मं पूतिदुर्गंधि पर्युषि
तमतिक्रांतरात्रिकं गतरसं विनष्टस्वादमुच्छिष्टम् अमेध्यं

स्मृतिनिषिद्धं अस्पृश्यविप्रभवं वा १० ॥

रामकंठीटीका १४

+ अथतामसप्रियमाहारमाह ॥

+ तामसस्य तमःप्रधानस्वभावस्याहुरेवमशनमभिमतं की
दृशं यातयाममतिक्रान्तपक्वकालं गतरसं विनष्टास्वादं त
था पूति दुर्गंधि तथा पर्युषितमतिक्रान्तरात्रिकं यदभक्ष्यं ते
नोक्तमुच्छिष्टमप्यतिभुक्तशिष्टमन्येन वा जुष्टममेध्यं स्वभा
वादेव अशुद्धमशुद्धसंपर्कात्वा सात्विकस्याप्यवस्थावशा न
त्कष्टादिराजसाहारप्रियता संभवति निश्चवहारदर्शनात
स्वभावमात्रविषयएव विभागनियमो वेदितव्यः [illegible]
[illegible] १० ॥

लासिकी [illegible]टीका १५

तथा यातो यामः प्रहरो यस्य पक्वस्यौदनादेस्तद्यातयामं शैत्या
वस्थां प्राप्तमित्यर्थः गतरसं विगतास्वादम् पूतिदुर्गंधि प
र्युषितं पक्वं सद्रात्र्यन्तरितम् उच्छिष्टमन्यभुक्तावशिष्टम् अ
मेध्यमभक्ष्यं कलंजादि एवंभूतं भोजनं भोज्यं तामसप्रियं
अनेन तामसो ज्ञातव्यः [illegible]
[illegible] १० ॥

पंचोले टीका

तामसमाहारमाह यातयाममिति यदन्नं भोजनं यातयामे मेद
पक्वे गतरसं रसविशुष्कं दुर्गंधं पूतिदुर्गंधं पर्युषितं पक्वे सति रात्र्या
न्तरितं चान्यत् उच्छिष्टमपि भक्तावशिष्टं अमेध्यं यत्तानहं
ईदृशं भोजनं तामसानामिष्टं प्रियमपीष्टम् १० ॥

यं

प्रथतामसप्रियान्नाह यातयाममिति यातयाममतिक्रांतबहु
कालंघोत्यायवस्थांप्राप्तमिति यावत् गतरसं रसनिष्पीडना
च्छेत्याद्यविनष्टास्वादं पूतिदुर्गंधं तथापर्युषितं व्यतीतनिशाप्र
वेदिनपक्वं तथा उच्छिष्टं दंपतिभुक्तावशिष्टं प्रत्येनवाभुक्ता
परित्यक्तं अमेध्यं स्वभावादेवापवित्रं वस्त्वंतरसंपर्काद्दा दुष्टं हवा
दमहृद्य एतादृशं भोजनं तमःस्वभावस्याभिरुचिकरं यद्यपि
रस्यादयो राजसतामसयोरपि कदाचित्कतयासंभवत्यियत्ता
कामवंति कट्वादयः सात्विकतामसयोरपि तथापिप्रायपो
तिमारं संसेव्यमानाः स्वभावं व्यंजयंतीतितात्पर्यं १०॥

मधुभाष्य

१०॥

भाषाअनुवादटीका

और जो अन्न यातयाम कहे जिस्को एक पहर बीत गया औ ठंढा हो गया और गतरस कहे जिसका रस सूख गया सी ठीसा रहगया औ पूति कहे दुर्गन्धयुक्त जो है और पर्युषित कहे बासी अन्न औ उच्छिष्ट कहे दूसरे का जूठा और अमेध्य कहे अपवित्र अभक्ष मांस आदि ऐसे आहार तामस स्वभाव मनुष्यों को प्रिय लगते हैं १०

दोहा

यातयाम रसहीन जो दुर्गंध बहुकालीन । है उच्छिष्ट अ
पवित्रहि तामसी प्रिय भक्ष्यकीन १०॥

अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्य
मेवेति मनः समाधाय स सात्विकः ॥

शांकरभाष्यटीका १

अथेदानीं यज्ञस्त्रिविध उच्यते अफलेति अफलाकांक्षिभिरफ
लार्थिभिर्यज्ञो विधिदृष्टः शास्त्रचोदनादृष्टो यो यज्ञ इज्यते निर्व
र्त्यते यष्टव्यमेवेति यज्ञस्वरूपनिर्वर्तनमेव कार्यमिति मनः
समाधाय नानेन पुरुषार्थो मम कर्तव्य इत्येवं निश्चित्य स सात्वि
को यज्ञ उच्यते ॥

आनंदगिरिकृतटीका २

ज्ञानादानेषु यज्ञस्त्रिविध उच्यते आहारत्रैविध्यमेवं विभज्य क्रम
प्राप्तं यज्ञत्रैविध्यं कथयति अथेति तत्र सात्विकं यज्ञं तावय
ति अफलेति फलाभिसंधिं विना यज्ञस्वरूपमेव भाव्यमि
ति बुद्ध्या शास्त्रतोऽनुष्ठीयमानो यज्ञः सात्विक इत्यर्थः ॥

स्वामिकृतटीका ३

यज्ञोऽपि त्रिविधः तत्र सात्विकं यज्ञमाह अफलाकांक्षिभिरिति फ
लाकांक्षारहितैः पुरुषैः विधिनादृष्ट आवश्यकतया विहितो
यो यज्ञ इज्यतेऽनुष्ठीयते स सात्विको यज्ञः कथमिज्यते यष्टव्यमे
वेति यज्ञानुष्ठानमेव कार्यं नान्यत्फलं साधनीयमित्येवं मनः
समाधायैकाग्रं कृत्वेत्यर्थः ॥

पिशाचभाष्यटीका ४

मनः कृत्वा यज्ञः सात्विकः ॥

रामानुजभाष्यटीका ५

अफलेति फलाकांक्षारहितैः पुरुषैः विधिदृष्टः शास्त्रदृष्टमंत्र
द्रव्यक्रियादिभिर्युक्तः यष्टव्यमेवेति भगवदाराधनत्वेन स्वप्रयो
जनतया यष्टव्यमि[illegible]ति मनः समाधाय यो यज्ञोऽज्यते स सात्विकः
॥

अभिनवगुप्तकृतटीका ६ समाधाय निश्चयेनानुसंधाय ॥

परमार्थप्रपाटीका १

अथ यज्ञोऽपि त्रिविधस्तत्र सोपाधिकं यज्ञमाह अफलाकांक्षिभिरिति त्रिभिः
कुर्वन्नेवेह कर्माणीत्यादिविधिना यष्टव्यमेवेति इष्टोऽयत्तः फलाकां
क्षारहितैः पुरुषैर्मनः समाधाय शुद्धं कृत्वा यज्ञस्तेऽनुष्ठीयते स
सात्विकः ११

वनमालीटीका ८

यज्ञभेदमाह अफलेति अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादि
र्यज्ञः काम्यो नित्यश्च फलसंयोगेन विहितः सर्वांगोपसंहारेणै
व सम्यक् कर्तव्यो नान्यथा यावज्जीवनिमित्तसंयोगेन फलसंयो
गं विनैव विहितः सर्वांगोपसंहा[illegible]रासंभवे यथा
शक्त्यनुकल्पादिनाप्यनुष्ठेयो नित्यः तत्र सर्वांगोपसंहारासंभ
वेऽपि प्रतिनिधिमुपादायावश्यं यष्टव्यमेव प्रत्यवायपरिहाराया
वश्यकजीवनादिनिमित्तेन चोदितत्वादिति मनः समाधाय नि
श्चित्य योऽयं यज्ञस्तेनानुष्ठीयते स यथाशास्त्रमेनः करणाध्य
र्थमनुष्ठीयमानः सात्विको ज्ञेयः ११

[illegible]वेजयवीटीका ९

अथ यज्ञस्य त्रैविध्यमाह त्रिभिस्तत्रादौ सात्विकयज्ञमाह अफले
ति अफलाकांक्षिभिः फलस्याकांक्षा तेन रहितैः फलाभिलाषशू
न्यैः पुरुषैः यो विधिदृष्टो मन्त्रद्रव्यक्रियादिप्रतिपादकाद्वेदवि
धिवाक्याद्दृष्टः प्राप्तो यः तत्र इज्यते यजनं क्रियते स यज्ञः सात्विकः स
त्वगुणो येनो भवति ननु फलाकांक्षां विना यज्ञे प्रवृत्तिरेव कथं
स्यादिति चेत्तत्राह मामेवोद्दिश्य शास्त्रेणोक्तत्वात्तस्याः यष्टव्यमेव
भगवदाराधनरूपयजनमावश्यकर्तव्यमेवास्ति न तु तद्यज
नेन फलसाध्यमस्तीत्येवं प्रकारेण मनः समाधाय एकाग्रं कृत्वा
यजनविषये पवमनो विधायैवेत्यर्थः ११

मधुसूदनीटी १०

इदानीं क्रमप्राप्तं त्रिविधं यज्ञमाह त्रिभिः अग्निहोत्रदर्शपूर्णमा
सचातुर्मास्यपशुबंधज्योतिष्टोमादियज्ञो हि द्विविधः काम्यो नित्य
श्च फलसंयोगेन चोदितः सर्वांगोपसंहारेणैव स्वसाकल्येनानु
ष्ठेयः काम्यः फलसंयोगं विना जीवनादिनिमित्तसंयोगेन चोदितः
सर्वांगोपसंहारासंभवेऽपि शक्तितिथ्यनुपादानेनापि स्वसाकल्येनानु
ष्ठेयो नित्यः तत्र सर्वांगोपसंहारासंभवेऽपि प्रतिनिधिमुपादा
यावश्यं यष्टव्यमेव प्रत्यवायपरिहारायावश्यकं जीवनादिनिमि
त्तेन चोदितत्वादिति मनः समाधाय निश्चित्य अफलाकांक्षिभिर
तः करणशुद्ध्यर्थितया काम्यप्रयोगविलक्षणैर्विधिदृष्टो यथाशा
स्त्रनिश्चितो यो यज्ञ इज्यते अनुष्ठीयते स यथाशास्त्रमंतःकर
णशुद्ध्यर्थमनुष्ठीयमानो नित्यप्रयोगः सात्विको ज्ञेयः ११

सदानंदीटीका ११

त्रिविधं यज्ञमाहेशः क्रमप्राप्तमिहाधुना अनुष्ठेयो हि द्विधा यज्ञः का
म्यो नित्यश्च तत्र तु १ नित्यो यष्टव्यमेवेति प्रत्यवायजिहासया मनो
निश्चित्य शुद्ध्यर्थं न या काम्यपराङ्मुखैः २ यज्ञोऽनुष्ठीयते शास्त्रैर्नि
श्चितो यो यथाविधि विज्ञेयः सात्विको यज्ञो नृभिर्नाथी विशुद्धये
११

नीलकंठीटीका ११

यज्ञत्रैविध्यमाह अफलेति विधिदृष्टः आवश्यकतया विहितः य
ष्टव्यमेव न तु यज्ञाद्दृष्टमदृष्टं वा फलं प्राप्तव्यमिति मनः समाधाय
समाहितं कृत्वा यो यज्ञ इज्यते स सात्विकः ११

आनंदीटीका ११

यज्ञादित्रैविध्यमाह अयीदितिश्रुतिचोदनाविधिः ११ ॥

रामकंठीटीका ११

+इदानीं यज्ञादीनां त्रैविध्यमाह अत्र यज्ञ स्तावत्॥

+स सात्विकः सात्विकपुरुषानुष्ठेयत्वात्सत्वहेतुको यज्ञो याग
विधिरुच्यते कोसौ बलं दृष्टादृष्टं सौभाग्यं कांक्षति प्रार्थयते

श्री॰ गी॰ टी॰ सं

यः सफलाकांक्षी तद्विपरीतस्त्वफलाकांक्षी तेन तथाविधे-
न निरभिसंधिना तेन च ना यन्मनुष्याणां य इज्यते अनुष्ठीयते की-
दृशो विधिदृष्टः विधीयते अनेन कार्यमिति विधिः शास्त्रं त-
स्मिन्विधौ शास्त्रे दृष्टो विभावित इति कर्तव्यतास्वरूपो फला-
कांक्षिणा चेज्यते चेत् प्रतिषेधं निराकर्तुमाह यष्टव्यमिति।
कथमिज्यते इष्टव्यं वर्णाश्रमविभागेन शास्त्रचोदितं सहजं या-
गाख्यं कर्मावश्यकर्तव्यमेवेति चित्तं समाधाय हित्वान्यत् न तत्फ-
ललिप्सायां यदपि यज्यते तेन निष्कामस्य क्रिया संभवतीति तत्र भ्र-
मः नैवेच्छामात्रस्य प्रतिषेधो निष्कामता मनाक् किं तु दृष्टानुश्रा-
विकभोगविषयसंकल्पाभावो निष्कामता विवदितेह
[illegible] ११ ॥

ववप

+ अथत्रिविधयज्ञमध्ये सात्त्विकं यज्ञमाह॥

लासिकी [illegible]टीका १५

+दृष्टादृष्टफलाकांक्षारहितैः पुरुषैर्विधिदृष्टः विधीयते अनेन का-
र्यम् अनेनेति विधिः शास्त्रम् तत्र दृष्टो विभावितो यो यज्ञ इज्यते
अनुष्ठीयते कथमित्याह यष्टव्यमेवेति वर्णाश्रमविभागेन शास्त्र-
चोदितं सहजं यागाख्यं कर्मावश्यमनुष्ठेयमित्येवं मनश्चित्तं स-
माधाय समाहितं कृत्वा इज्यते न तु फललिप्सया स सात्त्विको य-
ज्ञः [illegible] ११ ॥

पंचोले टीका

अथ यज्ञत्रैविध्ये सात्त्विकं यज्ञमाह अफलेति यो यज्ञः अफलाकां-
क्षिभिः फलकामनारहितैः पुरुषैः मनः समाधाय यष्टव्यमेवे-
ति बुद्ध्या निश्चित्य विधिदृष्टः वेदवाक्यविहितत्वात् इज्यते स सा-
त्त्विकयज्ञः उच्यते ११

रणवीरसमिद्धोधिनी॥

इदानीं त्रिविधानां यज्ञानां मध्ये सात्त्विकं यज्ञं दर्शयति अफला।
कांक्षिभिरिति फले दृष्टादृष्टरूपमुभयमपि विनश्वरं नाकां।
क्षितुं शीलं येषां तैस्तादृशैः फलमनपेक्ष्यैव प्रवर्तमानैः परमे।
श्वरचोदितमेतद्यज्ञादिकर्मावश्यमाचरणीयमेवान्यथा प्रत्यवा
यदर्शनादित्येवं विवेकेन चित्तं निश्चलीकृत्य यो विधिदृष्टो वि
धिना इतिकर्तव्यतापौर्वापर्यप्रतिपादकयथावर्णयिकृतवे
देन दृष्टोऽन्तर्भावितपर्यन्तयादर्शितो विभावितो यज्ञोऽग्निहोत्रादि
लक्षणोऽश्वमेधादिलक्षणश्च स स्ववर्णोचितो यथा इज्यते अनुष्ठीय
ते स सात्त्विको भवतीत्यर्थः ११॥

मधुभाष

१२॥

भाषाअनुवादटीका

और यज्ञ भी तीन प्रकार हैं तिनके बीचमे सात्विक जो यज्ञ सो
तीन श्लोक से कहते हैं कि जो पुरुष फलकी आकांक्षा रहित
अवश्य कर्त्तव्य है यह जानि यज्ञ करते सो सात्विक कहावती
है और वे मनुष्य किस कारण से यज्ञ अनुष्ठान करते इस पर
कहते हैं कि यज्ञकर्म्म करना ही चाहिये और कोई फलके
अर्थ कर्तव्य नहीं है ऐसा विचारि मनको एकाग्र करके यज्ञ क
रते हैं ॥

दोहा

अभीलाषा फलकी रहित विधिवत यज्ञ करें जोय यजन।
योग्य यह धार मन यज्ञ करें सात्विक सोय ॥

अभिसंधाय तु फलं दंभार्थमपि चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं ॥ १२ ॥

शांकरभाष्यटीका १

अभिसन्धायेति अभिसन्धायोद्दिश्य फलं दम्भार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं १२

आनंदगिरिकृतटीका २

राजसं यज्ञं हानार्थं दर्शयति अभिसन्धायेति स्वर्गाद्युद्दिश्य धार्मिकत्वख्यापनार्थञ्च यद्यज्ञनं क्रियते तद्यज्ञं राजसात्त्विहेन त्याज्यमवगच्छेत्यर्थः १२

स्वामिकृतटीका ३

राजसं यज्ञमाह अभिसंधायेति फलमभिसंधायोद्दिश्य यदिज्यते यज्ञः क्रियते दंभार्थं वा महत्त्वख्यापनाय तं यज्ञं राजसं विद्धि १२

पिशाचभाष्यटीका ४

अभिधाय तु फलं यत्फलं मे स्यादित्यभिसंधाय संकल्प्य दंभार्थमपि चैव यत् धार्मिकत्वख्यापनार्थमेव यो यज्ञः इज्यते निर्वर्त्यते यं तं राजसं विद्धि १२

रामानुजभाष्यटीका ५

अभिसंधायेति फलाभिसंधियुक्तं दंभगर्भं यशोर्थफलं च यो यज्ञ इज्यते तं यज्ञं राजसं विद्धि १२

अभिनवगुप्तकृतटीका ६ ॥ दंभो लोको मामेवं विजानीयादिति ॥

[illegible] १२ ॥ ॥

परमार्थप्रपाटीका ७

राजसं यज्ञमाह अभिसंधायेति फलमभिसंधायोद्दिश्य दंभोर्थं महत्त्वख्यापनार्थं य इज्यते तं राजसं यज्ञं विद्धि १२

वनमालीटीका ८

फलं स्वर्गादि अभिसंधायोद्दिश्य न तु चित्तशुद्धिं दंभार्थमपि

श्री॰
गी॰ टी॰

५९

त अपिचैवेत्यनेनविकल्पसमुच्चयौसूचितौपारलौकिकंफलम
भिसंधायैवदंभार्थत्वेपिपारलौकिकफलानभिसंधानेपिदं
भार्थमेवेतिविकल्पेनह्यैपतौपारलौकिकफलार्थमप्यैहि
लौकिकदंभार्थमपीतिसमुच्चयेनैकःपक्षःएवंदृष्टादृष्टफ
लाभिसंधिनांतःकरणशुद्धिमनुद्दिश्यइज्यतेयथाशास्त्रेपो
यज्ञोनष्टीयतेतंयज्ञंराजसंविद्धि ॥ १२

ऊष्मसवैनपवी टीका १

राजसयज्ञमाहअभिसन्धायेति तुपुनःफलमिहराज्यधनधाम
दारपुत्रपश्वादिरूपममुत्रदेवाङ्गनाधरामृतपानरूपंअभिसं
धायोद्दिश्यदम्भार्थंईहयत्तकर्मायत्तदत्तएवनान्यइत्येवंलो
केषुयशःख्यापनायअपिशब्दाज्जातिकुलविद्याधनयौवन
वलरूपादिनिमित्ताभिमानार्थंचशत्रूनमारणमोहनोच्चाट
नादिरूपाभिचारार्थंएवकारानस्वस्यलोकस्वामित्वपूज्यत्व
श्रेष्ठत्वप्रतिष्ठात्वादिप्रसिद्ध्यर्थंयदिमार्षेयोयज्ञोरजोगुणोपेतैः
पुरुषैरिज्यतेयजनंक्रियतेहेभरतश्रेष्ठतंयज्ञंराजसंरजोगुणोपे
तंविद्धित्वंजानीहिसंवोधनेनत्वानवतांभरतवंश्यानांमध्येत्वं
श्रेष्ठोस्यनत्वत्तवरजोगुणोनास्तीतिसूचितम ॥ १२

॰दि
॰ना

मधुसूदनीटीका १

फलंकाम्यंस्वर्गादिअभिसंधायोद्दिश्यनत्वंतःकरणशुद्धिं
तन्नित्यप्रयोगवेलदार्णसूचनार्थः दंभोलोकेधार्मिकत्वख्या
पनंतदर्थं अपिचैवेतिविकल्पसमुच्चयाभ्यांत्रैविध्यसूचना
र्थो पारलौकिकंफलमभिसंधायैवादंभा[illegible]र्थत्वेपिपार
लौकिकफलानभिसंधानेपिदंभार्थमेवेतिविकल्पेनद्वौपः
दौपारलौकिकफलार्थमप्यैहलौकिकदंभार्थमपीतिसमु
च्चयेनैकःपक्षःएवंदृष्टादृष्टफलाभिसंधिनांतःकरणशुद्धि

मनुद्दिश्य यदिज्यते यथाशास्त्रं योयज्ञोनुष्ठीयते तं यज्ञं राजसं विद्धि ज्ञा
नीहि ह्यनाय हे भरतश्रेष्ठेति योगावसंस्तुवनं १२

सदानंदीटीका १२

स्वर्गादिफलमुद्दिश्य लोके दंभार्थमेव वा चित्तशुद्धिमनुद्दिश्य ह
ष्टादृष्टफलेप्सुना १ यस्मान्नुष्ठीयते शास्त्रतो यज्ञं विद्धि राजसं
ह्यनाय भरतश्रेष्ठ योग्योसि त्वं न सात्विकं २ काम्यो मुमुक्षुभि
र्हेयः सर्वथेमाशयोहरेः १२

नीलकंठीटीका १२

राजसं यज्ञमाह अभिसंधायेति १२

आनंदीटीका १२

फलानुपलब्धेरारब्धपूर्वकर्मत्यक्ता द्वितीयस्य कर्तव्ये छ्याचलं
अफलवमनुपलब्धेपि सद्योनाशादस्थिरम् १२ ॥

रामकंठीटीका १५

येकेचित्कर्मणिशास्त्रोक्तं विधिं परित्यज्य श्रद्धयानिर्विकल्पं फल
तं भावनया [illegible] तयान्विताः संतोवर्तन्ते क्रियासु यव
[illegible] किं सत्वं हिं सात्विकी तिदिले
[illegible] कि [illegible] मनसो अहो + अथराजसयज्ञमाह ॥
[illegible] भगवानुवाच १२ ॥+ न मे वं विधं यज्ञं राजसं रजः प्रधान
मनुष्ठेन च कर्तृत्वाहंकृतत्वाद् जो गुणात्मकफलमतएव चलं
निश्चयाभावादव्यवस्थितं फलव्यभिचारात्त्वाफलवमनाव
श्यकं नेकंयः फलं स्वर्गादिभोग्यमभिसंधाय संकल्प्य न
याद्दंभार्थं दंभोदृष्टमविकृतत्वादृष्टफलाविषयः क्रियार्थः
प्रयोजनं यत्र तथ्यज्ञेनानुष्ठीयते [illegible] १२ ॥

राजसयज्ञमाह लासिकी [illegible]टीका १५

फलमहष्टं पारलौकिकं दंभार्थमपीति दृष्टमैहलौकिकं फ

श्री गी॰ टी॰ सं

लं चाभिसंधाय संकल्प्य यदिज्यते यज्ञः क्रियते तं यज्ञं राजसं विद्धि [illegible] ॥

50

पंचोले टीका

राजसं यज्ञमाह अभिसंधायेति हे भरतश्रेष्ठ तु पुनः फलमभिसंधाय फलमाद्दिश्य अपि च दंभार्थं यत् इज्यते तं यज्ञं राजसं विद्धि १२

रणवीरसमिद्धोयिनी

अथ राजसं यज्ञं प्रतिपादयति अभिसंधायेति फलं स्वर्गादिभोगमभिसंधाय संकल्प्य तथा दंभार्थमपि अदृष्टमुद्दिश्य कृत्वा दृष्टफलविषया क्रिया दंभस्तदर्थमपि यो यज्ञ इज्यते तं विद्धि भारत नृप राजसं यज्ञं विद्धि जानीहि १२॥

मधुभाष्य

१२॥

भाषाअनुवादटीका

राजस यज्ञ कहते हैं कि हे भरत श्रेष्ठ अर्जुन फलकी कामना पूर्वक अपने महत्व को जनावने के अर्थ जो यज्ञ की जाय सो राजस यज्ञ जानो १२

दोहा

वांछा फलकी धारके दंभ प्रयोजन जोय यज्ञहि भारत श्रेष्ट तिह जानि राजसी कोय १२

विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धा
विरहितं यज्ञं तामसं परिचक्षते १३

शांकरभाष्यटीका १

विधिहीनमिति विधिहीनं यथाचोदितविधिविपरीतं असृष्टान्नं ब्राह्मणेभ्योऽन सृष्टमन्नं यस्मिन् यज्ञे सोऽसृष्टान्नस्तमसृष्टान्नं मन्त्रहीनं मन्त्रतः स्वरतो वर्णतश्च वियुक्तं मन्त्रहीनं अदक्षिणमुक्तदक्षिणारहितं यज्ञं तामसं परिचक्षते तमोनिर्वृत्तं कथयन्ति १३

आनंदगिरिकृतटीका २

तामसं यज्ञं हानार्थमेवोदाहरति विधीति १३

स्वामिकृतटीका ३

तामसं यज्ञमाह विधिहीनमिति विधिहीनं शास्त्रोक्तविधिशून्यम् असृष्टान्नं ब्राह्मणादिभ्यो न निष्पादितमन्नं यस्मिंस्तं मंत्रैर्हीनं यथोक्तदक्षिणारहितं च श्रद्धाशून्यं यज्ञं तामसं परिचक्षते कथयन्ति शिष्टाः १३

पैशाचभाष्यटीका ४

विधिहीनमशास्त्रचोदितमसृष्टमन्नदानादिरहितं मंत्रहीनं मंत्रवर्जितमदक्षिणं दक्षिणारहितं यज्ञं तामसं परिचक्षते कथयंतीति १३

रामानुजभाष्यटीका ५

विधीति विधिहीनं ब्राह्मणोक्तविधिहीनं सदाचारयुक्तैर्विधिविद्भिर्ब्राह्मणैर्यजस्वेत्युक्तिहीनमित्यर्थः असृष्टान्नं अचोदितद्रव्यं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते [illegible] [illegible] १३

अभिनवगुप्तकृतटीका ६

[illegible]

श्री·
गी·टी·
सं·

५२

१३॥

[illegible]विधिहीनमिति शास्त्रोक्तक्रियाहीनं तद्दे
वाल्लक्षणादिभिर्विशेषणैर्विनमन्ते ॥

परमार्थप्रपाटीका ७

तामसमाह विधिहीनमिति विधिहीनं शास्त्रोक्तविधिहीनं॰
शास्त्रोक्तविधिशून्यं न सृष्टं निष्पादितं ब्राह्मणेभ्यो ऽन्नं यस्मिन्
मंत्रैः स्वरशास्त्रोक्तैर्हीनं यथावद्दक्षिणारहितं श्रद्धयावरहितं
एवंविधं यज्ञं तामसं परिचक्षते ॥

वनमालीटीका ८

यथाशास्त्रबोधितविपरीतं अन्नदानहीनं स्वरतो वर्णतश्च मंत्रही
नं रागद्वेषादिना श्रद्धारहितं तामसं यज्ञं परिचक्षते शिष्टाः विधि
हीनाद्यैकैकविशेषणैः पंचविधः सर्वविशेषणसमुच्चयेन वैक
ल्पिकश्चेति षड्विधिविवक्षितविशेषणसमुच्चयेन च बहुविधो भवत्ता
मसयज्ञस्तेन यो राजसे यज्ञे तेविनश्यभावे ऽपि फलोत्पादकमपूर्वम
स्ति यथाशास्त्रमनुष्ठानात् तामसे त्वयथाशास्त्रानुष्ठानान्न किम
प्यपूर्वमस्तीत्यभिप्रायः ॥

ऊसमवैजयन्तीटीका ९

तामसयज्ञमाह विधिहीनमिति विधिहीनं वेदविधिविद्भिः सदा
चारनिष्ठैर्ब्राह्मणैस्त्वयज्ञस्व तेषां हितकारिणा वाक्येन विद्यासंकुरु
ष्वेति वेदविद्भिर्ब्राह्मणैर्युक्तिर्विधिस्तद्रहितं असृष्टान्नं ब्राह्मणा
दिभिस्त्यक्तोज्झितमन्नं यस्मिन् यद्वा ब्राह्मणादिभ्यो न सृष्टं न संपादि
तमन्नं ईदृशं यस्मिंस्तत् यद्वा असृष्टमदत्तमन्नं यस्मिन् मंत्रहीनं पदक्रम
स्वरवर्णादिहीनं [illegible]पेतं अदक्षिणं यथायोग्यदक्षिणारहितं श्रद्धा
विरहितं मित्रकादिषाण्चयाश्रविगादिविद्वेषेण वा श्रद्धाशून्यं ई
दृशं यज्ञं तामसं तमोगुणोपेतं परिचक्षते सज्जनाः कथयन्ति ॥

^नमंत्रेणे

मधुसूदनीटीका १०

यथाशास्त्रबोधितविपरीतं अन्नदानहीनं स्वरतो वर्णतश्च मंत्रही
नं यथोक्तदक्षिणाहीनं ऋत्विग्द्वेषादिना श्रद्धाविरहितं तामसं य
ज्ञं परिचक्षते शिष्टाः विधिहीनत्वाद्येकैकविशेषणैः पंचविधः
सर्वविशेषणसमुच्चयेन चैकविध इति षट् द्वित्रिचतुर्विशेषण
समुच्चयेन च बहवो भेदास्तामसयज्ञस्य तेषां राजसेभ्यस्तैः कर
णाद्यभावेपि फलोत्पादकमपूर्वमस्ति यथाशास्त्रमनुष्ठानात् ता
मसे त्वयथाशास्त्रानुष्ठानात्र किमप्यपूर्वमस्तीत्याशयः [illegible]
[illegible]
[illegible]

सदानंदीटीका ११

विधिहीनं यथाशास्त्रावबोधितद्विपर्ययं अन्नदानविहीनं च स्वर
तो वर्णतस्तथा १ मंत्रहीनं यथाशास्त्रदक्षिणाहीनमध्वरं आस्ति
क्यबुद्धिशून्यं तं तामसं कथयंति वै २ अयं पंचविधो यज्ञस्त्याज्यः
श्रेयोर्थिभिः सदा यथाशास्त्रमनुष्ठानाद्राजसेस्ति फलमनाक्
तामसे त्वयथाशास्त्रानुष्ठानान्न फलमनाक् ११

नीलकंठीटीका १२

विधिहीनं शास्त्रोक्तविधिहीनं असृष्टान्नं दत्तमन्नं यस्मिन्न तं असृष्टा
न्नं १२

आनंदीटीका १३

विधिरितिकर्तव्यताहीनं असृष्टान्नं पाकादिसंस्काररहिता
न्नम् १३ ॥

रामकंठीटीका १४

अथ तामस
माह

विधिहीनं शास्त्रोक्तेतिकर्तव्यतारहितं तथा असृष्टान्नमसृष्टं पा
कादिसंस्कारविरहाद्विरसमन्नादि यत्र तथा मंत्रहीनं तत्तत्
क्रियाविहितेन रहितं तथा दक्षिणां दक्षिणालक्षणेन प्रधाने
नांगेन शून्यं तथा श्रद्धया कुलक्षणया विनाकृतं एवंविधं

श्री·
गी·टी·
सं

यज्ञं तामसपुरुषकर्तृकमाह: [illegible] १३

[illegible] ॥ १२ ॥

लामिकी टीका १५

तामसंयज्ञमाह —

विधिनाशास्त्रोक्तयेतिकर्तव्यतयारहितम् तथासृष्टान्नम असृष्टं विरसमन्नं भोज्यं यत्र हंसपाठे तु अन्नदानहीनम् स्वरतो मंत्रतश्च मंत्रहीनम् मुख्यांगभूतदक्षिणाशून्यम् श्रद्धया संभावनयारहितमेवंविधं यज्ञं तामसं तामसपुरुषकर्तृकं परिचक्षते कथयंति [illegible] ॥ १३ ॥

पंवोले टीका

तामसंयज्ञमाह विधिहीनमिति विधिहीनं यथाशास्त्रविहि तविपरीतं असृष्टान्नं वा असृष्टानि भोज्यान्नं सृष्टं अन्नं प्रचुरं यस्मिन्य ज्ञे स असृष्टान्नः तं मंत्रहीनं मंत्रैः स्वरतो वर्णतो हीनं अदक्षिणं उक्तदक्षिणारहितं श्रद्धाविरहितं श्रद्धया आस्तिक्यबुद्ध्या रहितं ईमलिंगयुक्तं यज्ञं तामसं नमोगुणनिष्पन्नं परिचक्षते १३

रणवीरसामिद्बोधिनी॥

अथ तामसमाह विधिहीनमिति विधीयते अनेन कार्यमिति विधि रितिकर्तव्यता तया हीनं तथा असृष्टान्नम् अदत्तभोजनं तथा मंत्रहीनं मंत्रो नीतिरहस्य देवताप्रकाशको वेदैकदेशो वा तेन वर्जितं त था अदक्षिणं कर्मणः सांगता संपादकः समापनानंतरं दीयमा नो यथा स्वकोविदादिको दक्षिणा प्रकृते तु भट्टादीनां संतोषोपा दनपूर्वं समाराध्यकर्मणि प्रहृतिजनकं वेतनादिदानं कार्यं साधि ते सति पारितोषिकादिदानं च दक्षिणा तया हीनं अथवा दक्षिणं प्राक्षिणोदितं सरलक्रमत्यागेन कुटिलमार्गानुगतं तथा श्रद्धयोक्त

63

लक्षणयाविशुद्धितं यत्तं कर्माचरणलक्षणं नामसंपरिवक्षते
कथयंति १३

मधुभाष्य

१३॥

भाषाअनुवादटीका

अब तामस यज्ञ कहते हैं कि विधि हीन औ असृष्टान्न कहे जो
य ज्ञके अर्थ अन्न ब्राह्मण क्षत्रिय वैश्यसे नहीं मिला होय सो
अन्न औ मन्त्रहीन औ दक्षिणा दान रहित होय तथा श्रद्धा व
र्जित यज्ञ को तामस यज्ञ कहते हैं १३

दोहा

हीनविधि असृष्ट अन्न अमंत्र अदक्षिण जोय श्रद्धारहित
हि यज्ञजो तामस कहियत सोय १३

55

देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवं ब्रह्मचर्य
महिंसाचशारीरंतपउच्यते १४ ॥

शांकरभाष्यटीका १

अथेदानीं तपस्त्रिविधमुच्यते देवेति देवाश्चद्विजाश्च गुरवश्च [illegible]
[illegible] प्राज्ञाश्च देवद्विजगुरुप्राज्ञास्तेषांपूजनं शौच आर्जवं ऋजुत्वं ब्र
ह्मचर्यमहिंसा चशरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव का
र्यकारणैः कर्त्रादिभिः साध्यं शारीरन्तपउच्यते । १४

आनंदगिरिकृतटीका २

सात्विकादिभावं निरूपयितुं सर्वस्य तपसः स्वरूपं त्रिविधं निरू
पयति अथेति तत्रशारीरन्तपोनिर्दिशति देवेति देवाब्रह्मविष्णु
शिवादयः द्विजाः पूज्यत्वात् द्विजोत्तमाः गुरवः पित्रादयः प्राज्ञाः प
ण्डिता विदितवेदितव्यास्तेषां पूजनं प्रणामशुश्रूषादि शौचं म
जलाभ्यां शरीरशोधनं आर्जवमृजुत्वं विहितप्रतिषिद्धयोरे
करूपप्रवृत्तिनिवृत्तिमत्वं ब्रह्मचर्यं मैथुनासमाचरणं अहिंसा प्रा
णिनामपीडनं शरीरमात्रस्य निर्वर्त्यत्वमस्य तपसो नसंभवतीति
मत्वा विशिनष्टि शरीरेति १४ स्वामिकृतटीका ३

तपसःसात्विकादिभेदंदर्शयितुंप्रथमंतावच्छरीरादिभेदेनतस्यत्रै
विध्यमाह देवद्विजेतित्रिभिः प्राज्ञागुरुव्यतिरिक्ताअन्येपितत्वविदः
देवब्रह्मणादिपूजनंशौचादिकंमृज्जलादिनानिष्पाद्यमार्जवमव
क्रताब्रह्मचर्यंगृहस्थस्य[illegible]तुकालाभिगामित्वमितरेषांस्त्रीप्रेक्ष
णसंलापादिवर्जनंमैथुनराहित्यंअहिंसापरपीडाराहित्यंशारी
रंशरीरनिर्वर्त्यंतपउच्यते १४ पिशाचभाष्यटीका ४

इदानींत्रिविधंतत्सात्विकंदर्शयितुमाह देवद्विजगुरुप्राज्ञाश्च दे
वद्विजगुरुप्राज्ञाः देवाअग्न्यादयः प्राज्ञास्तत्वविदस्तेषांपूजनं शौ
चंमृज्जलादिसाध्यंआर्जवम[illegible]ज्जुता[illegible]ब्रह्मचर्यंस्त्री[illegible]

+ अथ तपसोऽपि त्रैविध्यं वक्तुं तस्य शारीरवाङ्मनोभिर्निष्पाद्यतया तत्स्वरूपभेदमा
वहाह ॥

श्री· गी· टी· सं·

गवर्जितत्वं अहिंसा अपीडनं प्राणिनां १४

रामानुजभाष्यटीका ५

+ देवेति देवद्विजगुरुप्राज्ञानां पूजनं शौचं तीर्थस्नानादिकं आर्जवं यथावाङ्मनः शरीरवृत्तं ब्रह्मचर्यं योषित्सु भोग्यताबुद्धियुक्तेक्षणादिरहितत्वं अहिंसा अप्राणिपीडा एतत् शारीरं तप उच्यते १४

अभिनवगुप्ती टी· ~~परमार्थप्रपाटीका~~ ८ आर्जवमृजुता अगोप्यविषया स्पष्टता — स्पष्टार्थं १४ ॥

86

परमार्थप्रपा टीका ७

~~एवं वाङ्मयं तप आह अनुद्वेगकरमिति परस्योद्वेगजनकं न भवति यावितथं वाक्यं सत्यं यथार्थभाषणं तदपि तु स्वयं अवसा चित्तमवतीत्याह प्रियमिति प्रियं वक्तारं हितं च परिणामे हितं च तथा च मनः संस्कृतमुत्पादयन् समयप्रियमित्युक्तं स्वाध्यायाध्ययनस्य शास्त्राभ्यासनाभ्यासः एतद्वाङ्मयं तप उच्यते~~

अथ कायवाङ्मनोविभागेन तपसस्त्रैविध्यमाह देवद्विजेति शारीरं तपः प्रतिपादनं स्पष्टार्थं १४

वनमालीटीका ८

क्रमशस्तस्य तपसः सात्त्विकादिभेदं कथयिष्यन् शारीरवाचिकमानसभेदेन तस्य त्रैविध्यमाह देवेति त्रिभिः देवा ब्रह्मविष्णुरुद्रादयः द्विजा ब्राह्मणाः गुरवः पितृमात्राचार्यादयः प्राज्ञाः पण्डिता विदितवेदतदुपकरणार्थाः तेषां पूजनं प्रणामशुश्रूषादि यथाशास्त्रं शौचं मृज्जलाभ्यां शरीरशोधनं आर्जवमकौटिल्यं भावशुद्धिः शास्त्रेण मानसेन यस्मिन्नवस्थाने शरीरं त्याजेदेव विहितप्रतिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तिशालित्वं ब्रह्मचर्यं निषिद्धमैथुननिवृत्तिः अहिंसा अशास्त्रीयप्राणिपीडाभावः चकारादस्तेयापरिग्रहावपि शारीरं प्रधानकारकत्वादिभिः साध्यं न तु केवलेन शारीरेणापि चैतेनस्य हेतवइतिहि वदति इदं शारीरं तप उच्यते १४

कृष्णभवैजयन्तीटीका ९

अथ त्रयस्य सात्त्विकादिभेदं वक्तुमादौ शारीरवाङ्मानसरूपेण
भेदेन तपसस्त्रैविध्यमाह त्रिभिः देवद्विजेति देवा दिक्पालवसुरु
द्रादयः द्विजा द्विजाग्न्याः ब्राह्मणा गुरवो देशिकाध्यापकमातृ
पित्रादयः प्राज्ञा वेदवेदाङ्गार्थविदः एतेषां पूजनं समयानुकू
लमेव नेशौ वं हि विधं तीर्थस्नानादिना वा संहरिस्मरणध्याना
दिनाभ्यंतरं आर्जवं कायवाङ्मनोवृत्तीनामेकं ब्रह्मचर्यं विहि
तभोगावरणं अहिंसा प्राणिमात्रपीडारहित्यं चशब्देन तीर्थाट
नदेवालयारामादिनिर्माणव्रतोपवासनियमप्राणायामादयो
गृह्यंते एवंविधं तपः शारीरं शरीरसंबंधि उच्यते शिष्टैः कथ्यते
१४

मधुसूदनीटीका १०

+ देवा ब्रह्मविष्णुशिवसूर्याग्निदुर्गादयः द्विजा द्विजोत्तमाः ब्राह्मणाः
गुरवः पितृमात्राचार्यादयः प्राज्ञाः पंडिता विदितवेदतदुपका
रणार्थाः तेषां पूजनं प्रणामशुश्रूषादि यथाशास्त्रं शौचं मृज्ज
लाभ्यां शरीरशोधनं आर्जवमकौटिल्यं भावशुद्धिशब्देन मानसे
तपसि वक्ष्यति शारीरत्वार्जवं विहितप्रतिषिद्धयोरेकरूपप्रवृ
त्तिनिवृत्तिशालित्वं ब्रह्मचर्यं निषिद्धमैथुनाप्रवृत्तिः अहिंसा शा
स्त्रीयप्राणिपीडनाभावः चकारादस्तेयापरिग्रहावपि शारीरं श
रीरप्रधानैः कर्त्रादिभिः साध्यं न तु केवलेन शरीरेण पंचैते तस्य
हेतव इति वक्ष्यति हि इत्थं शारीरं तप उच्यते १४

+ क्रमप्राप्तस्य तपसः सात्त्विकादिभेदं कथयितुं शारीरं वाचिकं मानसभेदेन तस्य त्रैविध्यमाह त्रिभिः ॥

सदानंदीटीका ११

क्रमप्राप्तस्य तपसस्त्रैविध्यमाह मापतिः देवा ब्रह्महरीशाद्याः द्वि
जाश्च ब्राह्मणा वराः १ आचार्यमुख्या गुरवः प्राज्ञा वेदविदो बुधाः
तेषां प्रणामशुश्रूषायागमोक्षं हि पूजनं २ शारीरशोधनं शौचं मृ
ज्जलाभ्यां तथार्जवं यथाशास्त्रप्रवृत्त्यादौ वक्रत्वाभाव उच्यते नि
षिद्धमैथुनाभावो ब्रह्मचर्यमहिंसनं प्राणिनां पीडनाभावः शारी
रं तप उच्यते ४ शरीरमुख्यैः कर्त्राद्यैः साध्यं तस्य च हेतुभिः न केव

लं शरीरेणाकृतं शारीरमुच्यते ५ यतो वदति भगवान्देवेति तत्स्पष्टं तपः १४

नीलकंठीटीका १२

श्रीं देवाः विष्णुवाद्याः द्विजा ब्राह्मणाः गुरवो मातृपित्राचार्यादयः प्राज्ञाः ब्रह्मनिष्ठाः तेषां पूजनं आर्जवमकौटिल्यं १४

आनंदीटीका १३

आर्जवमसत्यत्वं गुरुशुश्रूषाभ्युत्थानप्रणिपातादि १४ ॥

+अथ सात्विकात्वादिभेदेन तपसस्त्रैविध्यं प्रतिपाद्यमिदानीं शारीरादिभेदेन ताव तपस्त्रैविध्यमाह तत्र शारीरं तावत्॥

॥रामकंठीटीका १४

+यत्तच्छारीरं शरीरसंबंधितपउच्यते किं तद्देवादीनां पूजनं शौचं मृज्जलादिना शरीरशुद्धिः आर्जवं कायव्यापारविषयमकौटिल्यं ब्रह्मचर्यं प्रसिद्धं अहिंसा हननक्रियाभावः प्रजादीनां कायव्यापारैर्निर्वर्त्यत्वाच्छारीरमेतत्तपः [illegible] ॥ ३४

+तमसः सात्विकादिभेदान्दर्शयितुं प्रथमं तावच्छरीरादिभेदेन तपस्त्रैविध्यमाह चतुर्भिः॥

लास्किकीटीका १५

+देवाः शिवविष्णुसूर्यहेरंबदुर्गाम्यादयः द्विजा ब्राह्मणाः गुरवः पितृमात्राचार्यादयः प्राज्ञा गुरुव्यतिरिक्ताः अन्येपि तत्वविदस्तेषां पूजनं प्रणामयजनशुश्रूषादि शौचं मृज्जलाभ्यां आर्जवं शोभनमहार्घवस्त्रादिसत्वे भुजंगवद्दांभिकवद्वाभ्रूभंगग्रीवावक्रादिराहित्यम् ब्रह्मचर्यं निषिद्धमैथुननिवृत्तिः अहिंसा परपीडावर्जनं चकारादस्तेयापरिग्रहावपि एतच्छारीरं शरीरनिर्वर्त्यं तप उच्यते [illegible] ॥ १४ ॥

पंचोलेटीका

तपसः सात्विकादिभेदं दर्शयितुं प्रथमं शारीरादिभेदेन तपस्त्रैविध्यं शारीरं तप आह देवेति देवद्विजगुरुप्राज्ञानां पूजनं शौचं बाह्याभ्यंतरं आर्जवं ऋजुत्वं भार्यायां ऋतुगामित्वं ब्रह्मचर्यं प्राणिनामपीडनमहिंसा एतत्सर्वं देहप्रधानैरिंद्रियात्ममनोभिः साध्यं शारीरं तप उच्यते १४ ॥

रत्नावीरसमिद्धोयिनी

अथ प्रतिज्ञातं तपसहैविध्यं कथयन्नगारीनादि भेदेन तावत्त
स्यैवैविध्यमाह द्विभिः तत्र तावत्कारीरं लक्षयति देवहिजेति
देवादीनां पूजनं कार्यारंभेष्टहाभ्यगमनेकस्मातसंगमे उत्सवा
दौ वा वपर्यं विधेयं शौचं स्वजलादिनामलापनयनं शास्त्राग
मुनत्स्जाल्नत्तणेव तथा आर्जवं पारूल्यातुन्मार्गेणापतनल्क्ष
णकौटिल्यराहित्यं तथा ब्रह्मचर्यं पमिह ब्रह्मचारिव्रतं ब्रह्म
णिपत्नुवैदेवर्यमभीक्ष्णं प्रास्त्रप्रयोगपिद्याध्वंकात्वितलक्ष्यपात
नेनाभ्यासोवा यत्नवेदप्रतिपाद्येषु हादिव्यापारे तत्परत्वं वा तथा
अहिंसा विनापराधं दंडनेन प्राणोपघातो हिंसा तदुज्जनं एत
च्छारीरंकायनिर्वर्त्यंतपउच्यतेकथ्यते १४

मयुभाष्य

१४॥

भाषाअनुवादटीका

तपस्या को भी सात्विकादि भेद देखावने के मानस से प्रथम शरीरादि के भेद क्रमसे त्रिविध है सो तीन श्लोकसे कहते हैं कि प्राज्ञ कहे गुरुजन से भिन्न और और तत्वज्ञानी औ ब्राह्मण तथा गुरुजन की पूजा और शौच आदि क्रिया इन सब को शिष्ट पुरुष शरीर सम्पादित तपस्या कहते हैं १४

दोहा

देव गुरु द्विज प्राज्ञ को पूजन शौच सरलतादि ब्रह्मचर्य
औ अहिंसता शारीरक तपा गाहि १४॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५

शांकरभाष्यटीका १

पञ्चैते तस्य हेतव इति हि वक्ष्यति अनुद्वेगेति अनुद्वेगकरं प्राणि
नो अदुःखकरं वाक्यं सत्यं प्रियं हितं च यत् प्रियहिते दृष्टादृ
ष्टार्थे अनुद्वेगकरत्वादिभिर्धर्मैर्वाक्यं विशेष्यते विशेषण
धर्मसमुच्चयार्थश्च शब्दः परप्रत्ययार्थं प्रयुक्तस्य वाक्यस्य स
त्यप्रियहितानुद्वेगकरत्वादीनामन्यतमेन द्वाभ्यां त्रिभिर्वा ही
(त) नता स्यात् यदि न वाङ्मयतपस्तत्तथा सत्यवाक्यस्येतरेषामन्यत
मेन द्वाभ्यां त्रिभिर्वा हीनतायां न वाङ्मयं तपस्त्वं तथा प्रियवा
क्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्हीनस्य न वाङ्मयतप
स्त्वं तथा हि न वाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा वि
युक्तस्य न वाङ्मयतपस्त्वं किं पुनस्तत्तपो यत् सत्यं वाक्यमनुद्वे
गकरं प्रियं हितं च यत् तत् परमं तपो वाङ्मयं यथा शान्तो भव
(योगं) वत्स स्वाध्यायं चानुतिष्ठ तथा ते श्रेयो भविष्यति स्वाध्याया
भ्यसनं चैव यथाविधि वाङ्मयं तप उच्यते १५

आनन्दगिरिकृतटीका २

कथं कर्त्रादि साध्यत्वे तपसः शारीरत्वं शारीरत्वे वा कथं कर्त्रादि
साध्यत्वमित्याशङ्क्याह पञ्चेति सम्प्रति वाङ्मयं तपो व्यपदिशति
अनुद्वेगकरमिति सत्यं यथादृष्टार्थवचनं प्रियं श्रुतिसुखं हितं प
रिणामपथ्यं प्रियहितयोर्विधानत्वेन विभागमाह प्रियेति कथ
मत्र विशेषणविशेष्यत्वं तदाह अनुद्वेगेति विशेषणानां धर्माणा
मनुद्वेगकरत्वादीनां विशेषणवाक्येन समुदितानां परस्परमपि स
मुच्चयद्योती चकार इत्याह विशेषणेति किमिति वाक्यमेतैर्विशे
ष्यते किमिति वा तेषां मिथः समुच्चयस्तत्राह परेति यद्यपि वि
धायकवाक्यमात्रस्याविशेषितस्य वाङ्मयतपस्त्वानुपपत्तिस्तथा

पि सत्यवाक्यस्य वाक्यविशेषणान्तराभावेपि वाङ्मयतपस्त्वमित्या
शंक्याह तथेति तथापि प्रियवाक्यमात्रस्य तथात्वं स्यादित्याशंक्या
ह तथेति तथापि परिणामपथ्यं वाक्यमात्रं तथा भविष्यति ने
त्याह तथाहितेति कीदृक् तर्हि तयोर्वाङ्मयत्वमिति प्रश्नपूर्व
कं विशदयति किं पुनरिति विशिष्टे वाङ्मये तपसि दृष्टान्तमाह
यथेति प्रशान्तत्वं पवित्रपाणित्वमित्यादि विधानमनतिक्रम्य
स्वाध्यायस्यावर्त्तनमपि वाङ्मये तपस्यान्तर्भवतीत्याह स्वाध्यायेति
वाक्प्राचुर्येण प्रसक्तता स्मिन्निति वाङ्मयं वाक्प्रधानमित्यर्थः १५

स्वामिकृतटीका ३

वाचिकं तप आह अनुद्वेगकरमिति उद्वेगं भयं न करोतीत्यनु
द्वेगकरं वाक्यं सत्यं च श्रोतुः प्रियं च हितं च परिणामे सुखकरं
स्वाध्यायाभ्यसनं वेदाभ्यासश्च वाचा निर्वर्त्यं वाङ्मयं तपः १५

पिशाचभाष्यटीका ४

शरीरसाध्यं तपो विधीयते उद्वेगोऽङ्गः खेनोद्वेगकरं सत्यमवि
तथं प्रियं च हितं च प्रियहिते स्वाध्यायो वेदः तस्य सदा पाठः
स्वाध्यायाभ्यसनमित्येतद्वाङ्मयं वाचे निर्वर्त्यं १५ उद्

रामानुजभाष्यटीका ५

अनुद्वेगेति परेषामनुद्वेगकरं सत्यं प्रियहितं वाक्यं स्वाध्या
याभ्यसनं चेत्येतद्वाङ्मयं तपः १५

अभिनवगुप्तकृतटीका ६ सत्यमित्यस्यैव स्वरूपनि
रूपणं प्रियहितमित्यनेन क्रियते प्रियं तत्काले हितं च का
लान्तरे ईदृशं वाक्यं सत्यमित्यु
च्यते न तु यथादृष्टकथनमात्रं॥ १५ ॥

स्पष्टार्थं १५ ॥ ॥

परमार्थप्रपाटीका ७

अथ वाङ्मयं तप आह अनुद्वेगकरमिति परस्योद्वेगजनकं न
भवति तथाविधं वाक्यं सत्यं यथार्थभाषणं तदपि दुःखपर्यवसा
यि न भवतीत्याह प्रियमिति प्रियं तत्काले हितं च प्रियं तस्य आयत्यां परि
णामे हितं च तथा च मनुः सत्यं ब्रूयात् प्रियं ब्रूयात्सत्यमप्रि
यमिति स्वाध्यायाध्ययनं स्वशाखाध्ययनाभ्यासः एतद्वाङ्मयं तप

ब्रूयान्न

उच्यते १५

वनमालीटीका ८

अनुद्वेगकरं न कस्यचिदुःखकरं सत्यं प्रमाणमूलमबाधितार्थं
प्रियं श्रोतुस्तत्कालश्रुतिसुखं हितं परिणामे सुखकरं च कारो
विशेषणानां समुच्चयार्थः अनुद्वेगकरत्वादिविशेषणचतुष्ट
येन विशिष्टं न त्वेकेनापि विशेषणेन यद्वाक्यम् स्वाध्यायाभ्य
सनं वेदाद्यभ्यसनं वाङ्मयं तप उच्यते १५

ऊत्तमवैजयन्तीटीका ९

वाचस्तप आह अनुद्वेगकरमिति उद्वेगं स्वपुत्रकलत्रधनादि
नाशजन्यं संत्रासं व्याघ्रपिशाचादिदर्शनजन्यं वा भयं तन्न करो
तीत्यनुद्वेगकरं सत्यं स्वपरधर्मार्थाविनाशपूर्वककथार्थं
तत्रापि प्रियं हे देवदत्त तव पुत्रो जात इति वत्प्रीतिकरं न तु त्वत्पुत्रो
रण्ये व्याघ्रेण हत इतिवदप्रियं तत्रापि हितं अन्यथा परोद्वेगकरं दे
हिजीवनार्थं सर्पदष्टपुत्राङ्गुष्ठच्छिद्रधीमादिवत्स्वस्य परेषां च प
रिणामे सुखकरं एतद्विशेषणचतुष्टयं च पुनः स्वाध्यायाभ्यस
म नं स्वाध्यायः शास्त्राभ्यसनं शब्दानामर्थानां चाविरतचिन्तनं
[illegible] तच्छास्त्रं यं वा वाचानिवर्त्तनं तप उच्यते च शब्दान्नाममन्त्राद्यभ्या
स एवकारेण सप्तस्वरग्रामत्रयान्वितस्य गीतस्य वाद्यस्य वाभ्या
सवाकमुच्यत इति ध्वनितम् १५

मधुसूदनीटीका ९

अनुद्वेगकरं न कस्यचि दुःखकरं सत्यं प्रमाणमूलमबाधितार्थं
प्रियं श्रोतुस्तत्कालश्रुतिसुखं हितं परिणामे सुखकरं चका
रो विशेषणानां समुच्चयार्थः अनुद्वेगकरत्वादिविशेषणच
तुष्टयेन विशिष्टं न त्वेकेनापि विशेषणेन न्यूनं यद्वाक्यं यथा
शान्तो भव वत्स स्वाध्यायं योगं चानुतिष्ठ तथा ते श्रेयो भविष्यती
त्यादि तद्वाङ्मयं वाचिकं तपः शारीरवत् स्वाध्यायाभ्यसनं च य
थाविधि वेदाभ्यासश्च वाङ्मयं तप उच्यते एवकारः प्राग्विशे

श्री·
गी·टी·
सं·

61

षणांतमन्वयावधारणेव्याख्यातः १५

सदानंदीटीका ११

नकस्यचिदुःखकरंमानमूलमबाधितं श्रोतृस्तत्कालसुख
दंपरिणामेसुखावहं अनुद्वेगकरत्वादिविशेषणचतुष्टयं
समुच्चितंसैववाङ्मयतपः केनापिविवर्जितं २ यथाभोक्तृमशा
तंलंभवस्वाध्यायमावर योगंतथानुतिष्ठत्वेनिःश्रेयसंलभ
विष्यति ३ यथाविध्यागमाभ्यासोवाङ्मयंतपउच्यते १५

नीलकंठीटीका १२

प्रियंवचनंनहितंवप्रियहितं श्रवणकालेपरिणामेचसुखदमि
त्यर्थः १५

आनंदीटीका १३

स्पष्टार्थं १५ ॥

+अथवाचिकं॥

रामकंठीटीका १४

+वानिर्वर्त्यत्वाद्वाङ्मयंतिकर्मतत्तपउच्यते किंतत्त्वभावतएवमा
धुर्यादनुद्वेगकरंपरस्याखेदावहं तथासत्यमवितथंयत्प्रि
यंमनोज्ञंहितंचकल्याणपर्यवसायिवचनं तथास्वाध्याय
स्यस्वशास्त्रपाठस्याभीक्ष्णमावर्तनम् [illegible] १५ ॥

लासिकी[illegible]टीका १५ ॥

वाचिकंतपआह अनुद्वेगकरंपरस्याखेदावहं सत्यंप्रमाणेनाबाधितार्थं सत्यमि
त्यस्यस्वरूपनिरूपणम् प्रियहितमित्यनेनक्रियते प्रियंतत्का
लेमनोज्ञंचहितंकालांतरेकल्याणपर्यवसायिच ईदृशंयद्वा
क्यंतत्सत्यमित्युच्यते नतुयथादृष्टकथनमात्रम् स्वाध्याय
स्यस्वशास्त्रपाठस्याभ्यासनमावर्तनम् एवंविधविशेषणवि
शिष्टवाक्योच्चारणंवाचनिकंतपउच्यते [illegible]
[illegible] १५ ॥ ला

पंचोले टीका

वाचकंतपआह अनुद्वेगेति चतुर्भिः यत् अनुद्वेगकरं सत्यं यथार्थ भूतं प्रियं श्रोतुः सुखकरं हितं उपकारि दृष्टार्थे अदृष्टार्थे वा उप कारि एवंविधं अनुद्वेगकरत्वादिचतुष्टयमिलितं वाक्यं वाङ्मयं तप उच्यते नैकैकशः स्वाध्यायाभ्यसनं वेदाध्ययनम् अध्यापनं वा वि द्यानां वाङ्मयं तप उच्यते १५

रत्नवीरसमिद्धोधिनी॥

अथवा विकल्पयति अनुद्वेगेति अनुद्वेगकरं श्रुतितोऽर्थतश्च यत्पर स्य यत्वा क्रोधात्मकां वेदनां नावहति तथा सत्यम् अव्यभिचारिफलं प्रि यं विना वचनं हितं कल्याणपरिणामं च यत् स्यात् तन्नाहृष्यं वाक्यं तथा स्वाध्यायाभ्यसनं अधीयंते पुनर्हि नाऽध्यायो वेदः स्वस्ववर्णोचित स्वाध्यायाभ्यसनं स्वाध्यायस्तस्याभ्यसनम् अभीक्ष्णपाठेनावर्तनं तच्च वाङ्मयं वाङ्निर्वर्त्यत्वात् आकारकृतिकं तप उच्यते १५॥

मधुभाष्य

१५॥

62

भाषाअनुवादटीका

और वचन सम्बन्धी तपस्या कहते हैं कि कोई मनुष्य जिनसे भ
य न होय ऐसे अनुद्वेग कर वचन और सत्य तथा श्रोता को
प्रिय लगें और परिणाम कहे अन्त को हितदाई और वेद अ
भ्यास करनेवाले वचनो को भी वाका तपस्या कहते हैं १५

दोहा

अनउद्वेग कर वाक्य जो सत्य प्रियहित जोय स्वाध्याय अ
भ्यसन यह वाचक तपकहा सोय १५॥

मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते १६

शांकरभाष्यटीका १

मनइति मनःप्रसादोमनसः प्रशान्तिः स्वच्छतापादनं मनसः प्र
सादः सौम्यत्वं यत्सौमनस्यमाहुर्मुखादिप्रसादकार्योन्तःक
रणस्य वृत्तिः मौनं वाक्संयमः हेतुकोभवति इतिकार्येण कार
णमुच्यते मनःसंयमोमौनमिति आत्मविनिग्रहोमनोनिरोधः
सर्वतः सामान्यरूप आत्मविनिग्रहोवाग्विषयस्यैव मनसः संय
मोमौनमिति विशेषः भावसंशुद्धिः परैर्व्यवहारकालेऽमायावि
त्वं भावसंशुद्धिरित्येतत्तपोमानसमुच्यते १६

१ संयमोपि मनः

आनंदगिरिकृतटीका २

मानसंतपः संक्षिपति मनइति प्रशान्तिफलमेव व्यनक्ति स्वच्छ
तेति मनसः स्वाच्छ्यमनाकुलता नैर्मल्यमित्यर्थः सौमनस्यं सर्वे
भ्योहितैषित्वमहितावितननञ्च तत्कथं गम्यते तत्राह मुखादीति
तस्यस्वरूपमाह अन्तःकरणस्येति ननुमौनं वाङ्नियमनं वाक्त्रये
तपस्यन्तर्भवति तत्कथं मानसे तपसि व्यपदिश्यते तत्रवाचः सं
यमस्य कार्यत्वान्मनःसंयमस्य कारणत्वात्कार्येण कारणग्रह
णात् मानसेतपसि मौनमुक्तमित्याह वागिति यद्वा मौनंमुनि
भावोमननं आत्मनोमनसोविनिग्रहोनिरोधः नन्वेवं मौनस्य
मनोनिग्रहस्य च मनःसंयमत्वैकत्वात्पौनरुक्त्यं नेत्याह स
र्वतइति भावस्य हृदयस्य संशुद्धीरागादिमलविकलतेति व्याच
ष्टे परैरिति मानसं मनसाप्रधानेन निर्वर्त्यमित्यर्थः १६

स्वामिकृतटीका ३

मानसंतपआह मनप्रसादइति मनसः प्रसादः [illegible] स्वच्छतासौ
म्यत्वमक्रूरतामौनंमुनेर्भावः मननमित्यर्थः आत्मनोविनिग्रहोवि
षयेभ्यः प्रत्याहारः भावसंशुद्धिर्व्यवहारेमायाराहित्यमित्येतन्मान

१ मनसो

संतपउच्यते १९

पिशाचभाष्यटीका ६

मनःप्रसादः मनःस्वच्छता सौम्यत्वं सौमनस्यता दुःखादिप्रसादकारीअंतःकरणप्रवृत्तिः मौनं वाक्संयमः आत्मविनिग्रहः मनसो निरोधः भावसंशुद्धिरवंचनमिति एतन्मानसं तप उच्यते १९

रामानुजभाष्यटीका ५

मनइति मनःप्रसादः मनसः क्रोधादिरहितत्वं सौम्यत्वं मनसः परेषामभ्युदयप्रावण्यं मौनं मनसो वाक्प्रवृत्तिनियमनं आत्मविनिग्रहः मनोवृत्तेर्ध्येयविषयेऽवस्थापनं भावसंशुद्धिरात्मव्यतिरिक्तविषयचिंतारहितत्वमेतन्मानसं तपः १९

अभिनवगुप्तकृतटीका ९

[illegible] भावश्राशयस्तस्य सम्यक्शुद्धिः १९

परमार्थप्रपाटीका १

अथ मानसं तप आह मनइति मनःप्रसादः स्वच्छता सौम्यत्वमक्रूरता मौनं मुनेर्भावः मननमित्यर्थः आत्मविनिग्रहः विषयेभ्यः प्रत्याहारः भावसंशुद्धिर्व्यवहारे मायाराहित्यं एतन्मानसं तपः श्रुतिरपि नेममेव शानवचनेनविविदिषंति ब्राह्मणा यज्ञेन दानेन तपसा अशुद्धायस्तेनानाशकेनेति भाष्यं तमेतमात्मानं वेदानुवचनेनोपनिषद्विभागेन विविदिषंति विविदिषंति ज्ञातुमिच्छंति तेन यथावल्लब्धवेण शारीरेण तपसा श्रद्धया आस्तिकबुद्ध्या यत्तेन सात्त्विकेन अतएव अनाशकेन नश्वरफलाभिसंधिरहितेन १९

वनमालीटीका ८

मनसः प्रसादः स्वच्छता विषयचिंताव्याकुलत्वराहित्यं सौम्यत्वं सौमनस्यं सर्वलोकहितैषित्वं प्रतिषिद्धाचिंतनं च मौनं मुनि

भावपकाग्रतयात्मचिंतनं निदिध्यासनाख्यंआत्मविनिग्रहः
आत्मनोमनसोविशेषेणनिग्रहः भावस्यहृदयस्यशुद्धिः
कामक्रोधलोभादिमलनिवृत्तिः इत्येतत्तपोमानसमुच्य
ते १६

रामकंठजयंतीटीका ९

मानसंतपआहमनइतिमनः प्रसादोमनसःकामादिष
ड्वर्गमलराहित्यंशब्दादिविषयस्फूर्तिराहित्यंवासौम्यत्वंम
नसः कौर्यंपरेषामभ्युदयश्रवणेवामौनंमनसःस्वपरस्व
परस्वरूपाभिमननपूर्वकवाक्प्रवृत्तिनियमनं आत्मविनि
ग्रहः आत्मनोमनसोविनिग्रहः प्राकृतविषयेभ्यः प्रत्याहृ
त्याकृतविषयेध्येयस्वरूपेऽवस्थानंभावसंशुद्धिः मनोभा
वस्यदंभकपटादेःसंशुद्धिःशून्यताप्रकृतिविशुद्धात्मचिंतने
नविषयलोभराहित्यमित्यर्थः इत्येवंविधंतपोमानसंमनस
त्वविधिमनसानिर्हर्त्यंचोच्यते १६

मधुसूदनीटीका १०

मनसःप्रसादःस्वच्छताविषयचिंताव्याकुलत्वराहित्यंसौम्य
त्वंसौमनस्यंसर्वलोकहितैषित्वंप्रतिषिद्धाचिंतनंच मौनं
मुनिभावएकाग्रतयात्मचिंतनंनिदिध्यासनाख्यंवाक्संयम
हेतुर्मनःसंयमोमौनमितिभाष्यं आत्मविनिग्रहः आत्मनो
मनसोविशेषेणसर्ववृत्तिनिग्रहोनिरोधसमाधिरसंप्रज्ञातः
भावसंशुद्धिःहृदयस्यशुद्धिःकामक्रोधलोभादिमलनिवृत्तिःपुनर
नुत्पादराहित्येनसम्यक्त्वेनविशिष्टाभावशुद्धिःपरैःस
हव्यवहारकालेमायाराहित्यमितिभाष्यमित्येतत् एवंप्रका
रंतपोमानसमुच्यते

महानंदीटीका ११

मनःस्वच्छत्वमदोम्यंसर्वलोकहितैषिता निदिध्यासनमैग्र्य कु

श्री·
गी· टी·
सं·
65

समाधौचित्तनिग्रहः १ कामादिमलसंश्लेषाभावोमायाराहित्य
माशिशेषः भावसंशुद्धिरित्येतत्तपोमानसमुच्यते १६

नीलकंठीटीका १२

मनःप्रसादः रागद्वेषादिराहित्यं सौम्यत्वं परहितैषित्वं
मौनं वाक्संयमः आत्मविनिग्रहो मनोनिरोधः भावशु
द्धिः परैर्व्यवहारकाले मायाराहित्यं इति एवं प्रकारं स्पृ
हयादिकं एतन्मानसं तप उच्यते १६

आनंदीटीका १३

आत्मनो मनसो विनिग्रहो विषयेभ्यो निवर्तनम् ॥ १६ ॥

रामकंठीटीका १४

अथ मानसम् — एतत्तपो मनो निर्वर्त्यत्वान्मानसमुच्यते किं तत् मनसः
प्रसादः स्वभावत एव रागद्वेषादिदोषरहितत्वादकलुष
चित्तत्वं सौम्यत्वं प्रशान्तता मौनं यद्यपि मुनिभावो मुख्य
३· या वृत्त्या तथापि वाग्नियमे रूढं तस्य संकल्पशुद्धिहेतुत्वा
न्मानसं तपः तथात्मविनिग्रहः आत्मनोन्तःकरणस्य
निषिद्धविषयेभ्यो विनिग्रहो नियमनं तथा भावस्याशय
स्य संशुद्धिरनार्जवादिकलंकाभावो नैर्मल्यं [illegible]
[illegible]
तावत् [illegible] ॥

लासिकी[illegible]टीका १५

मानसंतपआह — मनसः प्रसादो रागद्वेषराहित्येनाकालुष्यम् सौम्यत्वमक्रू
रता प्रशान्ततेति यावत् मौनं मुनेर्भाव आत्ममननमित्य
र्थः आत्मनश्चित्तस्य विशेषेण सर्ववृत्तिभ्यो निग्रहो
निरोधः समाधिदशायाम् भावसंशुद्धिर्व्यवहारे मायान्तरा
दिराहित्यम् एतत्मनो निर्वर्त्यत्वान्मानसं तप उच्यते [illegible]
[illegible] ॥ [illegible] ॥

पंचोले टीका

मानसं तप आह मनःप्रसाद इति मनःप्रसादः स्वस्थतया नैर्मल्यं सौम्यत्वं सौम्य
नस्कता मौनं वाक्संयमः सत्यभाषणमित्यर्थः मनःसंयमपूर्वकं
सर्वतो मनोनिरोधः आत्मविनिग्रहः वाग्विषयस्य मनोनिग्रहो मौ
नमन्यत्र सर्वतो सामान्यरूपः संकल्पविकल्पात्मकमनोनिग्रहः
आत्मविनिग्रहः इति भेदः अन्यैः सह व्यवहारे क्रियमाणे अमायित्वं भा य
वसंशुद्धिः एतत्सर्वं त्रिविधं तपो मानसमुच्यते १६

रणवीरसमिद्धोधिनी॥

अधुना मानसमाह मनःप्रसाद इति मनसः प्रसादः स्वार्थप्रतिपा
दनलक्षणरागद्वेषादिकालुष्यराहित्यं सौम्यत्वं दैन्यत्यागेन संप्र
योच्छेदनेवरूपत्वं तथा मौनं व्यर्थबहुजल्पानादरः तथा आत्मवि
निग्रहः निषिद्धात्परवर्गोविताद्यावाराभ्यादिविषयास्वांतःकरण
स्यप्रवृत्त्यावर्तनं तथा भावसंशुद्धिः भावस्याशयस्य कपटव्यवहारत्या
गेन कलंकाभावान्नैर्मल्यं इत्येतत्सर्वं मानसं मनोनिर्वर्त्यं तप उच्य
ते १६॥

मधुभाष्य

66

भाषाअनुवादटीका

अब मानसिक तपस्या कहते हैं कि मन की निर्मलता और सौम्य
त्व कहे अक्रूरता और मौन कहे मुनिधर्म जो मनन करना आत्म
विनिग्रह कहे विषयों से इन्द्रियों का निग्रह जो रोकना और भाव
संशुद्धि कहे व्यवहार मे निष्कपट रहना ये सब मानसिक तप
स्या स्वरूप कहे जाते हैं ९

दोहा

मन प्रसन्न अरु सौम्यता मौन हि मन को बोध भाव शुद्धि यह
मानस तप को कीनो बोध १९॥

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः अफ
लाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते १७

शांकरभाष्यटीका १

यथोक्तं कायिकं वाचिकं मानसञ्च तपस्तप्तं नरैः सत्वादिभेदेन क
थं त्रिविधम्भवतीत्युच्यते श्रद्धयास्तिक्यबुद्ध्या परया प्रकृष्टया
तप्तमनुष्ठितं तपस्तत्प्रकृतं त्रिविधं त्रिःप्रकारं अधिष्ठानं नरै
रनुष्ठातृभिरफलाकांक्षिभिः फलाकांक्षारहितैर्युक्तैः समाहि
तैर्यदीदृशन्तपस्तत् सात्विकं सत्वनिर्वृत्तं परिचक्षते कथय
न्ति शिष्टाः १७

आनंदगिरिकृतटीका २

त्रिविधस्य तपसो यथासम्भवं सात्विकादिभावेन त्रैविध्यमा
कांक्षाहारा निर्दिशति यथोक्तमिति तत्रैव अधिष्ठाने देहवाङ्म
नोनिर्वर्त्यमित्यर्थः समाहितैः सिद्ध्यसिद्ध्योर्निर्विकारैरिति यावत्
१७

स्वामिकृतटीका ३

तदेवं शरीरवाङ्मनोभिर्निर्वर्त्यं त्रिविधं तपो दर्शितं तस्य त्रिविध
स्यापि तपसः सात्विकादिभेदेन त्रैविध्यमाह श्रद्धयेति त्रिभिः
[illegible]न त्रिविधमपि तपः श्रेष्ठया श्रद्धया फलाकांक्षाशून्यैर्यु
क्तैरेकाग्रचित्तैर्नरैस्तप्तं तत्सात्विकं १७ कथयन्ति

पिशाचभाष्यटीका ४

श्रद्धया आस्तिक्यबुद्ध्या परया प्रकृष्टया तप्तं समार्जितं त्रिविधं तपः
कायादि नरैः पुरुषैः फलेनिरपेक्षैर्युक्तैः सात्विकमित्यभिधी
यते १७

रामानुजभाष्यटीका ५

श्रद्धयेति अफलाकांक्षिभिः फलाकांक्षारहितैः युक्तैः परमपुरु
षाराधनरूपमिदमिति चिन्तायुक्तैर्नरैः श्रद्धया परया यत्त्रिविधं
तपः कायवाङ्मनोभिस्तप्तं तत्सात्विकं परिचक्षते १७

अभिनवगुप्तकृतटी ६

68

परमार्थप्रपाटीका ७

अथसात्विकादिभेदेनपुनः त्रैविध्यमाह श्रद्धयेति तत्रिविधंशारी
रवाङ्मनोविभागेनकथितंतपः अफलाकांक्षिभिस्तथाउक्ते
रेकाग्रांतःकरणैर्नरैस्तप्तमनुष्ठितंतत्सात्विकंपरिचक्षते १७ २९

वनमालीटीका ८

शारीरादिभेदेनत्रिविधस्यतपसः सात्विकादिभेदेनत्रैविध्य
माह श्रद्धयेतित्रिभिः तत्पूर्वोक्तं शारीरादिकं श्रद्धयास्तिका
बुद्ध्यापरयोत्कृष्टयाअप्रामाण्यशंकाकलंकशून्यया फला
भिसंधिशून्यैर्युक्तैः समाहितैः सिद्ध्यसिद्ध्योर्निर्विकारैर्नरैर
धिकारिभिस्तप्तमनुष्ठितंसात्विकंपरिचक्षतेशिष्टाः १७

उत्सवमैजयन्तीटीका ९

उक्तस्यतपसः शारीरादिभेदेनत्रैविध्यमुक्तेदानींसात्विकादि
गुणभेदेनत्रिविधत्वमाह त्रिभिः श्रद्धयेति यत्नयोः फलाकांक्षि
भिः फलेच्छारहितैर्युक्तैर्विषयाव्याकुलमनस्कैर्नरैः शास्त्र
नीतियुक्तैर्मनुष्यैस्त्रिविधंशारीरवाङ्मनोभिर्निर्वर्त्यंपरयोत्कृ
ष्टयाश्रद्धयातप्तमनुष्ठितंततपः सात्विकंपरिचक्षते १७

मधुसूदनीटी १०

+शारीरवाचिकमानसभेदेनत्रिविधस्योक्तस्यतपसः
सात्विकादिभेदेनत्रैविध्यमिदा
नींदर्शयतित्रिभिः॥ +तत्पूर्वोक्तंत्रिविधंशारीरंवाचिकंमानसंचतपः श्रद्धयास्तिक
बुद्ध्यापरयाप्रकृष्टयाअप्रमाण्यशंकाकलंकशून्ययाफला
भिसंधिशून्यैर्युक्तैः समाहितैः सिद्ध्यसिद्ध्योर्निर्विकारैरधिका
रिभिस्तप्तमनुष्ठितंसात्विकंपरिचक्षतेशिष्टाः १७

सदानंदीटीका

शारीरादिकभेदेनप्रोक्तस्यत्रिविधस्यच तपसः प्रोच्यतेभूय
स्त्रैविध्यंसात्विकादिना १ सात्विकेप्रकृष्टत्रेधापूर्वोक्तंतपउ
च्यते राजसेतामसेयस्मात्त्रैविध्यंतत्संभवेत् अतः सात्वि

कथं पुनस्तत्तपस्त्रिविधं वचः राजसतामसे प्रोक्तं तत्र हितस्तद्दय दापतः ॥ तत्सर्वोक्तं तपः सम्यक् श्रद्धया आस्तिक्यरूपया बुद्ध्या प्रकृष्टया शंकाशून्यया शास्त्रगोचरं फलाभिसंधिरहितैः शुद्धचित्तैः समाहितैः अनुष्ठितं मुनिश्रेष्ठाः सात्त्विकं कथयंति

नीलकंठीटीका ११

तत् १७

त्रिविधं कायिकवाचिकमानसभेदेन युक्तैः अवहितैः १७

आनंदीटीका १२

अस्य सात्त्विकादिभेदेन त्रैविध्यमाह युक्तैः समाहितचित्तैः १७

+अथ त्रिविधमप्येतत्सात्त्विकादिभेदात्पुनस्त्रिविधमाह तत्र सात्त्विकं तावत्॥

रामकंठीटीका १४

+ शारीरादिभेदेन त्रिविधमप्येतत्तप एवंविधं सत्सात्त्विकं भवति कीदृशं श्रद्धयोक्तलक्षणया फलसंभवनया परया सात्त्विक्या पेतं युक्तमनस एव फलाकांक्षारहितैर्युक्तैः समाहितैराचरितं १७

१७ ॥

लासिकी टीका १५ +अथ त्रिविधमप्येतत्सात्त्विकादिभेदात्पुनस्त्रिविधमाह॥

+ तत्सर्वोक्तं शारीरादिभेदेन त्रिविधं उत्कृष्टया श्रद्धया फलाकांक्षा रहितैर्नरैर्युक्तैरात्मनि समाहितैस्तप्तमनुष्ठितं सात्त्विकमिति परिचक्षते १७ ॥

पंचोली टीका

तस्य शारीरादिभेदेन त्रिविधस्यापि तपसः सात्त्विकादिभेदेन त्रैविध्यं सात्त्विकं तप आह श्रद्धेति तपः यथोक्तं कायकं वाचकं मानसं च त्रिविधं तप अफलाकांक्षिभिः फलाकांक्षारहितैः युक्तैः मनःसमाधानयुक्तैः नरैः नरोत्तमैः परया उत्कृष्टया आस्तिक्यबुद्ध्या तप्तमनुष्ठितं सात्त्विकं सत्त्वगुणनिष्पन्नं परिचक्षते कथयंति १७

69

अथैतस्यत्रिविधस्यतपसःसात्विकादिभेदेनगुणत्रैविध्यं दर्शयतित्रिभिः तत्रतावत्सात्विकंदर्शयति श्रद्धयेति त देतच्छारीरादिभेदेनत्रिप्रकारंतपः परयासर्वोत्कृष्टयाश्र द्धयोक्तलक्षणयाफलसंभावनयादृढभूतया अफलाकां क्षिभिःफलमनभिसंधायैवप्रवर्तमानैर्युक्तैःसावधानचि त्तैर्नरैःसमाचरितंसत् सात्विकंपरिचक्षतेकथयंतिप्रामाणि काःइतिशेषः १७॥

मधुभाष्य

१७॥

भाषा अनुवादटीका

शरीर वचन मन के द्वारा तीन प्रकार तपस्या देखाया सोई तीन प्रकार तप जो सात्विकादि गुण भेद से भी तीन प्रकार है सो तीन श्लोक से कहते हैं कि जो उत्कृष्ट श्रद्धा से फल की कामनारहित औ एकाग्रचित होय मनुष्य लोग त्रिविध प्रकार करते तिन को पण्डित लोग सात्विक कहते हैं १७

दोहा

परमश्रद्धा सें तप कियो तपे त्रिविध नरजोय फलकांक्षा
सें रहित जो सात्विक तप कहा सोय १७॥

सत्कारमानपूजार्थं तपोदंभेन चैव यत् क्रि
यते तदिह प्रोक्तं राजसं चलमध्रुवं १८

शांकरभाष्यटीका १

सत्कारेति सत्कारः साधुकारः साधुरयं तपस्वी ब्राह्मण इत्येवमर्थं
मानो माननं प्रत्युत्थानाभिवादनादिस्तदर्थं पूजा पादप्रक्षालना
र्चनाशयितृत्वादि तदर्थं च तपः सत्कारमानपूजार्थं दंभेनैव
च क्रियते तपस्तदिह प्रोक्तं कथितं राजसं चलं कादाचित्कफ
लत्वेनाध्रुवं १८

आनंदगिरिकृतटीका २

राजसं तपो निर्दिशति सत्कारेति साधुकारमेव स्फोरयति सा
धुरिति दंभेन चैव नास्तिक्येन केवलधर्मध्वजित्वेनेत्यर्थः त
दिह प्रोक्तमस्मिन्नेव लोके फलप्रदमित्यर्थः कादाचित्कफलत्वं
क्षणिकफलत्वमध्रुवमनियतमनैकान्तिकफलमिति यावत् १८

स्वामिकृतटीका ३

राजसं तप आह सत्कारेति सत्कारः साधुरयमिति
तापस इत्यादिवाक्पूजा मानः प्रत्युत्थानाभिवादनादिर्दैहिकी पूजा
पूजार्थलाभादिः एतदर्थं दंभेन च यत्तपः क्रियते तदेव चलम
नियतं अध्रुवं क्षणिकं यदेवंभूतं तपस्तदिह राजसं प्रोक्तं १८

पिशाचभाष्यटीका ४

सत्कारस्य मानस्य पूजा च सत्कारमानपूजाः सत्कारः साधुरयं तप
स्वीति प्रत्ययः मानः प्रत्युत्थानाभिवादनादि पूजा १८

रामानुजभाष्यटीका ५

सत्कारेति मनसादरः सत्कारः वाचा प्रशंसा मानः शारीरो नमस्का
रो देहपूजा फलाभिसंधिपूर्वकं सत्काराद्यर्थं च दंभेन हेतुना य
त्तपः क्रियते तदिह राजसं प्रोक्तं स्वर्गादिफलत्वेनास्थिरत्वाच्चल
मध्रुवं चंचलत्वं पातभेदेन चलनहेतुत्वात् अध्रुवं तायित्वा १८

श्री·
गी·टी·
सं·

71

स्पष्टार्थं १८ ॥ ॥

परमार्थप्रपाटीका ७

सत्कार इति सत्कारः साधुरयं तापस इति मानः प्रत्युत्थाना
भिवंदनादिस्तदर्थं दंभेन प्रसिद्धेन यत्कृतं चलमनित्यफलं अध्रु
वं क्षणिकं तद्राजसं तपः १८

वनमालीटीका ८

सत्कारः साधुरयं तपस्वीत्येवमविवेकिभिः क्रियमाणा स्तुतिः
मानः प्रत्युत्थानाभिवादनादिः पूजा पादप्रक्षालनार्चनधनदा
नादिः तदर्थं दंभेनैव च केवलधर्मध्वजित्वेनैव च नास्तिक्यबु
द्ध्या यत्तपः क्रियते तद्राजसं प्रोक्तं इहास्मिन्नेव लोके फलदं न
पारलौकिकं चलमल्पकालस्थायिफलं अध्रुवं फलजनक
तानियमशून्यं १८

ऊसमवैजयन्तीटीका ९

राजसं तपश्चाह सत्कारेति सत्कारोऽयं कुलीनः साधुस्तपस्वी वि
द्वानिति मनसा स्तुतिप्रशंसादिः सत्कारः श्रेष्ठं ज्ञात्वा मनसादरः
मानोऽयं कुलीनः साधुस्तपस्वी विद्वानिति वचसा स्तुतिप्रशंसा
द्यादरः पूजा प्रत्युत्थानपादप्रक्षालननमस्कारासनगंधमाल्या
म्बरालङ्कारनैवेद्यस्वर्णरजतादीनां शरीरेणार्पणं तेषामर्थः
प्रयोजनार्थं च शब्दादैहिकनारीपुत्रपशुकलत्रादिकामार्थं एव
कारादामुष्मिकदेवेंद्रत्वाद्यनपानार्थं दंभेन दर्पेणाहेतुना
यत्तपः इहास्मिंल्लोके क्रियते रजोगुणोपेतैर्जनैस्तपस्तेन तत्त
पो राजसं रजोगुणोपेतं चलं किंचित्कालावस्थितत्वेनास्थि
रं अध्रुवं नियतसत्कारादिफलरहितत्वेन तद्यरूपं प्रोक्तं शा
स्त्रज्ञैरिति शेषः १८

मधुसूदनीटीका ९

सत्कारः साधुरयं तपस्वी ब्राह्मण इत्येवमविवेकिभिः क्रियमा
णा स्तुतिः मानः प्रत्युत्थानाभिवादनादिः पूजा पादप्रक्षालना

चेन धनदानादिस्तदर्थं दंभेनैव केवलधर्मध्वजित्वेनैव च न
त्वास्तिकबुद्ध्या यत्तपः क्रियते तद्राजसं प्रोक्तं शिष्टैः इहास्मि
न्नेव लोके फलदं न पारलौकिकं चलमत्यल्पकालस्थायि
फलं अध्रुवं फलजनकतानियमशून्यं १८

सदानंदीटीका ११

तपस्वी ब्राह्मणः साधुरयमित्यविवेकिभिः क्रियमाणा स्तुतिः
प्रोक्तः सः सत्कारस्तदामये १ प्रत्युत्थानप्रणामादिर्मानः
पूजार्चनादिकं तदर्थं धार्मिकत्वादिख्यापनेनैव यत्तपः २
क्रियते राजसं प्रोक्तं तदत्रैव फलप्रदं अत्यल्पकालस्थायि
त्वाच्चलं तद्ध्यभिचारि च १८

नीलकंठीटीका १२

सत्कारः लोके साधुरयमिति वाक्पूजा मानः अभ्युत्थानाभि
वादनादिका यिकी पूजा पूजा लाभादि एतदर्थं दंभेन च य
त्तपः क्रियते तद्राजसं चलं विनाशि अध्रुवं अनिश्चितफलं
१८

आनंदीटीका १३ ॥

सत्कारः साधुरयं तपस्वीति साधुवादः मानो माननमात्मापा
लनम् ॥ १८ ॥

रामकंठीटीका १४

अथ राजसं — तदिह तपो राजसं प्रोक्तं किं तद्यत्सत्काराद्यर्थं क्रियते तत्सत्का
रादीनां त्रयाणां मनोवाक्कायभेदाद्यथाक्रमं त्रित्वमवसेयं
तेन परतः प्रसन्नचित्तात्सत्कारो वक्ष्यमानो मे स्यात् तथा स्तुत्या
दिना वाग्व्यापारेण मानं तथा कायव्यापारेण पूजनं ममा
स्त्वेवमर्थं दंभेनोक्तलक्षणेन यत्क्रियते तदेवमुक्तं च
लमध्रुवमिति व्याख्यानम् १८ ॥

लासिकीटीका १५

राजसमाह सत्कारः साधुकारः साधुरयं तापस इत्यादि वाक् पूजा मानः प्रत्यु
त्थानाभिवादनादिर्दैहिकादरः पूजा यो लाभादिः एतदर्थं दंभेनैव यत्तपः क्रियते
तदिह मोक्षापर्यवसायित्वात् राजसं प्रोक्तं कीदृशं तत् चलं कदाचित् भावनुष्ठा
नादिजनेन चाननुष्ठानात् अनियतं अर्थलाभादिफलव्यभिचारात् लोकदृष्ट्यावपत्यध्रु
वमनावयूपकम् ।१८ ॥ ॥

72

पंचोले टीका

राजसं तप आह सत्कारेति यत्तपः सत्कारः साधुवादः
मानो मानने प्रत्युत्थानाभिवादादिस्तदर्थं पूजापत्र
द्रव्यार्थं च पुनः दंभेन धर्मध्वजितया क्रियते तत् इह लोके रा
जसं चलं विनाशिक फलमध्रुवं क्षणिक फलं तपः प्रोक्तम्

रगावीरसमिद्धाथिनी

राजसमाह सत्कारेति सत्कारः प्रसन्नचेतोभिः परैः क्रिय
माणः साधुरयमित्येवं रूप आदरः मानः प्रशंसा लक्षणेन
वाग्व्यापारेण कृत तत्त्वापसोयमित्येवं लक्षण आदरः पूजा
प्रत्युत्थानाभिवादनादि लक्षणेन कायव्यापारेण कृतः सं
मानः एतेत्रयोपि ममसंतिति प्रयोजनाय दंभेनोक्तलक्ष
णेन कपटेन हेतुनायत्तपः क्रियते यद्यदंभोऽपधामेन
भानत्वेभमानेन वस्तु हृत्वा कृपाधेन बहिर्वेषम् पधामं
गतेनैव कपट व्यवहारेण क्रियते तत्तपः इह
स्याकर्मभूमौ राजसं प्रोक्तं तत्र चलं निश्चयाभावादव्यव
स्थितं फलव्यभिचाराद्वा अध्रुवमनावश्यकं १८॥

मधुभाष्य

१८॥

भाषाअनुवादटीका

राजस कहते हैं कि जो सत्कार अर्थात यह पुरुष साधु औ यह तपस्वी ऐसे प्रतिष्ठावचनो से जो पूजा औ मान कहे उनको देख उठ खडे होना औ प्रणाम करना आदि जो है हिक पूजा चौर पूजा कहे अर्थ लाभादि इन सब के निमित औ अपने महत्व के प्रकाश के अर्थ की जाय जो अनित्य और क्षणिक रूप तपस्या उसी को इस लोक मे शिष्ट लोग राजस कहते हैं १८

दोहा

आदर मान पूजा लिये तपदि दंभसें जोय करि यतजोर
कदलदे राजसचल अध्रुवसोय १८

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः
परस्योत्सादनार्थं वा तत्तामसमुदाहृतं १९

शांकरभाष्यटीका १

मूढेति मूढग्राहेण विवेकनिश्चयेनात्मनः पीडया क्रियते
तत्तपः परस्य उत्सादनार्थं विनाशार्थं वा तत्तामसमुपउदाहृ
तं १९

आनंदगिरिकृतटीका २

तामसं तपः संगृह्णाति मूढेति मूढो मन्नविवेकी तस्य ग्राहो
नामाग्रहाभिनिवेशस्तेनेत्याह अविवेकेति आत्मनः स्वस्य दे
हादेरित्यर्थः १९

स्वामिकृतटीका ३

तामसं तप आह मूढग्राहेणेति मूढग्राहेणाविवेककृतेन
दुराग्रहेणात्मनः पीडया यत्तपः क्रियते परस्योत्सादनार्थं वा
न्यस्य विनाशार्थमभिचाररूपं तत्तामसमुदाहृतं कथितं १९

पिशाचभाष्यटीका ४

मूढग्राहेणाविजयनिश्चयेनात्मनः स्वस्य पीडया यत्तपः क्रि
यते परस्यान्यस्य उत्सादनार्थं विनाशार्थं वा तत्तामसमुदाहृ
तं उक्तमित्यर्थः १९

रामानुजभाष्यटीका ५

मूढेति मूढा अविवेकिनः मूढग्राहेण मूढैः कृतेनाभिनिवे
शेन आत्मनः शक्त्यादिकमपरीक्ष्यात्मपीडया यत्तपः क्रियते प
रस्योत्सादनार्थं च यत्क्रियते तत्तामसमुदाहृतं १९

अभिनवगुप्तकृतटीका ६

त्रिविधेपि तपसि श्रद्धा सात्त्विकसहितत्वात्सैव श्रद्धा राजसस्य
तु रजसि दंभादावेव श्रद्धा तमोनिष्ठस्य पुनः परोत्सादनादावे
व श्रद्धेति त्रिविधमपि तपः श्रद्धयोपेतमिति मुनिराह १९

परमार्थप्रपाटीका ७

मूढग्राहेणेति मूढत्वे सति ग्राह आग्रहस्तेन आत्मनः शरीर

श्री॰
गी॰ टी॰
सं॰

74

स्योपवासादिपीडया परस्योत्सादनं जारणमारणोच्चाटनाद्याभिचारिकं तत्तामसं ॥१९॥

वनमालीटीका ८

मूढग्राहेणाविवेकातिशययुक्तेन दुराग्रहेण आत्मनो देहेंद्रियसंघातस्य पीडया यत्तपः क्रियते परस्योत्सादनार्थं वा अन्यस्य विनाशार्थंमभिचाररूपं वा तत्तामसमुदाहृतं शिष्टैः ॥१९॥

[illegible]मवैजयन्तीटीका ९

तामसं तप आह मूढग्राहेणेति मूढः शास्त्रविवेकरहितस्तस्य ग्राहेणाक्रान्तेन दुराग्रहेणेत्यर्थः आत्मनः स्वदेहेंद्रियादेः सामर्थ्यं विनैव केवलया पीडया वा परस्योत्सादनार्थंमन्यस्याभिचारादिना विनाशार्थं यत्तपस्तमोगुणोपेतैर्जनैः क्रियते तत्तामसं तमोगुणयुक्तमुदाहृतं शिष्टजनैः कथितं ॥१९॥

मधुसूदनीटीका १०

मूढग्राहेणाविवेकातिशययुक्तेन दुराग्रहेण आत्मनो देहेंद्रियसंघातस्य पीडया यत्तपः क्रियते परस्योत्सादनार्थं वा अन्यस्य विनाशार्थं वाऽभिचाररूपं तत्तामसमुदाहृतं शिष्टैः ॥१९॥

सदानंदीटीका ११

मौढ्याद्दुराग्रहेणैव देहाद्यसंतपीडया यत्तपः क्रियतेऽन्यस्य विनाशायाभिचारिकं । तत्तपस्तामसं शिष्टैः प्रोक्तं हेयं मुमुक्षुभिः ॥१९॥

नीलकंठीटीका १२

मूढग्राहेण अविवेककृतेन दुराग्रहेण आत्मनः पारीरस्य उत्सादनार्थं विनाशार्थं ॥१९॥

आनंदीटीका १३

मूढस्यात्मानिनो ग्रहेण हठेन कार्याकार्यफलमविचार्य ॥१९॥ ॥

रामकंरीटीका १४

अथतामस माह तत्तामसं तप उक्तं किं तद्यत् मूढग्रहेण मूढस्य कार्यविचार
हीनस्यात्तस्य सतो योग्रहोभिनिवेशस्तेन कृतम् तथात्म
चित्तस्य शरीरस्य पीडया कदर्थनेन कृतं [illegible]यन्निवर्तितं त
थापरस्य हेष्यस्योत्सादनार्थं स्यान [illegible]वनादिसंपन्नयेयत्कृत
मिति [illegible]
[illegible]
[illegible] १९ ॥

लासिकी [illegible]तीटीका १५

तामसंतप आह मूढग्रहेणाविवेकिनिडराग्रहेणात्मनः पीडयाकदर्थनेनच
परस्य शत्रोः स्थानभ्रष्टावनादिरूपविनाशार्थं वायत्कर्कशं
तपोभिचाररूपं क्रियते तत्तु हीयते तत्तामसमुक्तम् [illegible]
[illegible] ॥

पंचोलेटीका

तामसं तप आह मूढ इति यत्तपः मूढग्रहेणाविवेकनि
श्चयेनात्मनः पीडयाखस्यात्मंतक्लेशेन अथवापरस्योत्सा
दनार्थं विनाशनार्थं क्रियते तत्तपः तामसमुदाहृतम् १९

रागवीरसमिहोधिनी

तामसमाह मूढेति कार्याकार्यविवेकरहितो मूढस्तस्य
ग्रहो दुरभिनिवेशस्तेन तथात्मनश्चित्तस्य शरीरस्य पीडया त
था परस्य हेष्यस्योत्सादनार्थं च यत्क्रियते तदभिचारलक्ष
णं तामसमुदाहृतं कथितं १९ ॥

मधुभाष्य

१९ ॥

75

भाषाअनुवादटीका

तामस तपस्या कहते हैं कि अविवेक से कुचेष्टा कर शरीर को क्लेश देय किम्बा और किसी के विनाश दुख के अर्थ अभिचार स्वरूप जो तपस्या तिस को पण्डित जन तामस तप कहते हैं १९

दोहा

आत्म दुःख दे जो करे मूढ़ ग्रही तप जोय पर दुख के अर्थ वा तामस कहिये सोय १९

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे देशे
काले च पात्रे च तद्दानं सात्विकं स्मृतं २०

शांकरभाष्यटीका १

इदानीं दानभेदमुच्यते दातव्यमिति दातव्यमिति एवं मनः कृ
त्वा यद्दानं दीयतेऽनुपकारिणे प्रत्युपकारासमर्थाय समर्थाया
पि निरपेक्षं दीयते देशे पुण्ये कुरुक्षेत्रादौ काले संक्रान्त्यादौ
पात्रे च षडङ्गविद्वेदपारग इत्यादौ आचारनिष्ठाय इत्यर्थः तद्दानं
सात्विकं स्मृतं २०

आनंदगिरिकृतटीका २

क्रमप्राप्ते दानस्य गुणनिमित्तभेदमाह इदानीमिति दातव्यमि
त्येवं मनः कृत्वा दानमेव मया भव्यं न फलमित्यभिसन्धायेत्य
र्थः २०

स्वामिकृतटीका ३

पूर्वं प्रतिज्ञातमेव दानस्य त्रैविध्यमाह दातव्यमिति दातव्यमि
त्येवं निश्चयेन यद्दानं दीयतेऽनुपकारिणे प्रत्युपकारासमर्था
य देशे कुरुक्षेत्रादौ काले ग्रहणादौ पात्रे चेति देशकालस
हचर्यात्सप्तमी प्रयुक्ता पात्रभूताय तपःश्रुतादिसंपन्नाय ब्रा
ह्मणायेत्यर्थः यद्वा पात्रे इति चतुर्थ्येवैषा पात्रे रक्षकायेत्यर्थः
सहि सर्वस्मादापद्रूपणाद्दातारं पातीति यदेवंभूतं दानं तत्सा
त्विकं २०

पालको तस्मै पात्रे

पैशाचभाष्यटीका ४

दातव्यमिति यद्दानं कर्त्तव्यमिति यद्दानं दीयते हिरण्यादि अ
नुपकारिणेऽप्रत्युपकाराय देशे पुण्यदेशे काले अयनसंक्रा
न्त्यादौ पात्रे षडंगवेदविदादौ तद्दानं सात्तिकं स्मृतं २०

रामानुजभाष्यटीका ५

दातव्यमिति फलाभिसंधिरहितं दातव्यमिति देशे काले चानु
पकारिणे यद्दानं दीयते यद्दानं सात्विकं स्मृतं २०

अभिनवगुप्तकृतटीका १ दातव्यं दद्यादिति नियोगमात्रं
पालनीय मिति दोषाभिसंधानाद्यपरिक्लिष्टमिता दिदोषात् दानस्यासत्करणं तत्त्वप्रदानादि
स्वरूपार्थे २ ॥ सत्करणात् ॥ १ ॥ २ ॥ ॥ ॥

परमार्थप्रपाटीका २

अथ त्रिविधदानमाह दातव्यमिति त्रिभिः अवश्यदातव्यमेवेति
नियमेन यद्दीयते अनुपकारिणे प्रत्युपकारासमर्थाय कालेग्र
हणादौ देशे कुरुक्षेत्रादौ पात्रे षडंगवेदपारगे अत्र समस्माच्चतुर्थी
तेषां तपःश्रुतादिसंपन्नाय ब्राह्मणायेत्यर्थः यदेवंभूतं दानं त
त्सात्विकं २

वनमाली टीका ४

दानस्य त्रैविध्यमाह दातव्यमिति त्रिभिः दातव्यमेव शास्त्रात्व
शादित्येवं निश्चयेनानन्तफलेच्छया यद्दानं न तु लाभादिदीय
ते नुपकारिणे प्रत्युपकाराजनकाय देशे पुण्ये कुरुक्षेत्रादौ का
ले च पुण्ये सूर्योपरागादौ पात्रे चेति वचनं पैसममीकीहशाया
नुपकारिणे दीयते पात्राय विद्यासदाचारशक्ताय पात्रे पातम्भ्
तायरक्षकायेति विद्यातपोभ्यामात्मनो दानस्य पालनसमर्थप्र
तिग्रहीयादिति शास्त्रात् यत्तादृशं दानं सात्विकं स्मृतम् २

कुसुमवैजयन्तीटीका ५

अथ दानस्य गुणत्रिभिस्त्रैविध्यं वक्तुमादौ सात्विकदानमाह
दातव्यमिति दातव्यं स्वधर्मचारिणा अपायफलकामरहितं दानं
कार्यमेवेति निश्चित्य देशे कुरुक्षेत्रपुष्करप्रयागादौ काले च ग्रह
णोपरागसंक्रान्त्यादौ पात्रे तपोविद्यादियुक्ते दानभाजनभूते ब्राह्म
णे यद्दानं सर्वस्मात् दायकस्य दातारं पाति रक्षतीति पात्रं तस्मै पात्रे
रक्षकाय एकेन वंशाहेन गंगादितीर्थे हिनी येन देशादि विनैव
पत्रमात्रो लभ्यते तत्रैवेति सूचितम् अनुपकारिणे प्रत्युपकार
रहिताय निष्किंचनाय विदुषे ब्राह्मणाय यद्दानं सत्वगुणोपे

नदीयतेवर्णाश्रमादिधर्मप्रवृत्तैः पुरुषैर्यद्दानं क्रियते तद्दानं सा
त्विकं सत्वगुणोपेतं स्मृतं शास्त्रज्ञैः कथितम् २०

+ इदानीं क्रमप्राप्तस्य दानस्य त्रैविध्यं दर्शयति त्रिभिः॥

मधुसूदनी टीका १०

+ दातव्यमेव शास्त्रचोदनावशादित्येवं निश्चयेन न तु फलाभि
संधिना यद्दानं तुलापुरुषादिदीयते अनुपकारिणे प्रत्युप
काराजनकाय देशे पुण्ये कुरुक्षेत्रादौ काले च पुण्ये सूर्योप
रागादौ पात्रे चेति च तत्पर्यं समीपात्रायेत्यर्थः कीदृशाया
नुपकारिणे दीयते पात्राय च विद्यातपोयुक्ताय पात्रे रक्षका
येति वा पातीति पात्रं तारकः तस्मै विद्यातपोभ्यामात्मनो दा
तुश्च पालनएव प्रतिग्रहीत्रादिति शास्त्रात् तद्देवंभूतं दा
नं सात्विकं स्मृतं २०

सदानंदी टीका ११

क्रमप्राप्तस्य दानस्य त्रैविध्यं दर्शयन्नाह दातव्यमेव शास्त्रो
क्तमित्येवं निश्चयेन वै १ न तु फलाभिलाषेण यत्तुलापुरुषा
दिकं अनुपकारक्षमाय कुरुक्षेत्रादिपावने २ देशे सूर्योपरा
गादौ काले काले पुण्ये ह्यपर्वणि विद्यातपोभ्यां युक्ताय पा
त्राय च यथाविधि १ दीयते श्रद्धया भक्त्या विस्मृतीत्यर्थमेव य
त् तदेवं सात्विकं दानं प्रोक्तं सम्यक्फले २० यतः २

नीलकंठी टीका १२

दातव्यमेवेति बुद्ध्या यद्दानं प्रदेयद्रव्यं दीयते न तु फलमुद्दिश्य
दीयते कस्मै अनुपकारिणे प्रत्युपकारासमर्थाय देशे कुरु
क्षेत्रादौ काले संक्रांत्यादौ यद्दीयते तत्सात्विकमिति संबंधः य
द्वा पात्रे दानं समर्पणं तदपि सात्विकमिति योजना अत्र प्रथमोदा
नशब्दः कर्मणि व्युत्पन्नः प्रदेयद्रव्यवाची कर्मभूतः तत्संयोगा
त्संप्रदाने चतुर्थ्यपेक्षा द्वितीयस्तु भावव्युत्पन्नस्त्यागमात्रवाची
तेन तत्र पात्रभूते पुंसि न चतुर्थ्यपेक्षा कर्मणा यमभिप्रैति स संप्र

दानमिति हि पारिभाषिकाः संप्रदानसंज्ञायामत्र कर्मविभक्त्य
भावेनाप्रवृत्तेः तेन पात्र इति चतुर्थ्यर्थे सप्तमीति वा पात्रश
ब्दस्य चतुर्थ्यर्थमिति वा कल्पनं व्यर्थमेव दानशब्दस्याहृत्य
वदेशकालानपकारित्वविशिष्टदानमित्येका कोटिः पात्रे
दानमित्यपरा उभयसमुच्चयेन महात्म्यम् इति भावः २०

आनंदीटीका १३ स्पष्टार्थम् ॥ २०

~~यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयते च परि~~
~~क्लिष्टं तद्दानं राजसं स्मृतम्~~ २१ ॥

+ शरीरादिभेदेन त्रिविधस्य तपसः प्रत्येकं सात्विकादिभे दात्त्रैविध्यं प्रतिपाद्येदानीं दानं त्रिविधमाह तत्र सात्विकं तावत् ॥

रामकंठीटीका १४

+ तत्सात्विकं दानं सात्विकचित्तेन सात्विकश्रद्धावता वशुक्
त० धेण निर्वर्तितत्वेन सात्विकशब्देनोक्तम् किं तद्यदेवं विधेस्व
क्रियाविशेषेष्वधिकृतत्वेन मयान्नादिकर्तव्यतापर्यालो
नं देयमेवेत्येतावदभिसंधाय दीयते यदनुपूर्वनस्य दान
विषयमाह पात्र इति जातिकुलविद्याकर्मपंक्तिपावना
दिशरीरगुणसंपन्नं पात्रमुच्यते तद्विषयत्वेन यद्दीयते
तथा देशे पुण्ये सति तीर्थायतनादौ तथा काले विषुव
त्रुहे परागादौ यद्दीयते तत्सात्विकं दानं नित्यनैमित्तिक
क्रियांगत्वेन व्यवस्थितविशिष्टविधिपूर्वकस्य दानस्य य
तेन भ्रांत्या पृथग्दाननिर्देशः सत्रादिदानपरिग्रहार्थो वेदि
तव्यः [illegible] १४ ॥

+ एवं प्रतिज्ञातं दानस्य त्रैविध्यमाह तत्रादौ सात्विकमाह ॥

लासिकी [illegible]टीका १५

+ दातव्यं दयादिनिशास्त्रनियोगमात्रं पालनीयमित्येवम
भिसंधाय अनुपकारिणे दृष्टादृष्टप्रत्युपकाराजनकाय
देशे कुरुक्षेत्रादौ तीर्थे काले पुण्ये सूर्योपरागादौ पात्रे वि
द्यातपोयुक्ताय दानं दत्तकायवा यद्दानं दीयते तत्सात्वि

कं स्मृतं विद्यातपोभ्यां मात्मने दानस्य पालनं दमप्रवृत्ति
गृह्णीयादिति शास्त्रम् [illegible] ॥ [illegible] ॥

पंचोले टीका

एवं परिज्ञाय दानस्यैव त्रैविध्यं वक्तव्ये सात्विकं दानमाह दात
व्यमिति यद्दानं देशे कुरुक्षेत्रादौ काले संक्रान्त्यादौ पात्रे वेदा
र्थविदि ब्राह्मणे अनुपकारिणे प्रत्युपकारासमर्थाय निरपे
क्षतया दातव्यमेवेति बुद्ध्या दीयते तद्दानं सात्विकं स्मृतम् २०

रणवीरसमिद्धोधिनी

तपसस्त्रैविध्यमुक्त्वा दानस्य तदाह दातव्यमिति स्वधर्मेण
र्जितं द्रव्यं तावता सत्क्रियास्वविषये संगतानि ष्वतयेदेवमे
वेत्येवाभिसंधाय यद्दानं दानार्हं द्रव्यजातं दीयते संप्रदानमाह
अनुपकारिणे प्रागकृतोपकारायायेव मदसमर्थाय कोऽर्थः
दानपरकर्तव्योपकारमनपेक्ष्यैव यद्दीयते इति पर्यं पात्रे जा
तिकुलविद्याविनयादिगुणसंपन्नत्वात्कुनतः पात्रं तद्विषयेय
दीयते तथा देशे कुरुक्षेत्रादौ काले चंद्रार्कोपरागादौ च य
द्दीयते तद्दानं सात्विकं मतं प्राकृतार्थस्तु अवधपं हि भट्टेभ्यः
प्रोत्साहनार्थं वंदिगायकादिभ्यः स्वयशोऽर्थं दातव्यमिति निश्च
येनानुपकारिणे प्रागकृतोपकाराय ईषदर्थं वा न त्वस्यो
पकारं वा कुर्वते देशे विषमस्थाने काले ग्रहणादिप्रारंभावसरे
पात्रे वक्तृतस्तलक्षणे विषये यद्दीयते तत्सात्विकं कथितमि
त्यर्थः अद्येयमनुपमोदायोसाव अनुपकारिभ्यो ददाति उपका
रिणां तु केवल कथा सकृदपि कार्यमागमसायकेभ्योपि ददाति
बहुधनोनिःप्रोषं च कुर्वेऽयं तत्कीटपांदयादित्येवं श्रुत्वा स वेत्ता

कस्यचित्कार्यस्य साधने स्वयमेव प्रवर्तकमनुपकारिदानप्रयोजनं
पुनरुत्थं यशस्वकृतं तत्पदं विस्फारयतीति पात्रेभ्यो दानस्य प्र
योजनं यद्वा पाति रक्षतीति सर्वस्मादपकृष्टाद्दातारमिति पात्रं
तस्मै पात्राय प्रतिगृहीतवस्तुजातस्य धर्मेण भोगादिना नरकादि
गतेस्तारकायेत्यर्थः २०॥

मधुभाष्य

२०॥

79

भाषाअनुवादटीका

पूर्व कथित अङ्गीकृत दान के विषय मे भी सात्विकादि तीन प्र
कार कहते हैं कि दान करना हीं चाहिये ऐसी निश्चय से जो दा
न और उस से प्रत्युपकार न होय अर्थात अपना उपकार न वा
है न वह उपकार के जोग्य होय जिसको दान देय और कुरुक्षेत्र
काशी प्रयाग तीर्थ स्थानमे तथा ग्रहण संक्रान्ति पर्व आदिक मे
और वेद शास्त्रयुक्त ब्राह्मणों को अथवा यह पात्र सकल आप
दों से दाता की रक्षा करै एवंभूत पात्र कहे पात्र को जो दान दि
या जाय उसी को पण्डित जन सात्विक दान कहते हैं २०

दोहा॥

यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः दी
यतेचपरिक्लिष्टंतद्दानंराजसंस्मृतं २१

शांकरभाष्य टीका १

यत्त्विति यत्तुदानं प्रत्युपकारार्थं कालेत्वयं मां प्रत्युपकरिष्यतीत्येव मर्थं फलंवास्य दानस्यमे भविष्यत्युद्दिश्यमिति तदुद्दिश्य पुनर्दीय ते चपरिक्लिष्टं खेदसंयुक्तं तद्राजसं स्मृतं २१

आनंदगिरिकृत टीका २

राजसतामसदानविभजनं स्पष्टार्थं २१

स्वामिकृत टीका ३

राजसं दानमाह यत्त्विति कालांतरेऽयंमांप्रत्युपकरिष्यतीत्येव मर्थं फलंवास्वर्गादिकमुद्दिश्ययद्दानं दीयतेपरिक्लिष्टं चित्तक्ले शयुक्तंयथाभवतिएवंतद्दानंराजसमुदाहृतं २१

पिशाचभाष्य टीका ४

दीयते प्रत्युपकारार्थं उपकृतवानुपकरिष्यतीतिप्रत्युपकारं फलंस्वर्गादिफलमुद्दिश्यवापरिक्लिष्टंक्लेशयुक्तंतद्दानंराजसं स्मृतं २१

रामानुजभाष्य टीका ५

यदिति प्रत्युपकारकटात्तगर्भंफलमुद्दिश्यचपरिक्लिष्टंअकल्या (?)द्रव्यादिकंयद्दानंदीयतेतद्राजसमुदाहृतं २१

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं २१ ॥ ॥ ॥

परमार्थप्रपा टीका ७

राजसमाह यत्त्विति कालांतरेऽयमपिमांप्रत्युपकरिष्यतीति स्वर्गादिलोकमुद्दिश्यवापरिक्लिष्टंक्लेशयुक्तंवायद्दीयतेतद्रा जसंस्मृतं २१

वनमाली टीका ८

श्रीः गीः टीः संः

81

प्रत्युपकारार्थं कालांतरे मामयमुपकरिष्यतीत्येवं दृष्टार्थं फलं स्व
र्गादिकमुद्दिश्य सात्विकविलक्षणं दीयते परिक्लिष्टं च कष्टमेताव
द्व्ययितमिति पश्चात्तापयुक्तं यथा भवत्येवं च यद्दीयते तद्दानं राज
सं स्मृतम् २१

ऋतमवैजयन्ती टीका १

राजसं दानमाह यत्त्विति तु निश्चयेन प्रत्युपकारार्थं प्रत्युपकारप
वार्थः प्रयोजनं यस्य तत् यदिदं दत्वैतस्मादहं न संशयं मम पुत्र
[illegible]कलत्रधनादिकं दास्यति रक्षिष्यति वेत्येवं प्रत्युपकारपवा
र्थः प्रयोजनं यस्य तत् [illegible]
[illegible] इत्येवं प्रत्युपकारकदात्तगर्भं
कैहिकदृष्टफलप्राप्त्यर्थमित्यर्थः वा अथवा फलमुद्दिश्य पारमार्थिकं
स्वर्गाद्यदृष्टफलमनुसंधाय पुनर्दीयते प्राप्तफलस्य दृढार्थमि
ति सूचितम् परिक्लिष्टमंगलद्रव्यादिकं यद्दाहमेन दत्वा का
र्यं जीविष्यामि दाने विनष्टे न जीविष्यतीत्येवं संदिग्धचित्तयुक्ते
न यथा स्यात्तथा यद्दाममयागुरुवाक्यात्प्राणसमं दानाद्देवतादत्तम
होकष्टमधुनाहं वर्ते इति पूर्वं दत्तद्रव्यस्य पश्चात्तापयुक्तं यथा
स्यात्तथा चशब्देन दम्भत्वधर्मध्वजित्वादयः संगृह्यन्ते यद्दानं रजो
गुणोपेतैः पुरुषैर्दीयते तद्दानं राजसं रजोगुणयुक्तमस्मदादिभिः सं
कथितं २१

मधुसूदनी टीका १

यत्तु प्रत्युपकारार्थं कालांतरे मामयमुपकरिष्यतीत्येवं दृष्टार्थं
फलं वा स्वर्गादिकमदृष्टमुद्दिश्य यस्तु न दीने सात्विकविलक्षणं
दीयते परिक्लिष्टं च कष्टमेतावद्व्ययितमिति पश्चात्तापयुक्तं य
था भवत्येवं यद्दीयते तद्दानं राजसं स्मृतं २१

सदानंदी टीका १

कालांतरेऽहि विप्रोऽयं मामप्युपकरिष्यति इत्येवं दीयते यद्दास्य

गीयुद्दिश्य वा पुनः १ पश्चात्तापपर्यवसानेन तत्क्लिष्टं राजसं स्मृतं २१

नीलकंठी टीका ११

परिक्लिष्टंकथमेतावद्द्रव्यव्ययःकर्तव्यइत्याकुलतासंकेय यास्मात्तथादीयतेइतिक्रियाविशेषणं २१

श्रीधरीटीका १३

परिक्लिष्टंदीयेवानवेतिवितर्कक्लेशाद्दर्वदत्तम् २१ ॥

रामकंठीटीका १४

+अथराजसं॥

+तद्राजसंदानंस्मृतंकिंतद्यत्प्रत्युपकारार्थंदीयतेप्रतीप उपकारःप्रत्युपकारस्तदर्थंतत्प्रयोजनतया एतस्मा दिहैवमेकस्मिन्प्रत्युपकारःसंपत्स्यतेइत्यभिसंधायय द्दीयते तथाफलंवापारलौकिकमुद्दिश्यसंकल्पदी यतेकीदृशंपरिक्लिष्टंस्वल्पंकष्टप्राप्यंवा ॥ २१ ॥

लासिकी [illegible]टीका १५

राजसंदान माह—कालांतरेयंमांप्रत्युपकरिष्यतीत्येवंदृष्टंफलमभिसंधा य अथवास्वर्गादिकमदृष्टंफलमुद्दिश्यसंकल्पपू र्वकंदानंदीयते यद्वापरिक्लिष्टंकथमेतावद्व्ययितमित्येवं पश्चात्तापयुक्तंयथाभवत्येवंयद्दीयतेतद्दानंराजसं स्मृतम् [illegible] ॥

पंचोलेटीका

राजसंदानमाह यत्त्विति तत्पुनः[illegible]प्रत्युपकारबुद्ध्या पुनःफलंकर्मफलंउद्दिश्यवापरिक्लिष्टंक्लेशसंयुक्तंदी यतेतद्दानंराजसंस्मृतम् २१

८२

रणवीरसमिद्धोधिनी

राजसमाहृयविति यतस्मान्ममेहैव कश्चित्प्रतीपप्रत्य
कारः संपत्स्यते इत्यैहिकफलोद्देशेन वा पारलौकिकस्व
र्गादिभोगसंकल्पेन वा यद्दीयते यस्मिंश्च दीयमाने चित्तं प
विक्लिन्नाति तद्दानं राजसमुदाहृतं इत्यर्थः ॥ २१ ॥

मधुभाष्य

२१

भाषाअनुवादटीका

राजस दान कहते हैं कि समय के अनुसार यह मेरा प्रत्युपका
र करेगा इस हेतु से अथवा स्वर्गफल भोग के अर्थ चित्तक्लेशयु
क्त कहेदेते समय कष्ट हो ऐसा जो दान तिसको शिष्टलोग रा
जस कहते हैं २१

दोहा

जो प्रतिकारादिके लियें फलवांछाकरजोय देईयतदेजो
कष्टसें राजसकहयो सोय २१

63

अदेशकालेयद्दानमपात्रेभ्यश्चदीयते अस
त्कृतमवज्ञातंतत्तामसमुदाहृतं २२

शांकरभाष्य टीका १

अदेशेति अदेशकाले अपुण्ये देशे म्लेच्छाशुच्यादि संकीर्णे अका
ले पुण्यहेतुत्वेनाऽप्रख्याते संक्रान्त्यादिविशेषरहिते अपात्रेभ्यश्च
मूर्खतस्करादिभ्योदेशादि संपत्तौ वा असत्कृतं प्रियवचनपादप्र
क्षालनपूजादिरहितमवज्ञातं पात्रपरिभवयुक्तं च तद्दानं तामसमु
दाहृतं २२

आनंदगिरिकृत टीका २

विहितानां कर्म्मणां प्रमादपूर्वके वैगुण्ये कथं परिहारः स्यादित्या
शंक्याह यत्तेति ओमिति ब्रह्मेत्यादिश्रुते ओमिति तावद्ब्रह्मणोनाम
निर्देशः तत्त्वमसीतिश्रुतेः तदित्यपि ब्रह्मणोनामनिर्देशः सदेव सो
म्येदमिति श्रुतेः सदित्यपि तस्यनामेति मत्वाह ओमिति कथंनिर्दे
शेन तेषांविधानमित्याशंक्याह निर्देशेति यज्ञादीनां वैगुण्यप्रती
तिकाले यथोक्तनामत्रयस्योच्चारणादवैगुण्यंसिध्यतीति भावः
कर्म्मसाद्गुण्यकारणं त्रिविधंनाम स्तौति ब्राह्मणाइति २३

स्वामिकृत टीका ३

तामसंदानमाह अदेशकालइति अदेशे अशुचिस्थानेअकालेअशौच
समये अपात्रेभ्योविटनटादिभ्योयद्दानंदीयते देशकालपात्रसं
पत्तावपिअसत्कृतंपादप्रक्षालनादिसत्काररहितंअवज्ञातंतिर
स्कारयुक्तमेवंभूतंदानंतामसमुदाहृतं २२

पिशाचभाष्य टीका ४

अदेशकाले पुण्यदेशकालावनपेक्ष्य अपात्रेभ्यश्चदीयते अपात्रेषु
प्रदानंच असत्कृतंप्रियवचनपूजारहितंसंप्रदानंसंप्रदेययो
रवज्ञायुक्तंयदेवंदानंतत्तामसमुदाहृतं २२

रामानुजभाष्य टीका ५

अदेशकाले इति यद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामस
मुदाहृतं अदेशकाले पात्रे च यद्दानं दीयते असत्कृतं पादप्रक्षा
लनादिरहितमवज्ञातं सावज्ञं च यद्दीयते तत्तामसमुदाहृतं
एवं वैदिकानां यज्ञतपोदानानां सत्त्वादिगुणभेदेन भेदमुक्त्वा
दानीं तस्य दैशिकस्य [illegible]
पदमुपयन्ता [illegible] ॥२२॥

अभिनवगुप्तकृत टीका ९

दानं देयादिति नियोगमात्रं पालनीयमिति दोषाभिसंधानाय
परिक्लिष्टमितादिदोषात् दानस्यासत्करणं तत्प्रदानादिसत्क
रणात् ॥ एवं लौकिकानां सात्त्विकादित्रिप्रकाराशयानुसारेण क्रि
याव्याख्याना इदानीं येन गुणत्रितयसंकटो नीर्णोऽपि यतो लौकिकीं क्रियां
कथमाचरेदिति नाह ककार उच्यते

परमार्थप्रपा टीका १

तामसमाह अदेशेति अदेशेऽशुचिस्थले अकाले सूतकादौ अपात्रे
भ्यो विटनटादिभ्यो यत् असत्कृतं सत्काररहितं अवज्ञातं पादप्र
क्षालनादिरहितं तत्तामसं ॥२२॥

वनमालीटीका ८

अदेशे स्वतोऽदुष्टजनसंसर्गादापापहेतावशुचिस्थाने अकाले पुण्य
हेतुत्वेनाप्रसिद्धे यस्मिन्कस्मिंश्चिद्देशे वा काले वा अपात्रेभ्यश्च वि
द्यातपोरहितेभ्यो नटादिभ्यश्च यद्दानं दीयते देशकालपात्रसंप
त्तावप्यसत्कृतं प्रियभाषणपादप्रक्षालनपूजादिसत्काररहितं
अवज्ञातं पात्रपरिभवयुक्तं च तद्दानं तामसमुदाहृतं तदेवमा
हारादीनां त्रैविध्यकथनेन सात्त्विकान्येवादेयानि राजसतामसानि
परिहर्तव्यानीत्युक्तं तत्राहारस्य हृद्यत्वेन नात्यंतं वैगुण्ये न फ
लाभावशंका यज्ञतपोदानानां च हृद्यानामंगवैगुण्यापादप्र
वीनृत्वात् फलाभावः स्यादिति ॥२२॥

हनुमद्वैजयन्ती टीका ९

नामसं दानमाह अदेशकालइति अदेशे दानानर्हे वेश्यासव
शावाग्यालये अविस्थाने अकाले भूकंपोल्कापातोपलवृष्टि
भद्राभरण्यादिके अशुचिसमये अपात्रेभ्यः वेश्यासवं
नाशक्तेभ्यो धूर्तनटमूर्खादिभ्यश्च शब्दावधारणीय हे वगो
भूहिरण्यान्नादिकं दानं दीयते तेन मोगुणोपेतैर्जनैः क्रियते त
द्दानं तामसं तमोगुणयुक्तमुदाहृतं सद्भिरिति शेषः कुत एवं य
तोऽसत्कृतं पादप्रक्षालना[illegible]सनादिरहितं [illegible] तदेव कृतोपि तोः
वज्ञातं तिरस्कारंतु कारायनाक्षरभाषणोपेतं दानं स्वश्रद्धामकिर
हितत्वेन संकारादरशून्यत्वात्तामसत्वमित्याशयः २२

मधुसूदनी टीका १०

अदेशे स्वतो वा दुर्जनसंसर्गाद्वा पापहेतावशुचिस्थाने अका
ले पुण्यहेतुत्वेनाप्रसिद्धे यस्मिन्कस्मिंश्चित् अशौचकाले वा
अपात्रेभ्यश्च विद्यातपोरहितेभ्यः नटविटादिभ्य यद्दानं दीयते
देशकालपात्रसंपत्तावपि असत्कृतं प्रियवचनपादप्रक्षाल
नपूजादिरहितं अवज्ञातं देशकालपात्रपरिभवयुक्तं च तद्दानं
तामसमुदाहृतं तदेव महारयततनयोदानानां त्रैविध्यकथने
न सात्त्विकान्येतान्येवादेयानि राजसतामसानि तु परिहर्तव्यानी
त्युक्तं तत्राहारस्य दृष्टार्थत्वेन नात्यंतवैगुण्येन फलाभावशंका
यज्ञतपोदानानां त्वदृष्टार्थत्वात् अंगवैगुण्यादपूर्वानुत्पत्तौ फला
भावः स्यादिति सात्त्विकानामपि तेषामानर्थक्यं प्राप्तं प्रमाद
बहुलत्वात्पुरुषाणामतस्तद्वैगुण्यपरिहारायोक्तं तत्सदिति
भगवन्नामोच्चारणरूपं सामान्यप्रायश्चित्तं परमकारुणिकत
योपदिशति भगवान्

सदानंदी टीका ११

स्वतो वा दुष्टसंसर्गाद्वा विस्थानं एव हि अशौचकाले पात्रेभ्यो

नटादिभ्यः प्रदीयते देशकालादिसंपत्तावपि सत्कारवर्जितं
पात्रेष्ववज्ञयाऽतेन तद्दानं तामसंस्मृतं २२

नीलकंठी टीका १२

असत्कृतं प्रियभाषणपादप्रक्षालनादिपूजासत्कारस्तद्र
हितं अवज्ञातं पात्रपरिभवयुक्तं दानं प्रदेयं हिरण्यादि
२२

आनंदी टीका १३

प्रोक्तानां यज्ञादीनां सात्विकादीनां फलं ब्रह्मप्राप्तिं दर्श
यितुमाह २२ ॥

रामकंठी टीका १४

अथ तामसमाह —
तन्नामसंदानं किं न देशकालपात्रहीनं तया सत्कारेणाव
ज्ञया यद्दीयते सात्विकविपरीतमित्यर्थः तदेवं सात्विका
नियज्ञतपोदानानि दैवसर्गाभिव्यंजकानीत्यत्र तात्पर्यं २२
ततश्च यपते ब्रह्मप्राप्तिप्रसवमनसो दैवसर्गभाजो ये चै
ते संसारबंधाभिमुखे चेतनसत्त्वविपरीतास्तत्र यस्तथाभये
षां यज्ञादिविषयज्ञानाज्ञानतत्ता निबंधनत्वात् त्रिप्रकारां
स्थितिं क्रमेण प्रतिपादयितुमाह २२ ॥

लासिकी [illegible]टीका १५

नामसंदानमाह — अदेशे अशुचिस्थाने अकाले अशौचसमये अपात्रेभ्यो
नटविटादिभ्यो यद्दानं दीयते देशकालपात्रसंपत्तावप्य
सत्कृतं पादप्रक्षालनादिसत्काररहितमवज्ञातं तिरस्कार
युक्तं एवंभूतं दानं तामसमुदाहृतम् श्रद्धायाः सात्विका
दिस्वभावमुखलक्षणभूताया अनंतरत्वाद्बहुलेद्य नामा
लक्ष्य वाद्यास्य पित्रुहारादयः सात्विकादिस्वभावपर्यालो
चनाय सात्विको गीतार्थाववोधनानुष्ठानयोर्भजते राज
सः किंचिदुपायानुशीलनेन सात्विकस्वभावाप्स्यायिका श्री
रीभविष्यति तामसस्त्वत्यंतमनधिकृत इत्येतदर्थं भगव

२२

ताःपृथक्पृथगुपन्यस्ताः अधुनाराजसानांपुरुषाणांगीता
र्थावधारणेचित्तपरिकर्मार्थंतेषांयज्ञतपोध्यानादिकस्य
चसात्विकत्वापादनायोपायभूतम् ॐतत्सदितिश्रीभगवा
न्नामोच्चारणरूपंप्रायश्चित्तंपरमकारुणिकतयाश्रीभगवानु
पदिशति २२ ॥

पंचोले टीका

तामसंदानंआह अदेशइति यद्दानंअदेशेम्लेच्छादिसंकी
र्णेअशुद्धेअकालेसंक्रांत्यादिपुण्यकालविशेषरहितेअ
पात्रेभ्यः मूर्खतस्करद्यूतजेभ्योदीयतेदेशादिसंपत्तावपि अ
सत्कृतंप्रियवचनपादप्रक्षालनपूजादिरहितं अवज्ञातंपा
त्रपरिभवयुक्तंदीयते तत्तामसमुदाहृतम् २२

रागवीरसमिद्धोधिनी ॥

तामसमाह अदेशकालेइति प्रोक्तलक्षणदेशादिहीनतयास
त्कारंचवर्जयित्वावमानेनचयद्दीयते तत्सात्विकविपरीतंताम
संदानमुक्तमित्यर्थः एतदंतेनचतुर्थेन दैवासुरसंपदभिव्य
ञ्जकत्वेनसात्विकादियज्ञतपोदानानिप्रोक्तानि तत्रचायमभि
प्रायः दैवींसंपदमभिजातानामुभयलोकसिद्धिः परमेश्वरसा
युज्यपर्यवसायिनी तदितरेषांलोकद्वयभ्रंशपूर्वकमधोगतिल
क्षणोबंध इत्येतत्सागसहकृत्यतिपादितं ततश्चदैवस्वभाव
व्यंजकत्वेनक्रियायामेवयत्नोविधेयइति २२॥

मधुभाष्य

२२॥

भाषाअनवाद्टीका

अब तामस दान कहते हैं कि अदेश कहे अपवित्र स्थान मे अ
काल कहे अशौचादि समय मे और अपात्र कहे चोर लवार
नाचने नकल करनेवालों को जो दान अथवा देश काल विद्या
वान के रहते भी असत्कृत कहे पाद प्रक्षालन आदि सत्कार
रहित अथवा अनादर से जो दान सुपात्र को भी दिया जाय
तिस को शिष्ट लोग तामस कहते हैं २२

दोहा

देश काल बिन दान जो अपात्रहिं दीजें जोय बिन सत्कार अ
वज्ञान सें कहा तामसी सोय २२॥

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा २३

शांकरभाष्य टीका १

यज्ञदानतपःप्रभृतीनां साद्गुण्यकरणायायमुपदेश उच्यते ॐ तत्सदिति एष निर्देशः निर्दिश्यतेऽनेनेति निर्देशः त्रिविधो नाम निर्देशो ब्रह्मणः स्मृतश्चिन्तितो वेदान्तेषु ब्रह्मविद्भिः ब्राह्मणास्तेन निर्देशेन त्रिविधेन वेदाश्च यज्ञाश्च विहिता निर्मिताः पुरा पूर्वमिति २३

आनंदगिरिकृत टीका २

स्पष्टार्थं २३ ॥ ॥ ॥

स्वामिकृत टीका

ननु चैवं विचार्यमाणे सर्वमपि यज्ञतपोदानादि राजसतामसप्रायमेवेति कथं तेषां यज्ञादिप्रयासः स्यादित्याशंक्य तथाविधस्यापि सात्त्विकत्वोपादनप्रकारं दर्शयितुमाह ॐ तदिति ॐ तत्सदिति त्रिविधो ब्रह्मणः परमात्मनो निर्देशः नामव्यपदेशः स्मृतः शिष्टैः तत्र ओमित्येकाक्षरं ब्रह्मेत्यादिश्रुतिप्रसिद्धेरोमिति ब्रह्मणो नाम जगत्कारणत्वेनातिप्रसिद्धत्वाद्विप्रकृष्टत्वात्तच्छब्दोऽपि ब्रह्मणो नाम तत्त्वमसीति श्रुतेः परमार्थसत्त्वसाधुत्वप्रशस्तत्वादिभिः सच्छब्दो ब्रह्मणो नाम सदेव सोम्येदमग्र आसीदित्यादिश्रुतेः अयं त्रिविधोऽपि नामनिर्देशो विगुणमपि सगुणीकर्तुं समर्थ इत्याशयेन स्तौति तेन त्रिविधेन ब्रह्मणो निर्देशेन ब्राह्मणाश्च वेदाश्च यज्ञाश्च पूर्वं सृष्ट्यादौ विहिता विधात्रा निर्मिताः सगुणीकृता वा यद्वा यस्मायं त्रिविधो निर्देशस्तेन परमात्मना ब्राह्मणादयः पवित्रतमाः सृष्टाः तस्मायं त्रिविधो निर्देश इति प्रशस्तस्त्वर्थः २३

पिशाचभाष्य टीका ४

निर्दिश्यतेऽनेनेति निर्देशः ब्रह्मणः परमात्मनः स्मृतः ब्रह्मविद्भि

ˇत्रिष्टन

ˇम

श्री· गी· टी· सं·

...नीतस्य वैदिकस्य यागा... प्रणवसंयोगेन तद्ब्रह्म... व्यपदेश्यतया चलत्त... एमुच्यते॥

रोमिति तत् दिति सदिति त्रिविधो ब्रह्मणो निर्देशः अभिधानं स्मृत मित्य
र्थः तेन त्रिविधेन निर्देशेन ब्राह्मणा वेदिनश्च वेदाश्च यज्ञाश्च विहि
ताः सृष्टाः पुरा पूर्वस्मिन्काले सृष्टिकाले सकलजगत्स्रष्टा हिरण्यग
र्भेण २३

रामानुजभाष्य टीका ५

ॐमिति ॐतत्सदिति त्रिविधोयं निर्देशः शब्दः ब्रह्मणः स्मृतः ब्रह्म
णोन्वयि ॐतत्सदिति शब्दानाम वयप्रकारो वर्ण्यते मध्यममा
मिति हि भवति ब्रह्म च वेदः वेदशब्देन वैदिकं कर्म वोच्यते वैदि
कं यज्ञादिकं कर्म ॐतत्सदिति शब्दान्वितं भवति ॐमिति शब्द
स्यान्वयो वैदिककर्मांगत्वेन प्रयोगादौ प्रयुज्यमानतया तत्स
दिति शब्दयोरन्वयः पूर्णान्वायवाचकतया तेन त्रिविधेन शब्दे
नान्विता ब्राह्मणा वेदान्वयिनस्त्रैवर्णिका वेदाश्च यज्ञाश्च [illegible]
विहिताः पुरा मयैव निर्मिता इत्यर्थः [illegible]
[illegible] २३

अभिनवगुप्तकृत टीका ९

[illegible]र्थं २३ ॥ ॥

परमार्थप्रपा टीका ७

ननु चैवं विचार्यमाणे सर्वमपि यज्ञतपोदानादि राजसतामसं
वा विगुणत्वात्फलनमपि वैयर्थ्यमापद्येतेत्याशंक्य तस्य विगुणस्या
पि सगुणत्वप्रकारमाह ॐमिति ब्रह्मणः परमात्मनो निर्देशो ना
मव्यपदेशस्त्रिविधः स्मृतः सकः ॐतत्सदिति एवं तेन च ब्राह्मणाय
तकर्मकर्तारस्तथा वेदाः विधिमार्गप्रवर्तकास्तथा यज्ञाः कर्मरू
पाः पुरा पूर्वं सृष्ट्यादौ विहिताः निर्मिताः तत्र ॐमिति ब्रह्मणो नाम
तद्रूपं छांदोग्योपनिषत्सु अथ खल्वय उद्गीथः सप्रणवो यः प्र
णवः स ॐमित्येषा ॐमित्येतदक्षरमुपासीतोमिति तद्रूके गोद्गी
थेन स[illegible]मकिंविद्बोटकं न गच्छति स्मृतं यद्विनाम्नाय वर्गोपि स्व
कार्येन प्रवर्तत इति तथा सर्वोपक्रमकारः शाकल्योपि प्रजापति

ॐकारः सर्वदैवत्यः पारमेष्ठ्यो ब्राह्मो दैवत्या आध्यात्मिक इति भाष्ये
प्रजापति देवताय ॐमिति शब्दः सर्वदेवतास्वभिधायकत्वेन
सर्वदैवत्यः परमोत्कृष्टस्थाने तिष्ठतीति पारमेष्ठ्यं ब्राह्मो ब्रह्म
दैवत्यस्य आध्यात्मिकः शरीरवर्तिप्रत्यगात्मनोभिधायको वे
ति तथा ब्राह्मणोप्या[illegible]म्नाते तानि शुक्राण्यभवन्तन्येभ्यो भितसे
भ्यस्त्रयो वर्णा अज्ञायन्ताकार उकारो मकार इति तानेकधा समभ
रन्नतदेतदोमिति भाष्ये न देवश्रुतेन ब्रह्मेत्यादिश्रुतेः शुक्राणि श
वलब्रह्माशास्त्राणि हिरण्यगर्भादीनि अभितः अनपनतपश्च
ङ्गः तेभ्य अभितप्तेभ्यस्तत्तपः कुर्वाणेभ्यः कुशकाशाङ्कयो
वर्णा अज्ञायन्तेति सृष्टे तथा च ओमिति नाम निर्देशेन वेदाः
विहिताः तदित्यनेन ब्राह्मणाः सहितयनेन यज्ञाः २३

वनमाली टीका ८

सात्विकानामपि तेषामानर्थक्यप्राप्ते प्रमादबहुलत्वात् तदनुष्ठा
नानां अनतस्तद्वैगुण्यपरिहारायाह ॐ तत्सदिति त्रिभगवन्ना
मोच्चारणरूपं सामान्यप्रायश्चित्तं परमकारुणिकतयोपदि
शति ॐमिति ॐ तत्सदित्येवं रूपो ब्रह्मणः परमेश्वरस्य निर्दे
शः निर्दिश्यतेनेनेति निर्देशः प्रतिपादकः शब्दः नामतिषावत
श्रोतं प्रविष्टमाश्रितं वा जगद्यत्र सः ॐ मयि सर्वमिदं प्रोतं सूत्रे म
णिगणा इवेत्युक्तरूपवाच्यः त्रिविधस्त्रिप्रकारो विधायकस्यः ॐमि
त्येतत्सादिवाचकं तदिति ब्रह्मणः परोक्षवन्निर्देशेन वेदान्तैक
गम्यत्वं बोधयति सदिति सद्गुणान्वयित्वाने आदिकं बोधयति ना
मत्रयमिदमेकवचनं सत्यमहाभिप्रायेणैकवचनानुसारात्
एवं वदेकमेव वा नाम यस्मात्प्राचीनैर्महर्षिभिरयं ब्रह्मणो
निर्देशस्तस्मादिदानीन्तनैरपि स्मर्तव्य इति विधिरयकल्पनेन
षट्कर्तः प्रथमं भद्रस्तद्यादिश्रिव यत्तदामनतपः क्रियासंयोगा
न्नासस्तद्वैगुण्यमेवफलेन खाम्यदम्परस्परावत्परस्परांकोतं

या कल्पते प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणाद्देवतद्वि
ष्णोः संपूर्णं स्यादिति श्रुतिरिति स्मृतेस्तथैव शिष्टाचाराच्च ब्रह्म
णो निर्देशः स्मर्यते वैगुण्यपरिहारसामर्थ्यकथनाय ब्राह्म
णा इति त्रैवर्णिकोपलक्षणं ब्राह्मणाः कर्तारः वेदाः करण
नि यज्ञाः कर्माणि तेन ब्रह्मणो निर्देशेन करणभूतेन पुरा विहि
ताः प्रजापतिनातो विघ्ननिरासायादौ वैगुण्यपरिहाराय चा
ते ब्रह्मणः श्रीविष्णोर्नामोच्चारणं कर्तव्यमिति भावः वैदिककर्मा
भिप्रायेण ब्राह्मणा इत्युक्तं स्मार्तकर्मणि श्राद्धादौ प्रणवादिकं वि
ष्णोर्नाम नरेन्द्रादिभिरप्युच्चारणीयमिति तत्त्व २३

ॐ श्रीमद्वैजयन्ती टीका ९

एवं सात्त्विकानां सात्त्विकान्येव यज्ञतपोदानान्युपादेयानि राज
सानि तामसानि च हेयानीत्युक्त्वा पुनस्तेषां सात्त्विकाधिकारिणां
सर्वाणि यज्ञादीनि कर्माणि भगवद्भिस्तु नामपूर्वकाण्येव भवन्तीत्या
ह ओं तत्सदिति ब्रह्मणः पुरुषोत्तमस्य भगवतो विष्णोः ओं तत्सदि
त्येवंरूपस्त्रिविधस्त्रिप्रकारको निर्देशो नामधेयं स्मृतः ओमि
त्येव ब्रह्मणो निर्दिष्टं नाम तत्त्वमसि सदेव सोम्येत्यादिश्रुतिभिः
कथितः तेन त्रिविधेन निर्देशेन ब्राह्मणाः सत्त्वगुणोपेता विप्रा
श्चत्वारो यज्ञाः पंचयज्ञादयश्च पुरा सृष्ट्यादौ विहिता मुनिभिः स्वादि
रूपेण मयैव प्रकटीकृताः ब्राह्मणा इति बहुवचनेन धर्मकर्मयो
गब्रह्मादीनां प्रतिपादकानि सर्वाणि शास्त्राणि यज्ञा इत्यनेन सर्वाणि
वैदिककर्माणि च गृहीतानि च शब्देन तपोदानव्रतादि गृह्यते २३

मधुसूदनी टीका १०

ओं तत्सदित्येवंरूपो ब्रह्मणः परमात्मनो निर्देशः निर्दिश्यतेऽनेने
ति निर्देशः प्रतिपादकः शब्दः नाम इति यावत् त्रिविधस्त्रिभोऽवि
भाग्रवयवा यस्य स त्रिविधः स्मृतः वेदान्तविद्भिः एकवचनात्त्र्य
वयवमेकं नाम प्रणववत् यस्मात् वैर्महर्षिभिरयं ब्रह्मणो निर्दे

शः स्मृतः तस्मादिदानीन्तनैरपि स्मर्तव्य इति विधिरत्र कल्प्यते ॥ व
षट्कर्तुः प्रथमं भक्षे इत्यादि विधिवचनानि च पूर्वत्वादिति स्या
यात् यज्ञदानतपःक्रियासु योगाद्वा स्यात् तद्वैगुण्यमेव फलं न
ह्यस्य हृष्टार्थवत् संस्कारकतया कल्प्यते प्रमादात्कुर्वतां कर्म
[illegible] प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं ॥
स्यादिति श्रुतिरिति स्मृतेः तथैव शिष्टाचाराच्च ब्रह्मणो निर्देशः स्तू
यते कर्मवैगुण्यपरिहारसामर्थ्यकथनाय ब्राह्मणा इति त्रैवर्णि
कोपलक्षणं ब्राह्मणाद्याः कर्तारः वेदाः करणानि यज्ञाः कर्माणि ते
न ब्रह्मणो निर्देशेन करणभूतेन पुरा विहिताः प्रजापतिना तस्माद्य
ज्ञादिहेतुत्वेन तद्वैगुण्यपरिहारसमर्थो महाप्रभावोऽयं निर्देश
इत्यर्थः [illegible]
[illegible]
[illegible]
[illegible] ॥

सदानंदी टीका ॥

एवमाहारयज्ञतपोदानानां त्रैविध्यकथनेन च ग्राह्याणि सात्विकान्येव त्या
ज्यान्यन्यानि सर्वथा १ इत्युक्तं तत्र भोज्यस्य हृष्टार्थत्वेन केवलं अंग
वैगुण्येनास्ति फलाभावादिशंकेति २ अहृष्टार्थस्य यज्ञादेरंगवैगु २८
ण्यतो भवेत् अपूर्वस्याप्यनुत्पत्तौ फलाभावेन कर्मिणः ३ सात्विका
नामपि ह्येषामानर्थक्यं समागते प्रमादबहुलत्वाद्वा तत्त्वनुष्ठानेन
मतो हरिः ४ वैगुण्यपरिहारार्थमोंतत्सदिति च त्रिधा कीर्तनं भग
वन्नाम्नः प्रायश्चित्ततयाधुना अतिकारुणिकत्वेन साक्षादुपदिशत्य
जः ॐ तत्सदिति रूपो यं ब्रह्मणः परमात्मनः ५ नामनिर्देश आम्नातस्ते
ष्विति तत्त्रिविधः स्मृतो यस्मादेवमतः सर्वैः स्मर्तव्यमधुनातनैः प्र
मादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं
नि. स्यादिति श्रुतिः ६ स्तूयते ब्रह्मनिर्देशः कर्मवैगुण्यनाशकृत् त्रिधा निर्दे
शतो विष्णोः कर्तारो ब्राह्मणादयः वेदाः करणानि यज्ञाः कर्माणि नि
र्मिताः पुरा तस्माद्यज्ञादिसंश्लेषहेतुत्वेन हरेरयं निर्देशः कर्मवैगु

एषपरिहारस्तमोस्त्वपि २३

नीलकंठी टीका १२

अहस्त्रार्थानांयत्तदानंतपःप्रभृतीनांवैकल्यशंकायांसाद्गुण्य
सिद्ध्यर्थंप्रायश्चित्तमुपदिश्यते ओंतत्सदिति ओमितितदिति
सदितिचत्रिविधस्त्रिप्रकारोयंब्रह्मणोनिर्देशोनाम्नांपादः य
थासहस्रनाम्नांपादेसहस्रंनामानिएवमस्मिन्नपिनामपादेत्री
एयवनामानीत्यर्थः ओमितिब्रह्मतैत्तिरीयकेतदितिव्यापनस्यम
हतोभूत्तस्यनामभवतीत्येतरेयकेसदेवसोम्येदमग्रआसीदिति
छांदोग्येएवमेतेषांशब्दानांब्रह्मनामत्वप्रसिद्धेः तेननामत्रयेण
ब्राह्मणादयोविहिताः पुरासर्गादौब्राह्मणाः एतन्नामत्रयोच्चा
रणसामर्थ्येनैवविधात्राविप्रादयोविहिताःप्रकाशिताइत्यर्थः
२३

आनंदीटीका १२

निर्दिश्यतेनेनेतिनिर्देशोवाचकःशब्दः ब्रह्मणोब्रह्मशब्दा
र्थस्य ॥ २३ ॥

रामकंठीटीका १५

इहब्रह्मणःपरमात्मलक्षणस्यपरस्यतत्त्वस्यत्रिविधस्त्रिप्रका
रोनिर्देशःस्वरूपाभिधानंपरमार्थविद्भिःस्मर्यते केनत्र
यःप्रकाराः ओंतत्सदिति तत्रोमितिचित्प्रकाशमात्रस्यब्रह्म
स्वरूपस्यवाचकंपदं अनेनचपदेनतेनैवपरमगुरुणाब्रह्म
समस्तरूपवाचकतयानियमितेनयथानाहंकृतस्वरूपमभि
धीयते तथामात्रात्रयार्धमात्राव्याप्तिप्रदर्शनक्रमेणतत्र
तत्ररहस्यशास्त्रेव्याख्यातमेतत् तदित्यनेनतस्यब्रह्मणोस्त
हंकृतस्वरूपप्रत्यवमर्शकःसततमव्यभिचारीस्वधर्मोभिधीय
ते तदित्तस्यस्वसंवेदनमात्रसंवेद्यस्यतदितिसर्वनामव्यतिरे
केणशब्दांतरप्रतिपाद्यरूपंभवितुमर्हतीति सदित्यनेनपदे
नानन्यसाधारणताविद्यमानताप्रभवतालक्षणंब्रह्म
णःस्वरूपमभिधीयते तदेवंपदत्रयप्रतिपाद्यसकलस्व
रूपेणतेनब्रह्मणापरमेष्ठिनावेदाःसमस्तक्रियाविषय

विशिष्टेतिकर्त्तव्यताकलापवाचकाः समस्तदेशकालपुरु
षाव्यभिचारिस्वरूपाः शब्दराशयस्तथायस्तवनामपक्रम
विभक्त्यानित्याद्येयायागक्रियाविशेषाः श्रुतानित्यत्वात्स
र्वदैव सर्वकालं विहिता निर्मिताः ततः सदा निर्मीयमा
णत्वात्तेषां नित्यत्वं यतस्त्रैविध्यस्य ब्रह्मण ॐमित्येवमा
दयः शब्दा वाचकाः २३ ॥

लासिकी टीका १५

ॐमित्येतदभ्युपगमात्मकं पदम् तदिति सर्वनामपदं परोक्ष
त्ववाचकम्
सदिति प्रशस्तप्रतिपादकमि
त्येवं परब्रह्मणो निर्देशो नामव्यपदेशस्त्रिविधस्त्रिप्रकारः स्मृ
तः विगुणस्यापि सगुणत्वापादनायोपदिष्टः शिष्टैः अत्र स
म्मतिमाह ब्राह्मणा इति तेन त्रिविधेन ब्रह्मणो नाम निर्देशे
न पुरा सृष्ट्यादौ विधात्रा ब्राह्मणा जातिश्रेष्ठा यज्ञाय तदनुष्ठातारो
वेदास्तत्साधनीभूता यज्ञाः कर्माणि च विहिताः सगुणत्वेन
निर्मिताः अतो राजसत्वपरिहाराय सात्विकत्वापादनाय च ।
ॐ तत्सदिति नामत्रयमवश्यं प्रयत्नेनोपादानादौ व्यपदेश्यम्
तदुक्तम् प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणा
देव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः
२३ ॥

पंचोले टीका

यज्ञदानतपःप्रभृतीनां सत्वरजस्तमः त्रयाणामपि सद्गु
णकारणायोपदेशमाह ॐ तत्सदिति ॐ तत्सदिति ब्रह्म
णः त्रिविधः त्रिप्रकारो निर्देशः निर्दिश्यते येन स निर्देशः वेदान्ते

शुद्धसत्त्वविद्भिः स्मृतः विदितः तेन त्रिविधेन निर्देशेन ब्राह्मणाः
वेदाश्च यज्ञाश्च पुरा सर्वे विहिताः निर्मिताः ते ब्राह्मणाः सत्वगुणेन नां
ब्रह्मणा निर्मितत्वात् सात्विका एव न तु राजसा इत्यर्थः २३
रणवीरसमिद्धोथिनी॥

ननु दैवसर्गभाजामपि दुर्निवारशोकमोहादिप्रतिपक्षत्वेन
सात्विकानुष्ठानावर्तनस्य प्रायेणासंभवितया रजस्तमोमिश्रि-
त्वेनैव यज्ञादिक्रियाविधीयमाना वैगुण्यादुपयोगिका एवेति
व्यर्थस्तदनुष्ठाने मुक्तिकामानां श्रम इत्यतस्तेनाभिप्रायमाशंक्य
परमेश्वरनामोद्देशेनानुष्ठानात्तद्वैगुण्यप्रतिपादयितुमाह
ओंतत्सदिति २३ ब्रह्मणः परमेश्वरस्य ओंतत्सदित्येवं त्रिप्र-
कारो निर्देशः स्वरूपाभिधाने शिष्टैः स्मर्यते स्म तेन ब्रह्मणस्त्रिवि-
धेन नामनिर्देशेन सहिता ब्राह्मणाः ब्रह्मवेदं स्वस्य वर्णोचितं च-
तुर्वेदादिलक्षणं विदन्त्यधीयते वा ये ते ब्राह्मणाः कर्माधिकारि-
णः क्षत्रियादयो द्विजाः वेदाश्च यज्ञादिक्रियाविषयविशिष्टे-
तिकर्तव्यताकलापवाचका यजुर्वेदादयः यज्ञाश्च देवादिप्र-
कारभिन्नपुरुषयज्ञादयश्च यज्ञेत्युपलक्षणं दानतपसोरपि
तेन यज्ञादिक्रियाविशेषाश्च पुरा सर्वे विहिता आसन्निति शेषः
तदधिकारिणा ओमित्यादिनामत्रयमुच्चार्यैव स्ववर्णोचिते कर्म-
णि प्रवृत्ता विहिता विशिष्टहितलोकाभयसिद्धिलक्षणं मत्सा-
नुग्रहप्राप्तिलक्षणं च येषां ते तादृशा अभवन्नित्यर्थः वेदाश्च
ओमित्याद्युच्चार्य यजुषि प्राणादीन्संधाय यथायथवधे विनियुक्ता य-
जुर्वेदमंत्रविशेषा विहिता विशिष्टकार्यसिद्धिलक्षणं हितं ये-
भ्यस्ते तादृशा आसन्नित्यर्थः यज्ञाश्च पुरुषयज्ञादिकाः क्रिया
ओमित्यादिनामत्रयोच्चारणपूर्वमनुष्ठीयमाना विहिता विशेष-
णहिता अनुकूलफलजनका अभूवन्नित्यर्थः २३ ॥

ओंतत्सदित्यादिना परस्य ब्रह्मणोऽस्यैतानिनामानि
प्रतंजगद्यत्रस्वयंचस्वामी वेदोक्तरूपोऽनुपचारतस्य
सर्वैःशुभैश्चापियुतोनवाप्यैर्गणैस्तत्सदित्येनमणो।
वदंतीतिह्रीति ऋग्वेदखिलेषु द्वितीयपादस्तच्छब्दा
र्थः तदेवसोम्येदमग्रआसीदितिच ओमितिब्रह्मेति
व तेनब्रह्मणाआत्मप्रजार्थं वेदविधिर्व्यजनंमाहृ
क्ताशुवस्त्वात् तत्फलेप्सेत्यादिरयनभिधाय सद्भाव
प्राद्वेनप्रजननंस्तुवितं ओमित्युक्त्वानभिसंधायफ
ले यज्ञदानतपआदिक्रतामतिप्रीतेनीमसास्या
त् ब्रह्मैवतिष्ठादितंभवतीत्याशयः तथाचऋ
ग्वेदखिलेषु अयत्तायानिष्फलंकर्मतत्स्यात्सदै
तदर्थंकर्मवदंतिदेवाः तच्छब्दानांसविधेयैर्ब्रह्मणी
तेस्तत्स्वरूपत्वाज्जनितंब्रह्मतस्यति २२॥

जो कहो कि ऐसा विचार करने से प्राय सब यज्ञ श्रो तपस्या त
था दान आदि राजस श्रो तामस मात्र होते हैं इस कारण यज्ञ
आदि कर्म्म मे यत्न करना वृथा है इस शङ्कापर पूर्वोक्त यज्ञ
दान आदि बहुधा राजसतामस होने से भी सात्विकत्व प्रतिपा
दन की उपाय देखाय कर कहते हैं कि श्रों तत सत ये जो
तीन शब्द सो परमात्मा के नाम के अनुरूप निर्दिष्ट हैं इन के
मध्य मे अकार उकार श्रो मकार का स्वरूप जो श्रोंकार सो ब्रह्म
है यह श्रुतियो मे प्रसिद्ध है सो श्रों शब्द ब्रह्म ही का नाम है
श्रोर जगत्कारण हेतु से ज्ञानियों को अपरोक्ष है तत भी ब्रह्म
श्रोर परमार्थ श्रो विद्यमानत्व श्रो साधुत्व श्रोप्रसस्तत्वादि प्रयु
क्त श्रोर हे सौम्य इस जगत की सृष्टि के पूर्व सतस्वरूप मे था
ऐसे श्रुतियों के कहने से सत शब्द भी ब्रह्महीं का नाम है श्रो
र यह त्रिविधनाम कहनेसे निकृष्टको भी उत्कृष्ट करने को
नाम समर्थ है इस अभिप्राय से प्रसंशा करते हैं कि विधाता
ने सृष्टि के प्रथम इस परमात्मा के त्रिविध नाम का उद्देश कर
के ब्राह्मण श्रो वेद श्रो यज्ञ का निर्म्माण किया अथवा जो पर
मात्मा का यह तीन प्रकार निर्देश सोई परमात्मा ने ब्राह्मण श्र
लिप वित्र को सृष्ट किया इस से श्रों ततसत यह कहना अति प्र
सस्त कहे उत्तम हैं २३

दोहा

ॐ तत्सत्पद निर्देशजो ब्रह्मको तीनप्रकार तातें ब्राह्म
ण वेद यग पूर्व विहितविस्तार २३॥

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तंते विधानोक्ताः सततं ब्रह्मवादिनां २४

शांकरभाष्यं टीका १

निर्देशस्तत्स्तुत्यर्थमुच्यते तस्मादोमित्युदाहृत्योच्चार्य यज्ञदानतपःक्रियाः यज्ञादिस्वरूपाः क्रियाः प्रवर्तंते विधानोक्ताः शास्त्रचोदिताः सततं सर्वदा ब्रह्मवादिनां ब्रह्मवदनशीलानां २४

आनंदगिरिकृत टीका २

पूर्वं सर्गादौ निर्म्माणं च प्रजापतिकर्तृकं यस्माद्ब्राह्मणादीनां कारणं यस्माच्च ब्रह्मणो निर्देशस्तस्मादित्युपसंहरति तस्मादिति ब्रह्मवादिनामित्यत्र ब्रह्मवेद २४

स्वामिकृत टीका ३

इदानीं प्रत्येकमोंकारादीनां प्राशस्त्यं दर्शयिष्यन् ओंकारस्य तावदाह तस्मादिति यस्मादेवं ब्रह्मणो निर्देशः प्रशस्तः तस्मादोमित्युदाहृत्योच्चार्य कृता वेदवादिनां यज्ञाद्याः शास्त्रोक्ताः क्रियाः सततं सर्वदांगवैकल्येपि प्रकर्षेण वर्तंते सगुणा भवंतीत्यर्थः २४

पैशाचभाष्य टीका ४

तस्मादोमित्युदाहृत्य प्रवर्तंते इत्यस्य उदाहृत्य प्रवर्तयितव्याः कर्तव्या इत्यर्थः विधानोक्ताः शास्त्रोक्तास्सततं ब्रह्मवादिनां ब्रह्मवादिभिरित्यर्थः २४

रामानुजभाष्य टीका ५

\+ तस्मादोमिति तस्माद्ब्रह्मवादिनां वेदवादिनां त्रैवर्णिकानां यज्ञदानतपःक्रिया विधानोक्ता आदावोमित्युदाहृत्य सततं सर्वदा प्रवर्तंते वेदाश्चोमित्युदाहृत्यारभ्यंते एवं वेदानां वैदिकानां च यज्ञादीनां कर्मणामोमिति शब्दान्वयो वर्णितः ओमिति शब्दान्वितवेदधारणानंतदन्वितयज्ञादिकर्मकरणं च ब्राह्मणशब्दनिर्दिष्टानां त्रैवर्णिकानामप्योमिति शब्दान्वयो वर्णितः

\+ त्रयाणां ॐतत्सच्छब्दानामान्वयप्रकारो वर्ण्यते प्रथममोमितिशब्दस्यान्वयप्रकारमाह ॥

+ ॐतत्सदित्येभिस्त्रिभिः शब्दैर्ब्रह्मणो निर्देशः संमुखीकरणं तत्र ॐमित्यनेन शास्त्रार्थीयमादेहसंबंधकरी कार्यइतिहृच्यते ॥२४॥

९५

स्मात्‌ः २४

अभिनवगुप्तकृत टीका ९

+स्पष्टार्थं २४ ॥ ॥

परमार्थप्रपा टीका ७

यच्चोपक्रान्तमर्थमाह तस्मादिति यस्मादेवं ब्रह्मणो निर्देशस्तस्मात्कारणादोमित्युदाहृत्यउच्चार्य वेदविधानोक्ताः ब्रह्मवादिनां मोक्षार्थिनां यज्ञदानतपःक्रियाः सततं निरंतरं प्रवर्तन्ते २४

वनमाली टीका ८

इदानीमकारोकारमकारमकारव्याख्यानेन तत्समुदायोंकारव्याख्यानवदोंकारतत्वहृद्व्याख्यानेन तत्समुदायरूपब्रह्मणो निर्देशस्यातिशयाय व्याख्यातिवनर्भिः तत्र प्रथममोंकारं व्याचष्टे यस्मादोमिति ब्रह्मेत्यादिश्रुतिष्वोमिति ब्रह्मणो नाम प्रसिद्धं तस्मादोमित्युदाहृत्य ॐकारोच्चारणानंतरं विधानोक्ताः विविधशास्त्रबोधिताः ब्रह्मवादिनां वेदवादिनां यज्ञदानतपःक्रियाः सततं प्रवर्तन्ते प्रकृष्टतया वैगुण्यराहित्येन वर्तन्ते यस्यैकावयवोच्चारणादप्यवैगुण्यं किंपुनस्तस्य सर्वस्योच्चारणादिति स्तुत्यतिशयः २४

उत्तमवैजन्ती टीका ९

एवमोंकारादिभिस्त्रिभिर्ब्राह्मणवेदयज्ञानां प्रकृतत्वमुक्त्वा थेदानीं तेषामोमादित्रयाणां तेषु ब्राह्मणादित्रिषु सम्बंधप्रकारो वाच्यस्तेच त्रिभिस्तत्रादौ ॐकारस्य संबंधप्रकारमाह तस्मादिति यस्मादोमादिभिर्ब्राह्मणादयः प्रकृता तस्मात् ब्रह्मवादिनां वेदवादिनां सात्विकानां त्रैवर्णिकानां सततं सर्वदा विधानोक्ताः वेदविधिना कथिताः यज्ञदानतपःक्रियाः वैदिकानां यज्ञदानतपसां कर्माणि ओमित्युदाहृत्योच्चार्य प्रवर्तन्ते प्रकर्षेण गवैकल्यादिदोषराहित्येन वर्तन्ते शृणुतामामनुवर्तीत्यर्थः यतः ॐमित्युच्चार्यैव वेदाः प्रवर्तन्ते नैवैदिकानां ब्राह्मणपालितानां त्रैवर्णिकानां वैदिकानां यज्ञदानतपः प्रभृति सर्वं क

कटी — ब्रह्म — पः

+ इदानीमकारोकारमकारव्याख्यानेनतत्समुदायोंकारव्याख्यानवदोंकारतत्त्वस्तत्त्वम्व्याख्यानेनतत्समुदायरूपोब्रह्मणोनिर्देशःस्तूयतिप्रायायव्याख्यातमारभ्यतेचतुर्भिः तत्रप्रथममोंकारंव्याचष्टे ॥

माणोंचोंकारेणमहत्संबंधप्रकारोभगवतावर्णितस्तस्मान्महाप्रभावोऽयंनिर्देशः २४ मधुसूदनी टीका १०

+ यस्मात्ओमितिब्रह्मइत्यादिषुश्रुतिषुओमितिब्रह्मणोनामप्रसिद्धं तस्मादोमित्युदाहृत्यओंकारोच्चारणानंतरंविधानोक्ताविधिशास्त्रचोदिताः ब्रह्मवादिनांवेदवादिनांयज्ञदानतपः सततंप्रवर्तन्तेप्रकृष्टतयावैगुण्यराहित्येनवर्तन्तेयस्यैकावयवोच्चारणादेववैगुण्यंकिंपुनस्तस्यसर्वस्योच्चारणादितिस्तुत्यतिशयःहितीयंतत्त्वंव्याचष्टे २४ सदानंदी टीका ११

क्रियाः

अथोंकारादिनामास्यश्रीमद्भगवतोहरेःव्याख्यानंवेदनिर्णीतनिर्देशस्तुतयेपुनः १ आरभतेत्रभगवानोमित्यादौवदत्यजः ओमितिब्रह्मणोनामप्रसिद्धंयतआगमे २ तस्मादोमित्युदाहृत्यविधिताःप्रकृष्टत्वेनवर्तन्तेयज्ञदानतपःक्रियाः ३ अगवैगुण्यराहित्यात्सततंवेदवादिनां यस्यैकावयवोच्चार्यमाणेवैगुण्यसंक्षयः किंपुनस्तस्यसर्वस्योच्चारणादितिसंस्तुतिः ४ अहोहरेर्नाममहत्फलंश्रुतोश्रुतंसदोंकारइतिस्मृतंहृदि पुनातियत्तादिकृतंयलद्वर्णलनातियापौघमदीरणात्सकृत २४

नीलकंठी टीका १२

यस्मादेतन्नामत्रयपूर्वकंपतेषांविधानेसर्गादौहष्टंतस्मान्नविक्ततेषुनामसुओमित्येकमेवनामउदाहृत्यब्रह्मवादिनांवैदिकानांविधानोक्ताः वेदोक्ताः यज्ञादयःक्रियाःसततंप्रवर्तन्ते तथाचश्रुतिः ओमितिब्रह्माप्रसौतीति ओमितिशस्त्राणिशंसति ओमित्यध्वर्युःप्रतिगरंप्रतिगृणाति ओमितिसामानिगायंतीतियत्तेसर्वेषामृत्विजांक्रियाओंकारपूर्विकाइत्येतद्दर्शयति २४

आनंदीटीका १३

त्रयाणामप्येषांशब्दानांब्रह्मार्थवाचकत्वप्रयोगमाह उदाहृ

त्यब्रह्मणः प्रणवं कुर्यादादावंते च सर्वदा स्त्रवत्यनोंकृ
तं सर्वं परस्ताच्च विशीर्यते इति स्मरणात् सर्वस्मिन्कर्म
णि ॐकारमादावंते चोच्चार्य ॥ २४ ॥

रामकंठीटीका १४

तस्माद्धेतोर्ब्रह्मवादिनां तत्त्वमसीत्येवं वदनशीलानां ज्ञानिना
मोमित्येतन्मंत्रपदं यथोक्तब्रह्मस्वरूपवाचकमुदाहृत्य वि
शिष्टसमाधिनोच्चार्य यज्ञादिक्रियाः सततं प्रवर्तंते प्रसरं
ति उदाहरणक्रियायां यज्ञदानादिक्रियापेक्षया पौर्वकाल्यमि
ति न भिन्नकर्तृत्वमत्रावसेयं कीदृश्यः क्रिया विधानोक्ता वि
धीयंते स्मिन्निति विधायज्ञादयो भावा इति विधानं वेदादिशास्त्र
तेनोक्ताः प्रतिपादितस्वरूपाः किमनेनोक्तं भवति मुख्य
देवसर्गभाजांमुमुक्षूणां ब्रह्माद्वैतभावनया सर्वाः क्रियाः प्र
वर्तंते इति २४ ॥

+ न चैवं तत्केवलं शास्त्रसिद्धमेव याव
ल्लोके प्रसिद्धमित्याह

लासिकी [illegible]टीका १५ ॥

+ यस्मादेवं तस्मात् ओमिति ब्रह्मणो निकृतिप्रसिद्धं ॐमिति मंत्र
पदं प्रणवत्वेन भासमानस्य ब्रह्मणो नरम्भ उपगमत्व प्रतिपादक
मुच्चार्य ॐ ब्रह्मैवेदं सर्वमित्येवमदीय ब्रह्मवादिनां विज्ञानव
तां सर्वं खल्विदं ब्रह्मेत्येवं वदनशीलानां विधानोक्ताः शास्त्रो
क्ता यज्ञदानतपसां क्रियाः कर्माणि सर्वदा प्रवर्तंते संसरंति २४ व
२४ ॥

पंचोली टीका

इदानीं प्रत्येकमोंकारादीनां प्राशस्त्यं दर्शयिष्यन्नोंकारस्य ताव
दाह तस्मादिति तस्मादोमित्युदाहृत्य ब्रह्मवादिनां ब्रह्मवदन
शीलानां यज्ञदानतपोरूपाः क्रियाः विधानोक्ताः यथाशा
स्त्रविहिताः सततं सर्वदा प्रवर्तंते २४

यस्मादेवं तस्माद्धेतोर्ब्रह्मवादिनां धनुर्वेदतत्त्वज्ञानिनां ॐमित्ये
तदुदाहृत्य विधानोक्ताः शास्त्रचोदिता यज्ञादिकाः क्रियाः सत
तं सर्वदा नित्यं प्रवर्तंते प्रहतिविषये भवंति विधेयं स्तूयते वक्ति
तिन्यायात्स्तुते विधेयतातात्पर्यात्वयाप्येवमेवानुष्ठानव्याप्रत्य
र्थः अथच प्रवर्तंते प्रकर्षेण हितफलजनकतया वर्तंते रज
स्तमोमिश्रत्वेन विगुणा अपि सगुणीभवंतीत्यर्थः २४ ॥

भाषाअनुवादटीका

अब ओंकार आदि शब्दों की प्रसस्तता देखावने के मनोरथ से ओं
कार का प्रसस्तत्व कहते हैं कि जिस हेत परमात्मा का निर्देश
इसी रूप से प्रसस्त है इस से ओं मात्र उच्चारण पूर्वक वेदादि
कृत यज्ञ दान औ तपस्या आदि शास्त्रोक्त क्रिया सकल यथाव
त संपूर्ण न होने से अर्थात हीन होने भी अच्छी तरह गुण संप
न्न सर्वाङ्ग पूर्ण होती हैं २४

दोहा

ताते ॐ उचार यह यज्ञ तपदान क्रियादि वर्तें विधिवत उक्त
सो नित ब्रह्मवादिकाहि २४ ॥

97

तदित्यनभिसंधायफलंयज्ञतपःक्रियाः दा
नक्रियाश्चविविधाःक्रियंतेमोक्षकांक्षिभिः २५

शांकरभाष्य टीका १

तदितिः तदित्यनभिसन्धाय तदिति ब्रह्माभिधानमुच्चार्य अन
भिसन्धाय च कर्मणः फलं यज्ञतपःक्रियाः यज्ञक्रियास्तपःक्रिया
श्च यज्ञतपःक्रियाश्च दानक्रियाश्च विविधाः क्षेत्रहिरण्यप्रदानादि
लक्षणाः क्रियन्ते निर्वर्त्यन्ते मोक्षकांक्षिभिः २५

आनंदगिरिकृत टीका २

ओंशब्दस्य विनियोगमुक्त्वा तच्छब्दस्य विनियोगमाह तदित्यादिना
२५

स्वामिकृतटीका ३

द्वितीयंनामप्रस्तौति तदित्युदाहृत्येति पूर्वस्यानुषंगः तदित्युदा
हृत्य शुद्धचित्तैर्मोक्षकांक्षिभिः पुरुषैः फलाभिसंधिमकृत्वाय
ज्ञतपोदानरूपाः क्रियाः क्रियन्ते ततश्चचित्तशोधनद्वारेणफलसंकल
नेनेन मोक्षत्वसंपादकत्वात्तच्छब्दनिर्देशः प्रशस्त इत्यर्थः
२५

पिशाचभाष्य टीका ४

क्रियंते कर्तृशब्दादानक्रियाश्चविविधाः क्रियंतेमोक्षकांक्षिभि
स्तदितिॐतत्सदितिपदत्रयेणार्थंॐतत्सदितिब्रह्मस्वरूपंप्रतिपा
द्य यज्ञदानतपःक्रियाणांफलंचानभिसंधायईश्वरार्पणबुध्या
यज्ञदानतपक्रियाः मुमुक्षुभिः क्रियंते [illegible] इत्यर्थः दानक्रिया
विविधाः गोहिरण्यादिविषयाः दानक्रियाश्चविविधाइतिपु
नः क्रियाश्चविविधाइतिक्रियाग्रहणंयज्ञदानस्यमोक्षंप्रति
प्रकृष्टोपकारकत्वप्रदर्शनार्थं २५

रामानुजभाष्य टीका ५

तदिति फलमनभिसंधायवेदाध्ययनयज्ञक्रियामोक्षकांक्षि
भिः त्रैवर्णिकैः याः क्रियंतेताब्रह्मप्राप्त्युपायतयाब्रह्मवादिना

श्री. गी. टी. सं.

तदिति शब्देन निर्देश्यः स[illegible]कः किं पुनस्तद्[illegible]ममृतममिति तद्ब्र-
ह्मो ब्रह्मवादी प्रसिद्धः एवं वेदाध्ययनयज्ञादीनां मोक्षसाधनभूतानां
तद्ब्रह्मनिर्देशपरतया तदिति शब्दान्वय उक्तः त्रैवर्णिकानामपि त-
था विधवेदाध्ययनाद्यनुष्ठानादेव तद्ब्रह्मान्वयेनोपपन्नः [illegible]
[illegible] २५

तदिति सर्वनामपदेन सामान्यमात्राभिधा विना विशेषपरामर्शमात्रासमर्थेन फलानभिसंधानमस्पृष्टद्वैते अभिसंधानस्य विशेषपरिग्रहमन्तरेणाभावात् सकलविशेषानुग्राहिकत्वेपि सकलफलसंधाने सर्वकर्तृतायामपि विशिष्टफलयोगात् ॥

अभिनवगुप्तकृत टीका ९

स्पष्टार्थः २५ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ द्वितीयनामनिर्देशस्तैत्तिति तदिति तदित्युदाहृत्येति पूर्वस्यानुषंगः तदिति नाममनिर्देशमुच्चार्याविनश्वरमुद्दिश्य प्रकृते मोक्षकांक्षिभिः फलं अनभिसंधाय यज्ञतपःक्रियास्तथा दानक्रियाश्च क्रियन्ते २५

वनमाली टीका ८

तद्ब्रह्मैवावशेषं तदिति तदिति ब्रह्मनामोदाहृत्योच्चार्य स्वर्गादिफलमनभिसंधाय चित्तशुद्ध्यर्थं यज्ञदानतपःक्रियाश्च विविधा मोक्षकांक्षिभिः क्रियन्ते यस्मादतिप्रशस्तमेतत् २५

ऊष्मवैजयन्ती टीका ९

यद्यपि तेषामोंकारसंबंधस्तथैव तद्ब्रह्मसम्बन्धोपि स्यादित्युक्तात् तत्प्रकारमाह मोक्षकांक्षिभिस्त्रैवर्णिकैस्तैर्मुमुक्षुभिस्तदिति निर्देशमुदाहृत्य फलमनभिसंधाय फलाभिलाषं त्यक्त्वा विविधाः यज्ञतपःक्रियाः दानक्रियाश्च क्रियन्ते तच्छीयन्ते यस्मान्मुमुक्षूणामपि साधनतया तद्ब्रह्मसम्बन्धोऽस्ति तस्मादयं तद्ब्रह्मनिर्देशो महाप्रभाव इत्यभिप्रायः २५

मधुसूदनी टीका १०

तत्त्वमसीत्यादिश्रुतिप्रसिद्धं तदिति ब्रह्मणो नामोदाहृत्य फलमनभिसंधायान्तःकरणशुद्ध्यर्थं यज्ञक्रियास्तपःक्रियादानक्रियाश्च विविधा मोक्षकांक्षिभिः क्रियन्ते तस्मादतिप्रशस्तमे-

९८

तत् २५ [illegible]

सदानंदी टीका ११

तदितिब्रह्मणोनामप्रसिद्धंतत्वमादिके वेदवाक्येसमुच्चार्य्या
नभिसंधायतत्फलं १ अंतःकरणशुद्ध्यर्थंयज्ञदानतपःक्रि
याःक्रियंतेमोक्षमिच्छुभिः प्रशस्तमनपवनत २ कृतौतदि
त्येवमुद्दनामतत्परोक्षरीत्यापरिवर्णितंपरं मुमुक्षुभिर्ये
यमनन्यचेतसातत्त्वैवेद्यंभवमुक्तयेधिया २५

नीलकंठी टीका १२

ओमितिनाम्नःकाम्याकाम्यकर्मसाधारण्येनयज्ञादौविनियोग
मुक्त्वातदितिनाम्नोनिष्कामेषुमुमुक्षुकर्मसुविनियोगंदर्शय
ति तदिति मोक्षकांक्षिभिःफलंअनभिसंधायविविधाःयज्ञतपः
क्रियाःदानक्रियाश्चक्रियंतेइतियोजना ननुफलंचेन्नाभिसंधी
यतेतर्हिकिमभिसंधायक्रियंतइत्याकांक्षायामाह तदितिक्रि
यंतेइतिसर्वाःक्रियास्तदितिब्रह्मेतिक्रियंते यथाब्रह्मवादिभिः
ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ब्रह्मैवतेनगंतव्यंब्रह्म
कर्मसमाधिनेत्युक्तदिशासर्वाःसमाधनफलाःक्रियाःब्रह्मैवे
दंसर्वमितिबुद्ध्याक्रियंते तथामुमुक्षुभिरपीत्यर्थः यद्वेवहि
मुक्तानांस्वाभाविकंशीलेनदेवमुमुक्षूणांशास्त्रेणविधीयतइ
तिप्रसिद्धेःफलमनभिसंधायेतिसात्विक्यात्तदितीत्यत्रापिसा
मर्थ्यादभिसंधायेतिलभ्यते तेनफलमनभिसंधायतदित्यभिसं
धायक्रियाःप्रवर्तंतेइत्यन्वयोपिसरलएव तदितिब्रह्माभिधा
नमुच्चार्येतिभाष्येपिउदाहृतमितिपूर्वश्लोकोक्तक्रियानुकृष्यायो
जनमस्मदुक्ताभिप्रायेणव्याख्येयं उच्चारणस्यापिब्रह्मानुसं
धानार्थत्वादितिदिक् २५

श्री॰ गी॰ टी॰ सं

आनंदीटीका १३

तच्छब्देन सनाम्ना ब्रह्मणः परामर्शः तदिति ब्रह्मार्पणाय फलमनभिसंधाय मोक्षकांक्षिभिः यज्ञादिक्रियाः क्रियंते इति ज्ञानकर्मसमुच्चयो निगमितः ॥२५॥

99

रामकंटीटीका १४

किंच तदित्येतन्मंत्रपदमविनश्वररूपप्रमवपरामर्शार्थमुदाहृत्य पूर्ववदपवर्गार्थिभिः सात्विकैर्दैवसर्गभाग्भिर्यज्ञादिकाः क्रियाः क्रियंते नुष्ठीयंते कथं फलं स्वर्गादिविनश्वरभोगलक्षणं सिद्धिमनभिसंधायासंकल्प्य नेहि निम निरुपमानंदमयब्रह्मस्वरूपप्रत्यवसर्गात्मकैककफलमभिकांक्षिणः अपिच २५ ॥

लासिकी[illegible]टीका १५

किंच — तत्त्वमसीतिश्रुतिप्रसिद्धं तदितिमंत्रपदं सर्वनामरूपं परोक्षस्य ब्रह्मणः प्रतिपादकमुच्चार्य तद्ब्रह्मप्राप्त्यामित्येव मुद्दीर्य फलं स्वर्गाद्यनभिसंधायासंकल्प्य विविधा यज्ञदानतपोक्रिया मोक्षार्थिभिः शुद्धचित्तैः क्रियंते नुष्ठीयंते ॥२५

२५ ॥

पंचोले टीका

द्वितीयं तदिति नामस्तौति तदिति मोक्षकांक्षिभिर्मुमुक्षुभिर्यज्ञतपक्रियाः चान्यत् विविधा दानक्रियाः फलमनभिसंधाय तदिति ब्रह्माभिवादनं उच्चार्य क्रियंते २५ ॥

रणवीरसमभिह्वोधिनी

एवं प्रथमं नाम प्रशंस्य द्वितीयं स्तौति तदिति उदाहृत्येति पूर्वस्मादनुषक्तं तदिति ब्रह्मनामोच्चार्य स्वर्गादिकं क्रियाफलं

वासंकल्पमोक्षकांक्षिभिः मोक्षः परमेश्वरसायुज्यलक्षणस्त
मभिलषद्भिः देवादिप्रकारभिन्नायज्ञादिक्रियाःक्रियंतेनुष्ठी
यंते भवतापितथैवाचरणीयाइतितात्पर्यं २५ ॥

मधुभाष्य

२५॥

भाषाअनुवादटीका

हमरे नाम की प्रसंशा करते हैं इस स्थल मे पूर्वोक्त औं शब्द के साथ ततपद का सम्बन्ध है शुद्ध चित्त मुमुक्षु पुरुषों की अकृत फल रूप कामनाब्रह्मरूप यज्ञ आदि क्रिया तत शब्द उच्चारण पूर्वक की जाती हैं इसी से चित्तशुद्धि के द्वारा फल सङ्कल्प त्याग पूर्वक ब्रह्मतत्व सम्पादकत्व हेतु से तत शब्द का निर्देश करना भी प्रसस्त है २५

दोहा

तत पद फलकी चाह बिन यज्ञ तपकर्म द्विजोय दानकि
यादिक विविध हे मुक्तिकामकरैं सोय २५॥

सद्भावेसाधुभावेचसदित्येतत्प्रयुज्यते प्रश
स्तेकर्मणितथासच्छब्दः पार्थयुज्यते २६

शांकरभाष्य टीका १

ओंतच्छब्दयोर्विनियोगउक्तोऽथेदानीं सच्छब्दस्य विनियोगः क
थ्यते सद्भावइति सतः सद्भावे यथा अविद्यमानस्य पुत्रस्य जन्मनि
तथा साधुभावे असद्वृत्तस्यासाधोः सद्वृत्तता साधुभावस्तस्मिन्
साधुभावेच सदित्येतदभिधानं ब्रह्मणः प्रयुज्यते कथ्यतेऽभि
धीयते प्रशस्ते कर्मणि विवाहादौ चतथा सच्छब्दः पार्थ युज्य
ते प्रयुज्यतइत्येतत २६

आनंदगिरिकृत टीका २

वृत्तमनूद्यानन्तरश्लोकतात्पर्यमाह ओंतच्छब्दयोरिति २६

स्वामिकृत टीका ३ सच्छब्दस्य प्राशस्त्यमाह सद्भावइतिद्वाभ्यां सद्भावे

विनीयं[illegible] नदिष्ठ
[illegible]
[illegible]
[illegible]
[illegible] २६

अस्तित्वे देवदत्तस्य पुत्रादिक
मस्तीत्यस्मिन्नर्थे साधुभा
वे साधुत्वे देवदत्तस्य पुत्रा
दिः श्रेष्ठमित्यस्मिन्नर्थे सदि
त्येतत्पदं प्रयुज्यते प्रशस्ते मा
ङ्गलिके [illegible] विवाहादिक
र्मणि च सदिदं कर्मेति सच्छब्दः
युज्यते प्रयुज्यते संगच्छ
ते वा २६

पिशाचभाष्य टीका ४

किंचास्यत सद्भावेअसतः पुत्रादेरुत्पादनेकर्तव्ये तथासाधुभा
वेसतएवसद्वृत्तस्यसद्वृत्ततायांकर्तव्यां ओंतत्सदितिब्रह्मणोनि
र्देशत्रयंप्रयुज्यतेप्रयोक्तुमित्यर्थः २६

यां

रामानुजभाष्य टीका ५

सदिति सद्भावविद्यमानतायांसाधुभावेकल्याणभावेसर्ववस्तु
षुसदित्येतत्पदंप्रयुज्यते लोकवेदयोः तथायेनकेनचित्पुरुषेणा
धिष्ठितेलौकिकेप्रशस्तेकल्याणेकर्मणिसत्कर्मेदमितिसच्छब्दो
युज्यते प्रयुज्यतइत्यर्थः २६

ऽत्र

अभिनवगुप्तकृत टीका ६

गी
सु.

102

स्यञ्जायं २९

परमार्थप्रपा टीका १

अथसच्छब्दस्यप्राशस्त्यमाह सभ्दावइति सभ्दावेअस्तित्वेदेवद
त्तस्यपुत्रादिकमस्तीत्येतस्मिन्नर्थेसाधुभावेचसाधुत्वेदेवदत्तस
पुत्रादिश्रेष्ठमित्येतस्मिन्नर्थेसदित्येतत्पदंप्रयुज्यते तथाप्रश
स्तेविवाहादिमांगलिकेकर्मणिसच्छब्दोयुज्यते २९

वनमाली टीका ८

सच्छब्दंव्याचष्टे सदितिसद्गुणात्वात्मदैकाकारत्वाद्ब्रह्मणो
नाम सद्भावेअस्तित्वेसाधुभावेसाधुभावेसाधुत्वेशिष्टैःप्रयुज्य
ते तस्माद्वैगुण्यपरिहारेणयत्नादेःसाधुत्वेनतत्फलस्यचविद्य
मानत्वेकर्तृत्वममेतदित्यर्थः तथासद्भावसाधुभावयोरिव
प्रतिबंधेनाशुभस्वजनकेमांगलिकेकर्मणिविवाहादौसच्छ
ब्दोहेपार्थयुज्यते तस्मादप्रतिबंधेनाशुभफलजनकत्वंवैगुण्य
परिहारेणयत्नादेःसमर्थमेतत्रामेतिप्रशस्तमेतदित्यर्थः २९

कुसुमवैजयन्ती टीका ९

अथैतेषांवैदिकानांत्रैवर्णिकानांयज्ञादिकर्मणांचसच्छब्दस
म्बन्धंवक्तुंलोकेवेदेचतस्यप्रयुक्तिप्रकारमाह सद्भावइतिद्वा
भ्यां हेपार्थसद्भावेब्रह्मत्वेविद्यमानत्वेवासाधुभावेचब्रह्मात्म
कमिदंसर्वमितिज्ञानेचत्वेमंगलत्वेवाश्रेष्ठत्वेवासदित्येतत्पदं
प्रयुज्यतेतत्तदभिधायकतयासंगच्छतेतथाप्रशस्तेउपनयन
विवाहपुत्रोत्सवादिमांगलिकेकर्मणिसच्छब्दोयुज्यतेप्रयुज्य
तेसंगच्छतेइत्यर्थः पार्थेतिसंबोधनेनमत्प्रियत्वस्यसंज्ञानभ
क्तिमत्त्वात्मकर्मकर्त्ताःएथापात्वंपुत्रोऽसिअतस्तवापिसाधु
भावत्वेसत्कर्मकर्तृत्वेस्यादसत्वेशंकामाकृथाइतिसूचितं
२९

मधुसूदनी टीका १०॥

॥ ततीयंसच्छब्दंव्याचष्टेद्वाभ्याम॥

सदेव सोम्येदमग्र आसीदित्यादिश्रुतिप्रसिद्धं सदित्येतद्ब्रह्म
णो नाम सद्भावे अविद्यमानत्वशंकायां विद्यमानत्वे साधुभावे
च असाधुत्वशंकायां साधुत्वे च प्रयुज्यते शिष्टैः तस्माद्वैगुण्य
परिहारेण यज्ञादेः साधुत्वं तत्फलस्य च विद्यमानत्वं कर्तुं तम
मेतदित्यर्थः तथा सद्भावसाधुभावयोरिव प्रशस्ते अप्रतिबं
धेनाशुसुखजनके मांगलिके कर्मणि विवाहादौ सच्छब्दो हे
पार्थ युज्यते तस्मादप्रतिबंधेनाशुफलजनकत्वं वैगुण्यपरि
हारेण यज्ञादेः समर्थमेतन्नामेति प्रशस्ततरमेतदित्यर्थः २६

सदानंदी टीका ११

सदेवेति श्रुतौ नाम सदिति ब्रह्मणो हरेः तदसत्यत्वशंकायां सद्भावे
सत्ये प्रयुज्यते १ तथा साधुत्वशंकायां साधुभावे प्रयुज्यते २ सर्वमं
गलहेतुत्वाद्यतो मांगलिके खिले तस्मादप्रतिबंधेन सुखहेतुतं
या सत्कृत उच्चार्यमाणमायंति फलं सन्नाम तद्धरेः अहो श्रीमद्ध
रेर्नाम महिमा येन निरंकुशः ५ सदेव सोम्येदमिति श्रुतौ श्रुतं
विना हरिं नैव विकारनाम भीः सदित्सदीय्यैव हरिं सुधीर्भजे
दसत्त्वसत्ताप्रदमध्वरादिषु २६

नीलकंठी टीका १२

ओंतत्त्वयोर्विनियोगमुक्त्वा सच्छब्दस्य विनियोगमाह द्वाभ्यां
सद्भावे इति सद्भावे अस्तित्वे साधुभावे समीचीनत्वे सच्छब्दः सदि
त्येकमेति प्रशस्ते कर्मणि सत्त्वं वेदोक्तत्वाद सेवति सच्छब्दः
प्रयुज्यते आस्तिकैः २६

आनंदी टीका १३

सद्भावे नित्यत्वे साधुभावे शोभनीयत्वे कीर्तनीयत्वे २६

रामकंठी टीका १४

अपि च सतो विद्यमानस्य नित्यस्य भावः सत्त्वं तस्मिंस्तथा साधुभा
वे साधोः शोभनस्य भावः सत्त्वं तस्मिन्नित्येतयोरर्थयोरस्य

दित्येतन्नामत्रयपदं वाचकत्वेन प्रयुज्यते तथा प्रशस्तेन्यायसि
द्धे कर्मणि व्यापारविशेषे सच्छब्दो वाचकत्वेन गीयते श
ब्द्यते[२६] ॥ २६ ॥

लाखिकीय [illegible] गीटीका १५

किंच— प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते सदेव सौम्येद
मग्र आसीदित्यादि श्रुतिप्रसिद्धं सदित्येतन्नामत्रयपदं सद्भा
वे अविद्यमानत्वशंकायां विद्यमानत्वे साधुभावे च साधु
त्वशंकायां साधुत्वे च सर्वैर्जनैः प्रयुज्यते तथा प्रशस्ते मां
गलिके विवाहादौ कर्मणि सदिदं कर्मेत्येवं प्रयुज्यते सर्वैः २६
[illegible] ॥ २६ ॥

पंचोले टीका

सच्छब्दस्य विनियोगमाह सद्भाव इति हे पार्थ सतो विद्य
मानस्य पुत्रादेः सद्भावे साधुसद्भूतायां सदित्येतद्ब्रह्मणो
भिधानं प्रयुज्यते तथा प्रशस्ते कर्मणि विवाहादौ सच्छब्दः प्र
युज्यते २६ ॥

रामवीरसमिद्बोधिनी

तृतीयं पदं सिद्धमाह द्वाभ्यां सद्भाव इत्यादि सद्भावे सत्त्वमा
त्रे इत्येवं रूपे नित्यत्वे सिद्धे वदत्वस्य पुत्रइत्येवं रूपेस्ति त्वेव
तथा साधुभावे सत्त्वगोत्रमित्येवं रूपे शोभनत्वे सदित्येतद्ब्र
ह्मनाम प्रयुज्यते तथा प्रशस्ते व्यापारसिकर्मणि मांगलिके व्या
पारे सदिदं कर्मेत्येवं रूपे सच्छब्दो युज्यते प्रयुज्यते संगच्छते
वेत्यर्थः २६ ॥

मधुभाष्य

२६ ॥

भाषाअनुवादटीका

सत् शब्द प्रसस्त है यह दो श्लोक से कहते हैं कि सत भाव क
हे अस्तित्व और साधुभाव कहे साधुत्व इन दोनो अर्थ को स
त् शब्द कहता है और हे अर्जुन प्रसस्त कहे माङ्गलिक
विवाहादि कर्म्म मे भीयह सत् कर्म्म इन विषयोंमे सत् शब्द
का प्रयोग योग्य है और मङ्गलादि अर्थको भी कहता है २६

दोहा

सतभाव साधुभाव महि सत हि प्रयुज्यत होय प्रशस्त
कर्ममें पार्थ त्यों सतवच प्रयुज्यत सोय २६॥

यज्ञेतपसिदानेचस्थितिःसदितिचोच्यते क
र्मचैवतदर्थीयंसदित्येवाभिधीयते २७

शांकरभाष्य टीका १

यज्ञे यज्ञकर्मणिया स्थितिस्तपसि च या स्थितिर्दाने च या स्थि
तिः सा च सदित्युच्यते विद्वद्भिः कर्म्म चएवं तदर्थीयं यज्ञदानत
पोर्थीयमथ वा यस्याभिधानत्रयंप्रकृतं तदर्थीयमीश्वरार्थीय
मित्येतत् सदित्येवाभिधीयते तदेतत् यज्ञदानतपआदिक
र्म्म असात्विकंविगुणमपि श्रद्धापूर्वकं ब्रह्मणोभिधानत्रयप्र
योगेणसगुणं सात्विकं सम्पादितम्भवति २७

आनंदगिरिकृतटीका २

प्रकारान्तरेणसच्छब्दस्य विनियोगमाह यज्ञइति नामत्रयोच्चार
णेन साद्गुण्यं सिध्यतीति प्रकरणार्थमुपसंहरति तदेतदिति २७

स्वामिकृत टीका ३

किंचयज्ञेति यज्ञादिषुचयास्थितिंतात्पर्येणअवस्थानंतदपिसदि
त्युच्यते यस्यैवंनामत्रयंसएवपरमात्मार्थःफलंयस्यतत्तद
र्थंकर्मपूजोपहारगृहांगनपरिमार्जनोपलेपरंगमालिका
दिक्रियातत्सिद्ध्यर्थयदन्यत्कर्मक्रियतेउद्यानशालिक्षेत्रधनार्जना
दिविषयंकर्मतदर्थीयंतच्चातिव्यवहितमपिसदेवाभिधीयतेय
स्मादेवमतिप्रशस्तंतन्नामत्रयंतस्मादेतन्नामत्रयं
सर्वकर्मसाद्गुण्यार्थंकीर्तयेदितितात्पर्यार्थःअत्रचार्थवादा
नुपपत्त्याविधिःकल्प्यते विधेयंस्तुवन्नेवस्तौतिन्यायात् अपरेत्वप्र
वर्तंतेविधानोक्ताःक्रियन्तेमोक्षकांक्षिभिरित्यादिवर्तमानोपदे
शःसमभिधीयजतीत्यादिवद्विधित्वेनपरिणमनीयइत्याहुःतन्न
सद्भावेसाधुभावेचेत्यादिषुप्रामाण्यंत्वत्रसंगच्छतइतिपूर्वो
क्तक्रमेणविधिकल्पनैवज्यायसी २७

श्री·
गी· टी·
सं·

पिशाचभाष्य टीका ४

किंचान्यत् यज्ञेतपसिदानेचस्थितिः नैरंतर्येणप्रवृत्तिस्सायदास्था
धाभवतितदाअंतेनसदितिपदद्वयेणब्रह्मोच्यतेनैरंतर्येणनिर्दि
ष्टव्यमित्यर्थः कर्मचैवतदर्थीयकर्मयज्ञदानतपस्सुध्यायलक्ष
णंतदर्थीयंतदर्थी [illegible] यं [illegible] तदर्थीयदाक्रियतेतदाअने
नपदद्वयेणब्रह्माभिधीयतेअभिधातव्यमित्यर्थः २७

१ स्वार्थेक प्रत्ययः

105

रामानुजभाष्य टीका ५

यज्ञइति अथवैदिकानांत्रैवर्णिकानां यज्ञेतपसिदानेचस्थितिः
कल्याणतयासदित्युच्यतेकर्मचतदर्थीयंत्रैवर्णिकार्थीयंत्रिव
र्णेभ्योहितंयज्ञदानादिकंसदित्येवाभिधीयते तस्मादेतावैदिका
निकर्माणिब्राह्मणशब्दनिर्दिष्टास्त्रैवर्णिकास्तैःअंतस्सदितिशा
ब्दान्वयलक्षणेनावेदेभ्यश्चावैदिकेभ्यश्चव्यावृत्तावेदितव्याः २७

अभिनवगुप्तकृत टीका ९

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] सदितिमु
याश्रुत्याप्रशंसाभिधीयते क्रियमाणमपीदंयज्ञादिकंइष्टमिति
बुद्ध्याक्रियमाणंतामसतामेति विशिष्टफलाभिसंधानेनचक्रि
यमाणंनचसत्त्वंथा[illegible]यकमितितस्मात्कर्तव्यमितिमत्वानायज्ञा
दिकुर्वाणाअपिनबध्यंते अनेनैवाभिप्रायेणादिपर्वण्युक्तं नपा
नकल्कोध्ययनेनकल्कःस्वाभाविकोवेदविधिनेकल्कः प्रस
ह्यवित्ताहरणेनकल्कस्तान्येवभावोपहतानिकल्कइति कल्का
र्थकःस्वाभाविकइतिब्राह्मणेननिष्कारणःषडंगोवेदाध्येतव्य

त्वमिति प्रशस्तशास्त्रलोकप्रसिद्धया चेष्टया भावेन सत्त्वादिगुण
त्रययोगिनाचित्तेनोपहतान्येतान्ये वबंधकानि नात्मप्येतिता
त्पर्यम् अतो यज्ञादियावच्छरीरभाविनया कार्यमेव तदर्थं हि
तम् कर्म अर्जनादि यदि वा शोभित्यनेन सम्यक् प्रशांतसमस्तप्रपं
चे तदित्यनेनोद्दिश्यमानविश्वतरंगपरामर्शमात्रात्मके ब्रह्मा
तेत्रस्वभावे सदित्यनेनेच्छात्मनेप्रभवविजृंभमान भेदके
पूर्णत्वेपितावच्छिन्नस्वभावतया भवनमिति प्रतिपाद्यते तथा
चोक्तं सद्भावे साधुभावे चेति तेन परमप्रशांते रूपे पुरस्कृत्यादि
त्यापि यदाति नस्वात्मकेच्छातरंगसंगते च मध्ये कर्तृदानयज्ञ
तपः क्रियाकारककलापपरिपूर्णयज्वरमेवपुरिदमुल्लसि
तमेतत्खलु समंवित्तयमनर्गलस्य स्वाभाविकं रूपमिति क
स्यापि कथं कृतः कोनफलंस्यादिति २७

परमार्थप्रपा टीका ७

किं च यज्ञ इति यज्ञे तपसि दाने चैवं स्थितिस्तात्पर्येणावस्थानेनत
पि सदित्युच्यते यस्य चेदं नामत्रयं स एव परमात्मेत्यर्थः तथा तदर्थी
यं यज्ञदानतपोनिमित्तं पुष्पोपहारगृहांगणपरिमार्जनोद्यानध्वज
पताकादिनिर्माणं धनार्जनादि यत्कर्म क्रियते तत्तु सदित्ये
वाभिधीयते यस्मादेवमतिप्रशस्तं नामत्रयं तस्मादेतत्सर्वं कर्म
साद्गुण्यार्थं कीर्तयेदिति तात्पर्यार्थः नायमर्थवादः किंतु ब्रह्मणो
नामनिर्देशस्यातिप्राशस्त्यादिविधिरेव कल्प्यते २७

वनमाली टीका ८

यज्ञे तपसि दाने च या स्थितिः तत्परतयावस्थितिर्निष्ठा सापि सदिति
उच्यते शिष्टैः कर्म चैव तदर्थीयं तेषु यज्ञदानतपोरूपेष्वर्थेषु भवं
तदनुकूलमेव च कर्म यद्वा यस्य ब्रह्मणो नामेदं प्रस्तुतं तदेवार्थो
विषयो यस्य तत्तथापरं ब्रह्म तदानेन तदनुकूलं कर्म तदर्थीयं विष्णु
प्रणावत्क्रियमाणं कर्म वा तदर्थीयं सदित्येवाभिधीयते तस्मा

श्री·
गी·टी·
सं·

106

सदितिनामकर्मवैगुण्यापनोदनमंप्रशस्ततरं २२

ऊसमवैजयंत्री टीका ९

किंचयत्तेतपसीतिश्रुतःकारणात्तेषांवैदिकानांत्रैवर्णिकानांय
ज्ञेतपसिदानेचयास्थितिस्तात्पर्येणावस्थानं तदपिमंगलतया
सदित्युच्यतेचपुनस्तदर्थीयंयस्वेदमौनतत्सदितिनामत्रयंतद
र्थीयंकर्मसदित्येवाभिधीयते यस्माद्देदावैदिकाब्राह्मणाप
लक्षितास्त्रैवर्णिकार्थीयंकर्मसदित्येवाभिधीयते यस्माद्देदावैदि
काब्राह्मणोपलक्षितास्त्रैवर्णिकावैदिकानिसर्वकर्माणिवेतेस
र्वेयोमादिनामत्रयसंबंधेनैवप्रशस्ततराण्यतस्मात्सुमहत्त्वभिर्व
त्तिनामत्रयंसदैवकीर्तनीयमित्येवकाराभिप्रायः २०

मधुसूदनी टीका १

यज्ञेतपसिदानेचयास्थितिस्तत्परतयावस्थितिर्निर्दिष्टासापिस
दित्युच्यतेविद्वद्भिः कर्मचैवतदर्थीयंतेषुयज्ञदानतपोरूपेषर्थ
षुभवंतदत्रकृत्स्नमेवचकर्म अथवायस्यब्रह्मणोनामेदंप्रस्तु
तंतद्देवार्थोविषयोयस्यतत्तदर्थंशुद्धब्रह्मज्ञानेनदत्तकृत्स्नंक
र्मतदर्थीयंभगवदर्पणबुद्ध्याक्रियमाणंकर्मवातदर्थीयंसदि
त्येवाभिधीयते तस्मात्सदितिनामकर्मवैगुण्यापनोदनसमर्थं
प्रशस्ततरं यस्यैकैकोवयवोपीदृशः किंवक्तव्यंतत्समुदायस्य
ॐतत्सदितिनिर्देशस्यमाहात्म्यमितिसंपिंडितार्थः (यथात्सदि
नाशास्त्रीयंविधिमुत्सृज्यश्रद्धानतयैवहठव्यवहारमात्रेण
यज्ञतपोदानादिकुर्वतोप्रमादाद्वैगुण्यप्राप्तेॐतत्सदितिब्रह्मनि
र्देशेनतत्परिहारस्तसंश्रद्धधानतयाशास्त्रीयविधिमुत्सृज्यका
मकारेणयत्किंचियज्ञादिकुर्वतामसदिणामपितेनैववैगुण्यपरि
हारःस्यादितिकृतंश्रद्धयासात्विकत्वहेतुभूतयेत्यतआह २२

सदानंदी टीका ११

यज्ञेतपसिदानेचयानिष्ठातत्परात्मिका सासदित्युच्यतेभिज्ञैस्तेष

येषु मखादिषु १ भवं तदनुकूलं च कर्म सच्चाभिधीयते अथवा य
स्य नामेदं ब्रह्मणः प्रशस्ततमं २ तदर्थो विषयो यस्य ब्रह्मतानस्य
ततया ब्रह्मार्पणधियाकर्म क्रियमाणं विशुद्धये ३ तदर्थीयं
सदित्येवं प्रशस्तमभिधीयते यस्मै कैकोप्यवयवः प्रशस्तो हि
हृशोमतः ४ किं पुनस्तस्य सर्वस्य वाच्यमाहात्म्यमद्भुतं ५ य
ज्ञादौ समुदीरणाद्भगवतो नाम्नो तदित्यादिकं साङ्गुण्यकृत्तेय
देग विकलं छेयं सुरोपासकैः तेये वेदविदां रहस्यमखिलं ना
मार्थतो यत्परं तच्छ्रीकृष्णमहाभिधं मम तनोभूयादहवः स्वर्थतः म^

२८

नीलकंठी टीका १२

किं च यज्ञादौ स्थितिर्निष्ठा सदिति समीचीनेति उच्यते तदर्थः
सच्छब्दार्थो ब्रह्म तदीयं तदर्थं कृतं तदर्थीयं परमेश्वरप्राप्त्यर्थं
कृतं कर्म सदित्येव समीचीनमित्येवाभिधीयते लोके तदेवं
असात्त्विकं विगुणं वा यज्ञादिकं श्रद्धापूर्वकं ब्रह्मणोभिधानत्र
योच्चारणेन सात्त्विकं सगुणं च संपादितं भवति २८

आनंदी टीका १३

पूर्वश्लोकार्थानुगमेन सात्त्विकतया कृते विहितेषु य
ज्ञादिषु स्थितिः सदिति च नित्या शोभना प्रशस्ता चेत्यु
च्यते तदर्थीयं तस्यैव परमेश्वरस्यार्पणनिमि
त्तं क्रियमाणं कर्म सदित्युच्यते नित्यं शोभनं प्रशस्तं चो
च्यते २७ ॥

\+ यतपरमतः

रामकंठी टीका १४

\+ यज्ञादिषु यथोक्तब्रह्मभावनामयी स्थितिः प्रतिष्ठे
ह परमार्थसती परमशोभना सदिति प्राहु नानेनोप
ते प्रतिपाद्यते तदर्थीयं यज्ञादिप्रयोजनं कर्म प्रश
स्तो व्यापारविशेषः सदित्येव पदेन कथ्यते एवं मा

नै^

श्री॰
गी॰ टी॰
सं॰

त्वाकांक्षिणां सात्विकानां यज्ञादिविषयां ब्रह्मसमापत्ति
हेतुं स्थितिं प्रतिपाद्येदानीमासुराणां संसारबंधहेतुं
चैतद्विपरीतां स्थितिं प्रतिपादयितुमाह २७ ॥

लासिकी[illegible]टीका २५

किंच यज्ञादिषु च या स्थितिस्तात्पर्येणावस्थानम् तदपि सदि
त्युच्यते विद्वद्भिः तदर्थीयं यज्ञाद्यर्थं कृतं कर्मार्जनादि त
दपि सदित्येवाभिधीयते यस्मादसन्नाम्नाप्यस्य स्वापि स
गुणत्वापादनं लोके प्रसिद्धं किंपुनः ॐ तत्सदिति समस्त
स्य वक्तव्यम् तस्मात्पूर्वोक्तनाम यज्ञादौ सात्विकत्वनिष्पत्त्य
र्थमवश्यमनुसंधार्यम् श्रूयतामसतां श्रीगीताशास्त्रा
र्थावबोधेप्यनन्तमनधिकृतत्वप्रतिपादनाय तेषां कर्मा
पनर्हत्वान्न किंचिदुपकारकमित्याह २८ ॥

पंचोलेटीका

यज्ञ इति यज्ञे यज्ञकर्मणि या स्थिति तपसि दाने च या स्थि
तिः सा सदिति विद्वद्भिरुच्यते च पुनः तदर्थीयं यज्ञदानत
पोर्थीयं कर्म सदित्येवाभिधीयते अथवा त्रयाणां शाखानां
ॐ तत्सदिति शाखानां योर्थं ब्रह्मलक्षणः तदर्थीयं कर्म त
दपि सच्छब्देनोच्यते २७

रणवीरसमिद्द्योतिनी ॥

यत एवमभिधायकः सच्छब्दस्ततो यज्ञादिक्रियासु स्थितिः
प्रतिष्ठा सदित्युच्यते तदर्थीयं तस्येश्वरस्य प्रीणनार्थमन्यत्
स्ववर्णोचितं कर्म सत्फलमेव भवतीत्येतदप्यभिधीयते कथ्य
ते श्राप्पुरुषस्तयेत्युपजनीयं तथा च सदित्येतन्नाम्नोच्चार्या
नुष्ठीयमानं यज्ञादिकं सत्फलमेव भवतीत्येतत्त्वयापि तत्सेवा
नुष्ठेयमिति तात्पर्यम् २७ ॥

ਸਪੁਮਾਛ

੨੦॥

भाषाअनुवादटीका

ओर यत्त तप दान मे जो स्थिति कहे इन का तात्पर्य जानि क
र अवस्थान है उसको भी विद्वान जन सत कहते हैं औ पर
मात्मा के अर्थ अथवा यत्त तप दान के अर्थ जो कर्म्म कि
ये जायें वे भी सत कहे जाते हैं जो ये यत्त दान तप आ
दि कर्म्म परमात्मा की सेवा के अर्थ जो कर्म सब असात्विं
क किम्वा विगुण अङ्गहीन भी होये पर श्रद्धापूर्वक कि
ये होये और ब्रह्मके नाम जो ओं तत इन से युक्त किये
होये तो सगुण सात्विक होते हैं २७

दोहा

यत्त तप दानहि में स्थिति सत यह कहियतजोय कर्महि
ईश्वर अर्पण सत यह कहियत सोय २७ ॥

109

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् असदि
त्युच्यते पार्थ न च तत्प्रेत्य नो इह २८ इति श्री
भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योग
शास्त्रे श्रीकृष्णार्जुनसंवादे त्रिगुणविभाग
योगो नाम सप्तदशोऽध्यायः १७

शाङ्करभाष्य टीका १

तत्र च सर्वत्र श्रद्धाप्रधानतया सर्वं सम्पाद्यते यस्मात् अश्रद्धये
ति तस्मात् अश्रद्धया हुतं हवनं कृतं दत्तं च ब्राह्मणेभ्योऽश्रद्ध
या तपस्तप्तमनुष्ठितमश्रद्धया तथाऽश्रद्धयैव कृतं यत् स्तुतिन
मस्कारादि तत्सर्वमसदित्युच्यते मत्प्राप्तिसाधनमार्गबाह्यत्वात्
पार्थ न च तद्बहुलायासमपि प्रेत्य फलाय नाऽपीहार्थं साधुभिर्निन्दि
तत्वादिति २८ इति शाङ्करभाष्ये सप्तदशोऽध्यायः १७

आनन्दगिरिकृतटीका २

अश्रद्धान्वितस्यापि कर्मणो नामत्रयोच्चारणाद्वैगुण्ये श्रद्धाप्राप्ति
संस्यादित्याशंक्याह नत्वेति समभीप्सा प्रकृतं यज्ञादिगृह्यते स
र्वं यज्ञादि सगुणमिति शेषः तस्मात्सत्त्वं साधयति मत्प्राप्तीति
ऐहिकामुष्मिकम्वा फलमश्रद्धितेनाऽपि कर्मणा सम्पत्स्यते
कुतोऽस्मात्सत्त्वमित्याशंक्याह नचेति तस्मादुभयविधफलाहेतुत्वे
हेतुमाह साधुभिरिति निन्दन्ति हि साधवः श्रद्धारहितं कर्म अतो
नैतदुभयफलोपयिकमित्यर्थः तदनेन शास्त्रानभिज्ञानामपि
श्रद्धावतां श्रद्धया सात्त्विकत्वादिवैविध्यभाजां राजसतामसाहा
रादित्यागेन सात्त्विकाहारादिसेवया सत्त्वैकशरणानां प्रामाद
यज्ञादिवैगुण्ये ब्रह्मनामनिर्देशेन परिहरतां परिशुद्धबुद्धीनां
श्रवणादिसामग्रीसम्पत्त्या तत्त्वसाक्षात्कारवतां मोक्षोपपत्ति
रिति स्थितं २८ इति आनन्दगिरिकृतटीकायां सप्तदशोऽध्यायः १७

स्वामिकृत टीका ३

इदानीं सर्वकर्मसु श्रद्धयैव प्रवृत्त्यर्थम् अश्रद्धाकृतं सर्वं निंदति अ
श्रद्धयेति अश्रद्धया हुतं हवनं दत्तं दानं तपस्तप्तं निर्वर्तितं यच्चान्य
दपि कृतं कर्म तत्सर्वमसदित्युच्यते यतः तत्प्रेत्य परत्र लोकांतरे
न फलति विगुणत्वात् नो इह न वास्मिंल्लोके फलति अयशस्कर
त्वात् रजस्तमोमयीं त्यक्त्वा श्रद्धां सत्त्वमयीं श्रित्वा तत्त्वज्ञानेऽधिका
री स्यादिति सप्तदशे स्थितं २८ इति श्रीभगवद्गीतासुबोधिन्यां
टीकायां त्रिगुणविभागयोगो नाम सप्तदशोऽध्यायः १७

पैशाचभाष्य टीका ४

अश्रद्धया नास्तिक्यबुद्ध्या हुतं तत्तपस्तप्तं कृतं च यत्स्वाध्यायादि त
दसदित्युच्यते न तदाराधनमपि सत् सत्सदाराधने न भवती
त्यर्थः ब्रह्मादिभिः किं तदित्यत आह न च तत्प्रेत्य न च परलोके
ऽपि तस्योपकारकं नो इह न स्यादहं इष्टं दानं तपः स्वाध्यायादि
ल लक्षणं कर्म फलसंगं त्यक्त्वा मत्कृतं पदत्रयनिर्देशेन ब्रह्मस्वरूपं
ध्यात्वा महत्या श्रद्धया तदाराधनत्वेन कर्तव्यमेव मोक्षार्थिभिरित्य
र्थः २८ इति पैशाचभाष्ये सप्तदशोऽध्यायः १७

रामानुजभाष्य टीका ५

अश्रद्धयेति अश्रद्धया हुतं दत्तं तपस्तप्तं यत्कृतं शास्त्री
यमपि होमादिकं असदित्युच्यते कुतः न तत्प्रेत्य नो इह न मोक्षाय
सांसारिकाय फलाय [illegible] अतः सर्वं शास्त्रीयं
गुणतः पृथक्लक्षणं शास्त्रसिद्धस्य त्रिधा सप्तदशोदितं २८
इति श्रीरामानुजभाष्ये सप्तदशोऽध्यायः १७

[illegible]नवणमकृत टीका ६

इदानीमश्रद्धावतः नामसंकर्म सर्वं वैवनिष्फलकारकं कलाप
संयोजनमप्युपजनितप्रयासमात्रफलमेवेति सर्वेणाश्रद्धाव
तानभाव्यमित्युच्यते [illegible]
[illegible] असदित्यप्रशस्तं तत्सात्त्व

शास्ते [illegible]कर्माणि यत्नमानानां सर्वैर्नैं भवति शिवम् संग्रहोऽत्र
सप्तदशकार्यकेवशः क्रियासेवाविशेषिणीन याऽपि विज्ञानव
तो मोक्षार्थे पर्यवस्यति २८ इति श्रीभगवद्गीतार्थसंग्रहे
सप्तदशोऽध्यायः १७

परमार्थप्रपा टीका १

अथ अश्रद्धाकृतं सर्वं निंदति अश्रद्धयेति अश्रद्धयैव अश्रद्धया
हुतं होमं दत्तं दानं तप्तं निर्वर्तितं तपः यच्चान्यदपि पूर्वोक्तं कृतं
तत्सर्वमसदित्युक्तं तोयतः प्रेत्य लोकांतरे न फलति वि
गुणत्वात् नेह चास्मिन् लोके फलसिद्धये यशस्करत्वात् न
स्मादृतस्तमः प्रधानां श्रद्धां त्यक्त्वा सत्वमयीं श्रद्धयैवादित्य
ध्यायतात्पर्यं तात्पर्यं श्लोकसंग्राक्तस्कारान्वरूपं विधिवि
धुरधियः अश्रद्धयाऽसयतनं ते दानाहारक्रियाद्येषु विधगुणाव
शात् फलं ते लभंते नहि गुणानि हंतं प्रभवति सत्वेन त्य
द्वेषादिवर्णितेन ब्रह्मार्पणंस्यादिदमिति दशमे समसुक्ते
निरुक्तेऽर्थतत्त्वात् २८ इति श्रीमद्दैवज्ञपंडितसर्वविरचि
तायां भगवद्गीताटीकायां परमार्थप्रपायां श्रद्धाविवेको
नाम सप्तदशोऽध्यायः १७

[illegible]ली टीका ८

यत्कालस्यादिनाश्रद्धया नत्याशास्त्रीयं विधिमुत्सृज्य का
मकारेणायत्न किंचियज्ञादिकं कृतं नाम स्मरणमपि तेनैव
वैगुण्यपरिहारः स्यान्नहि कृतं श्रद्धया साविकत्वहेतुमूत
वेन्नत्याह अश्रद्धयेति अश्रद्धया यद्धुतं हवनं कृतं नमो दत्तं
यद्ब्राह्मणेभ्यः पत्रपतलं मे यच्चान्यत्कर्म कृतं तत्त्वनि नमस्कारादि
तत्सर्वमश्रद्धया कृतमसत् अतं कीं तमादितिनिर्देशेन तत्स
साधुत्वे शक्यानेकं सर्वं यान्त द्ययागप्रत्वाछिलायाऽवांकुरः
तस्मादिसत्वात्नेहेपार्थं अश्रद्धया कृतं प्रेत्य परलोके फलति
विगुणत्वनाप्रवाजनकत्वात् नोऽरह नापीहलोके यशः सा
धुभिर्निंदितत्वात् अतः पहिकामुष्मिकफलविकलत्वात् अश्रद्धा

कृतस्येति सात्विकाश्रद्धयैव सात्विकं यज्ञादिकुर्य्यादंतःकरण
शुद्धये तादृशस्यैव श्रद्धापूर्वकृतस्य सात्विकस्य यज्ञादेर्वैगुण्य
शंकायां ब्रह्मनामनिर्देशेन साद्गुण्यसंपादनीयमिति भावः
तदेवमस्मिन्नध्याये आलस्यादिनानादृतशास्त्राणां श्रद्धयापू
र्वकंवृद्धव्यवहारमात्रेण प्रवर्त्तमानानां शास्त्रानादरेण स्व
रसाधर्म्येण श्रद्धापूर्वकानुष्ठानेन च देवसाधर्म्येण किमसुरा
देवावेत्यर्जुनसंशयविषयाणां राजसतामसश्रद्धापूर्वकं राजस
तामसयज्ञादिकारिणोऽसुराः शास्त्रीयज्ञानसाधनानधिका
रिणः सात्विकश्रद्धापूर्वकं सात्विकयज्ञादिकारिणो देवाः
शास्त्रीयज्ञानसाधनाधिकारिण इति श्रद्धात्रैविध्यप्रदर्शनेन त
थाहारादित्रैविध्यप्रदर्शनेन भगवता निर्णयः कृत इति
प्रसिद्धं २८ इति गीतायां सप्तदशः १७

कुसुमवैजयन्ती टीका १

नन्वसतोज्ञानं विनासम्यक्त्वं कथं तत्र यत्नेरस्यपेक्षायामसद
माह अश्रद्धयेति अश्रद्धयासत्वाभावेयारजस्तमोऽन्वितया
हुतं होमः दत्तं दानं तपस्तप्तमनुष्ठितं यच्चान्यदपि कीर्तन
वंदनस्तवनार्चनादिकं कृतं तत्सर्वं शास्त्रीयमपि होमादिकं
कर्मासदित्युच्यते सत्वेनेनिर्दिश्यते कृतस्यपेक्षायामाह
नचेति चशब्दो हेतौ यस्मादश्रद्धयाकृतं तत्कर्म प्रेत्य परलो
के स्वर्गादिमोक्षो वा न फलति विगुणत्वात् यस्मादिहप्यद
ष्टसंभावात् नो इह संसारेऽपि यशोभोगादिफलं न ददाति न
स्य सज्जननिंदाविषयत्वेनव्यर्थफलत्वात् गुणत्रयविभागश्र
द्धातत्रसत्वमपीशुभा इति सप्तदशोसख्येपोवदत्तं नेम्पहम
२८ इति श्रीमत्वादींद्रकरींद्रकदंबदमांकुशमनातिप्रबल
कोटरवातिसयपक्षकुमारनारदनियमानंदसमानतिप्रवर
प्रबलप्रतापपार्थसखमहिमाभिभक्तकृष्णदासस्यान्तेवासि
नागिरियारिदासेन विरचितायां श्रीमद्भगवद्गीतार्थकुसु
मवैजयंत्यां त्रिगुणविभागो नाम सप्तदशोऽध्यायः १७

[illegible]टीका १०

अश्रद्धयायत्हुतंहवनंकृतमश्रौदत्तंयद्ब्राह्मणेभ्यःयत्तपस्तप्तं
यच्चान्यत्कर्मकृतंस्तुतिनमस्कारादितत्सर्वमश्रद्धयाकृतमस
त् असदित्युच्यते अनर्हत्वात्सदितिनिर्देशेननतस्यसाधुभावःश
कानेकंतत्सर्वंप्राणनदयोगयत्नाच्छिलायाइवांकुरः तत्कस्मादसदि
त्युच्यते शृणुहेपार्थयोहेतौ शृणुहेपार्थयोहेतौ यस्मात्तदश्रद्ध
याकृतंनप्रेत्यपरलोकेफलतिविगुणत्वेनापूर्वाजनकत्वात्न
नोइहनापीहलोकेयशःसाधुभिर्निन्दितत्वात् अनैहिकामुष्मि
कफलविकलत्वादश्रद्धाकृतस्यतस्मात्सात्त्विकाश्रद्धयैवसात्त्वि
कंयज्ञादिक्रियाअन्तःकरणशुद्धयेनाहशस्यैवश्रद्धापूर्वकस्यैव
श्रद्धापूर्वकस्यसात्त्विकस्ययज्ञादेःदैवाद्वैगुण्यशंकायांब्रह्मणो
नामनिर्देशेनसाद्गुण्यंसंपादनीयमितिपरमार्थः श्रद्धापूर्वक
मसात्त्विकमपियज्ञादिविगुणंब्रह्मणोनामनिर्देशेनसात्त्विकंसगु
णंचसंपादितंभवतीतिभाष्यनदेवमस्मिन्नध्याये आलस्यादिनाना
हनशास्त्राणांश्रद्धापूर्वकंवृद्धव्यवहारमात्रेणप्रवर्तमानानांशास्त्रा
नादरेणासुरसाधर्म्येणश्रद्धापूर्वकानुष्ठानेनचदेवसाधर्म्येणकि
महाश्रमीदेवावेत्यर्जुनसंशयविषयाणांराजसतामसश्रद्धापू
र्वकंराजसतामसयज्ञादिकारिणोऽसुराःशास्त्रीययज्ञानसाधनान
धिकारिणः तथासात्त्विकश्रद्धापूर्वकंसात्त्विकयज्ञादिकारिणस्तु
देवाःशास्त्रीययज्ञानसाधनाधिकारिणइतिश्रद्धात्रैविध्यप्रदर्शन
मुखेनाहारादित्रैविध्यप्रदर्शनेनचभगवतानिर्णयःकृतइतिसि
द्धं २८ इतिश्रीमत्परमहंसपरिब्राजकाचार्यश्रीविश्वेश्वरसर
स्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां श्रीभगव
द्गीतागूढार्थदीपिकायांत्रिविधश्रद्धानिर्णयोनामसप्तदशो।
ध्यायः १७ सप्तदशीटीका ॥

एवंयज्ञादिकंकर्मविगुणमपिसात्त्विकं भवतीत्यतएवादौ।
श्रीमद्भगवतास्वयं प्रधानत्वेनसंक्षेपाययज्ञदानादिकर्मसत्

श्री·
गी·टी·
सं·

यतेनिंयतेसर्वंश्रद्धाहीनेनमखादिकं यत्कृतंवह्नेनवक्षोदनंपात्रेभ्य
पवयत् ४ अनुष्ठितंतपोयञ्चकृतंस्तस्यादिकर्मयत् अश्रद्धया
तं^ वतत्सर्वमसाद्यिसद्यतेकृतंदश्रद्धाकृतंयस्मात्रामुत्रेदंफलम
पिअंगवैगुण्यतोफ्रवोजनकत्वेनहेतुना ९ नापीहात्कीर्तियशोलो
केनिंदितत्वात्सत्साधुभिःअतोमम्रतभिः श्रद्धासंपाद्यास्त्विकीत
या १ यज्ञादिकर्मकर्तव्यविनश्रद्धात्मलब्धये श्रद्धात्रैविध्यमादौ
सकलमार्वतपोदानसाद्गुण्यहेतोःॐतत्सन्नामवोर्कस्कृतिवित
तफलेबहुविधासिहेतुः श्रद्धाहीनेविनिंयसकलमपिकृतंयेन
संघोकमित्यंतेश्रीकृष्णगुरूणामपिपरमगुरुंभूरिभावैर्नतोस्मि
रजस्तमोदुःखनिधानमासत्सत्कासमाश्रित्यगुणांविमुक्तं हरेःप
दंभोगमुगंसदेवध्यात्वैवमोतोभवपाशवंधात् । तत्रापयसाम
र्थ्यवतांजनानांयज्ञादिषुगुण्यकरंहिविष्णोःनामत्रयंदोषगणा
पहंतस्मोर्कसुमुक्तःसततंभजेत अत्रापिनिर्णीतमिदंमतंयत्स
वैगुण्ययज्ञादिगुनामविष्णोःप्रधानमस्तीन्यतपतदेवसत्वाविमुक्तो
तविकल्पजालात् २८ इतिभावप्रकाशेश्रीमदानंदविद्याकृतेश्र
द्धात्रैविध्यवोधोयमुर्त्तसमदशोगतः १७

नीलकंठी टीका १२

सर्वत्रश्रद्धैवसाद्गुण्यहेतुरितिव्यतिरेकमुखेनाह अश्रद्धयेति हु
तंहोमःदत्तंदानं तपःतप्तंअनुष्ठितं कृतंअश्रद्धयाविहितंभगव
न्नामस्मरणमपियज्ञाद्यनत्सर्वमसदित्यभावभूतमित्युच्यते पार्थ
असत्पवततप्रेत्यमृत्वापरलोकेनोपयुज्यते इहअस्मिन्लोकेवा
नोनैवउपयुज्यते तस्मात्श्रद्धैवसात्विकीमातेवसर्वकामैःशर
णीकरणीयेतिभावः २८ इतिभीष्मपर्वणिनैलकंठीयेभारत
भावदीपेसप्तदशोऽध्यायः १७

112

आनंदीटीका १३

एवंदैवसर्गभाजांसात्विकानांज्ञानकर्मसमुच्चयश्रयथुक्तिंव
ल्लिसमापत्तिहेतुंप्रतिपाद्यासुरसर्गभाजांतद्विपरीतांस्थि
तिंप्रतिपादयति अश्रद्धयासात्विकाःश्रद्धयाः इतरथारा
जस्यातामस्याचश्रद्धयापरमेश्वरार्पणंविनासर्वमसदिति
त्यमशोभनममपशास्त्रंचेतिसिद्धम् २८ इतिश्रीआनंदीटीका
गीतायांसप्तदशोध्यायः १७ ॥

रामकंठीटीका १४

ज्ञानस्यसज्जनाव्यभिचारिण्यश्रद्धयापरमार्थसद्वस्त्वसंभाव
नयाऽ[illegible]यद्यज्ञविधियोविहितंतस्याद्दत्तंतपस्तप्तं दानं
यत्सौम्यनुतिष्ठितं अन्यद्वाऽऽत्मकृतंकिंचनकृतंतत्सर्वमसदि
त्युच्यते नतत्रित्यनापिशोभनंऽज्ञानोयतस्तदश्रद्धयानुष्ठितं
वस्तुनप्रेत्यनपरलोकेसत्वासाधुवा नचेहयतस्तत्फलस्यपा
रलौकिकस्यैहिकस्यवा विनश्वरत्वादसत्वमसत्वव्याधिदोष
योगाश्चासाधुत्वमतस्तथाविधैःकर्तृभिःकृतानांयज्ञादी
नांसंसारबंधलक्षणमसदेवफलंबोद्धव्यमितिदैवासुरस
र्गाभिव्यंजकयज्ञादिक्रियाभेदप्रतिपादनस्यप्रयोजनंय
थोक्तात्मज्ञानलक्षणपरमरहस्यविषयाविषयविभाग
विस्तारंवेदितव्यमित्योम् स्फीतालोकादिनरुचिशिवयो
नयत्साम्यदैवीयोतावाति[illegible]शिवमकलयत्पाशुरीयश्रद्धाहि
मं धामादित्यंतमुदितमितःषोडशाध्यायशैलाहृष्टहृद्व
द्राभवतिभविनोविद्वन्मोहनिद्रा २८ इतिश्रीमद्राजान
करामविरचितेवाक्यान्वयमात्रेसर्वतोभद्रनाम्निभगवद्गीता
विवरणेसप्तदशोध्यायः १७ ॥

अश्रद्धयानामसैःपुरुषैर्यद्धुतंहवनंकृतम् दानंदत्तंतपश्च
नमम् निवर्तितम् यदप्यन्यत्कर्मनमस्कारवंदनादिकृतं
तत्सर्वमसदसाध्विप्युच्यतेसद्भिः अतस्तस्य उऽनत्त्वादितिनि
र्देशेनापिसत्वंकर्तुंनशक्यते शिलामिवांकुरः अतस्ताम
सागीतार्थावबोधनेसर्वथानपिकृतार्थएवेति यतस्तत्कर्मलो
कांतरेनफलतिनोइहनवास्मिंलोकेफलति अदृष्टादिस्येना
दृष्टबीजनकत्वात् अनयाभगवदुक्त्यापैहिकमामुष्मिकंच
फलंकर्मसाधयतीतिगम्यते तथाचोक्तम् क्लेशमूलः
कर्माशयोदृष्टादृष्टजन्मवेदनीयइत्येवम् देवसर्गपरीक्षा
यैभोजनाद्यमलक्षयत् येस्मिंश्रद्धागुणोद्देशेनेवंदेगु
णसागरम् २८ इतिश्रीभगवद्गीताटीकायांवासव्याख्या
यांश्रद्धागुणनिर्देशोनामसप्तदशोध्यायः १७ ॥

पंचोलेटीका

इदानींसर्वकर्मसश्रद्धयैवमहत्फलमश्रद्धयाकृतंसर्वंनिंदति
अश्रद्धयेति यत्कश्रद्धयाअश्रोहुतंदत्तंब्राह्मणेभ्यः हव्यंचोद्भाय
य॑ णादितपस्तप्तमहुतंचैत् अन्यदपि अश्रद्धयाव्रतिनमस्कारादि
कृतंतत्सर्वंअसदितिअसाधुरुच्यते तत्श्रद्धायासमर्पितमित्येतत्परत्र
लोकेफलायनभवतिनकल्पते इहलोकोक्रियार्थमपिनभव
तिसाधुभिःनिंदितत्वात् २८ ॥ इतिश्रीभगवद्गीतासूपा
निषत्सुब्रह्मविद्यायांयोगशास्त्रे पंचोलेटीकायांसप्तदशोध्या
यः १७ ॥

…वीरसमिद्बोधिनी॥

एवंअहेवसर्वकर्मणांभोक्तफलविधायिनीतिव्यतिरेकेणदर्शि

यत्त्वश्रद्धयाहुतंनिंदति अश्रद्धयेति अश्रद्धयाफलविषयासंभा
वनयाईश्वरविषयासंभावनयावाहुतंदत्तानियत्तदानंतपांसि
अन्यदपिसदाचरणंस्ववर्णोचितंकर्म असदितिकथ्यते तन्नैवहि
कामुष्मिकोभयफलशून्यमित्यतस्त्वमपिश्रद्धयैवसर्वमाचर
न्सर्वमांसिद्धिमाप्स्यसीतिभद्रम् २८॥ इतिश्रीरामवीरसमि
द्धोधिन्यांश्रीभगवद्गीताव्याख्यायांसप्तदशोध्यायः १७॥

मधुभाष्य

२८ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते
गीताभाष्येसप्तदशोध्यायः १७॥

भाषाअनुवादटीका

अब मनुष्य श्रद्धा पूर्वक कर्म्म मे प्रवृत्त होंय इस लिये अश्र
द्धा कृत कर्म्म की निन्दा करते हैं कि अश्रद्धा से होम तप
दान औ पूजा आदि कर्म्म जो किये जाते है उन को ज्ञानी
शिष्ट कहे भले लोग असत मात्र कहते हैं क्यों कि अङ्ग
विकल होने से इन कर्म्मों का फल परलोक मे भी नही
होता है औ अपयश करनेवाले हैं इस से यहलोक मे भी
कुछ फल नहीं है तो शरीर का क्लेश औ धन की खराबी
करने से भी क्या फल है अपयश तो करके भी न करके भी
मिलेहोगा जो इस फल की इच्छा होय २८ इतिश्रीजगन्ना
थप्रकुलविरचित मनभावनीभाषाटीकायांसप्तदशोध्यायः
१७

दोहा

बिनश्रद्धा आहुति दियो तपतप यो कीयोजोय सो अस
तपार्थ कह्यो नहि परअरु कोहोय २८ ॥